PRINTED IN INDIA

PRINTED AND PUBLISHED BY SIBENDRANATH KANJILAL,
SUPERINTENDENT, CALCUTTA UNIVERSITY PRESS,
48, HAZRA ROAD, BALLYGUNGE, CALCUTTA.

॥ न्यायकुसुमाञ्जलिः ॥

UDAYANACARYA'S

NYAYAKUSUMAÑJALI

PART I

WITH THE COMMENTARIES OF

ŚANKARA MIŚRA

AND


GUNANANDA VIDYAVAGISA

EDITED BY

NARENDRACHANDRA VEDANTATIRTHA, M.A.,

([illegible])

Lecturer in Sanskrit, Calcutta University



UNIVERSITY OF CALCUTTA

1954

Rs. 3/-



SIR ASUTOSH MOOKERJEE.

सहलो सहाँतिम

पा गु लौ पा य

FOREWORD

It gives me unqualified satisfaction that the pledge, that the entire text of the *Nyāyakusumāñjali* of Udayana would be published with the Commentaries of Śaṅkara Miśra and Guṇānanda Vidyāvāgiśa, is going to be fulfilled. Śaṅkara Miśra flourished in the 15th Century A.D. in Mithilā and lived a long life and was the author of a large number of learned works both original and exegetical. He is principally noted for his illuminating commentaries on the literature of the old school of Nyāya. He also wrote commentaries on the works of Udayana and it is a pity that though his commentary on the *Nyāyakusumāñjali* was laid under contribution by such celebrated writers as MM. Chandrakanta Tarkalankara it was not edited and published by a competent scholar up till now. Perhaps the rareness of the manuscript was responsible for this laches. I must congratulate my friend Pt. Narendrachandra Vedantatirtha on the courage of his conviction to undertake this arduous task despite the paucity of manuscript material. Śaṅkara Miśra was a contemporary of Vācaspati Miśra, the author of the *Khaṇḍanoddhāra* and was a predecessor of Jayadeva and consequently of Rucidatta, a pupil of the latter, who wrote a sub-commentary called *Makaranda* on the *Kusumāñjaliprakāśa* of Vardhamāna. Śaṅkara Miśra asserts that his commentary embodies the instructions of his father Bhavanātha Miśra and gives a new interpretation and surpasses previous commentaries. He avers that the commentaries called the *Makaranda*, *Prakāśa* and *Parimala* are deficient in the materials which are to be found in his work alone. We do not presume to enter into a controversy regarding the validity or otherwise of the claim of superiority preferred by Śaṅkara Miśra, which will ever be a matter of opinion. As we have no access to the *Parimala* and the *Makaranda* we are debarred from assessing the relative merits of the works *inter se* in comparison with Śaṅkara Miśra's contribution.

Śaṅkara Miśra was a self-conscious scholar and we know from a study of his commentary of the *Ātmatattvaviveka* that he made a first-hand study of the works of Buddhist philosophy which is attested by extensive extracts from Jñānaśrī's and Ratnakīrti's works. We find that his claim that the study of his commentary based upon the direct teaching of his father is the indispensable condition of understanding and interpreting Udayana's cryptic arguments as recorded in the *ĀTV.*, is amply justified by the subsequent history of exegesis. The later commentators, Bhagīratha and Raghunātha Śiromaṇi included, have drawn upon Śaṅkara's commentary so far as the quotations from Buddhist works are concerned. A remarkable feature of his commentary on the *Nyāyakusumāñjali* appears to be the direct explanation of the text and the studious avoidance of collateral issues the examination of which has made Vardhamāna's work verbose and bulky.

What is important in this connection for a student of Indian Philosophy is to ascertain the dates of the authors of the works mentioned by Śaṅkara Miśra. All the students of the history of Nyāya philosophy must for ever remain indebted to Prof. Dineshchandra Bhattacharya for the flood of light he has thrown on many a tangled problem of the chronology of the writers of this school. We have it on the authority of Prof. D. C. Bhattacharya that the author of the commentary on the *Nyāyakusumāñjali* called *Parimala* as alluded to by Śaṅkara Miśra was Divākaropādhyāya of Mithilā. A fragment of this commentary has been discovered in the Jaina Bhāṇḍāra at Pattan (Mss. Vol. I, Introduction, p. 43). Divākara flourished before Gaṅgeśopādhyāya. He wrote commentaries on the most important works of Udayana and also on the *Khaṇḍanakhaṇḍakhādya* of Śrīharṣa. Prof. Bhattacharya places him between 1200-50 A.D. As regards the *Makaranda* its author is Tvantopādhyāya, again a scholar of Mithilā, who also wrote a commentary on Gaṅgeśa's *Tattvacintāmaṇi* and his time is surmised to fall between 1375-1400 A.D., by Prof. Bhattacharya. About Vardhamāna we know that he was the son of Gaṅgeśa and was a prolific

writer on the Nyāya system. I, for my part, cannot find adequate language for expressing my gratitude to Prof. Dineshchandra Bhattacharya for his wonderful work "*Vaṅge Navyanyāyacarcā*," which has dispelled many an obscurity and confusion regarding the works and writers that were known imperfectly and also about others, whose works are buried in inaccessible manuscripts which would have escaped the knowledge of the present students of Nyāya. We have in the present context been able to clear away a chronological obscurity with the help of the information given in this work which is bound to be regarded as a triumphal monument of the success of modern research.

Guṇānanda Vidyāvāgīśa was a contemporary of Bhavānanda Siddhāntavāgīśa and flourished between 1550-75 A.D. His commentary on the *ĀTVD.* has been quoted and criticised by Yośovijayagaṇi (17th Century A.D.) in the *Nyāyakhaṇḍakhādya.* Guṇānanda was a native of the village Gāṅguriā situated in the district of Nadia. It is a matter of felicitation that the commentary is being published by us. It is an extensive exegesis which helps the understanding of the difficult book of Udayana to a considerable extent.

The name commentary is apt to rouse a doubt of the utility of this class of literature in the minds of modern scholars uninitiated into the intricacies and unfamiliar with the idiosyncrasies of the Indian tradition. A commentary is not merely confined to the task of elucidation of the original text. It makes new contribution by way of refuting the criticism of the philosophers of rival schools. The latter creates a crisis and the vindication of the prestige of a traditional school of philosophy demands a full answer to the destructive criticism. This could be done with equal propriety and efficiency by writing independent treatises. But loyalty to tradition and the prestige of the authors of recognised authority gave a bias to the commentary-form as the appropriate vehicle of this enterprise. In support of our position we may refer to Vācaspati Miśra who observes that the purpose of his writing the *Tātparyaṭīkā* was to give a smashing refutal of the charges and accusations

of the opponents and the pattern of the commentary was a convenient expedient.

About Udayana we may remark that he wrote in a style which is exasperatingly terse, laconic and elliptical and verges on obscurity. This is pre-eminently the characteristic of the NK. The views and doctrines which have been criticised by Udayana were sponsored by writers whose works have become obsolete. The result was that this work became a notorious scarecrow. It is a refreshing aspect of Indian scholarship and intellectual chivalry that difficulty and unintelligibility was regarded as a challenge which spurred the intellectual activities of scholars of all parts of India. Though there may be much that is common and familiar in the different commentaries, one cannot but notice the difference in approach and results. Besides, a dissertation on the classical texts of Udayana became a criterion of one's scholarship. This accounts for the large number of commentaries which have been written on the NK. and the *ATV*. They also give us an insight into the academic interests of the professors of the different parts of India. Viewed in this light the publication of these works will be found to provide new material for intellectual exercise and growth. The commentary-pattern was regarded in the past as the most respectable method of giving voice to new thoughts. There has been a change of fashion in modern times and there is a wide spread tendency to look askance at commentaries as parasitical appendages without any intrinsic and original value. We have already shown that this would be tantamount to employing a yardstick for measuring the depth of water.

I conclude with the hope that a student of Indian philosophy who will study this critique of the speculations on God, which is an inevitable and eternal problem of philosophy, will have no ground for complaint on the paucity of helpful literature for the study of Udayana's present work which is undoubtedly one of the outstanding works on the problem. The knowledge of Nyāya philosophy and for that matter Indian philosophy will be liable to be convicted of inadequacy and imperfection unless it is reinforced by the study of this

difficult classic. The difficulty of the book acted as a challenge and provocation in the past and we trust that the present generation of students of philosophy would accept this challenge with the same chivalrous spirit and not yield to defeatism or counsel of despair, which has been responsible for the popularity of compendiums among the students and Professors of *Tols*. The natural consequence of this pursuit of the line of least resistance was a deterioration of the academic standard, which we hope will become a forgotten chapter of the history of Sanskrit scholarship from now.

Asutosh Building,
Calcutta University,
September, 14, 1953.

SATKARI MOOKERJEE.

PREFACE

The present edition of Udayanācārya's *Nyāyakusumāñjali*, in prose and verse, is being published with Śaṅkara Miśra's commentary '*Āmoda*' and Guṇānanda Vidyāvāgīśa's commentary '*Viveka*' or '*Tātparyaviveka*'. The whole work composed of the text and the commentaries has been edited from the following manuscripts :

1. The text of Udayana has been taken from the printed edition of MM. Candrakānta Tarkālaṅkāra (Asiatic Society) and the Chowkhamba Sanskrit Series, Banaras.

2. The '*Āmoda*' commentary of Śaṅkara Miśra has been taken from a Transcript copy (Calcutta University) of a manuscript belonging to Banaras Sanskrit College. This contains the complete work of Śaṅkara Miśra, from the very beginning to the end.

3. The '*Viveka* or '*Tātparyaviveka* commentary of Guṇānanda Vidyāvāgīśa, has been taken from (*i*) the Banaras Sanskrit College (Saraswati Bhawan) Ms. marked as B, No. 40 of No. 20 of Nyaya Sastra, Fols. 105 (1-88, 78-94), up to Kārikā 5 of Chapter V, in Bengali characters (V. p. 64 ed. Chss. Banaras-

ननु [illegible]

[illegible])

and (*ii*) the Calcutta Asiatic Society Ms., marked as A, Indian Museum Collection, No. 6, Fols. 2-244 (1st and last Fols. missing), up to Kārikā 19 of Chap. V, in Nāgara characters. The folio marks of the Saraswati Bhawan Ms. have been noted in this printed work.

It was in 1940 that the idea of publishing the complete text of Udayana with the above two hitherto unpublished commentaries was first conceived by me, and I was encouraged in the matter by MM. Vidhushekhara Bhattacharyya, the then Asutosh Professor and Head of the Department of Sanskrit, Calcutta University, who requested me to edit the work in the Asutosh Sanskrit Series and I was very glad to join this Series as an editor of the present work, as desired by him. Thus, in connection with this work, I am specially indebted firstly to MM. Bhattacharyya, who procured the Transcript

Copy of Śaṅkara Miśra's *Āmoda* and Guṇānanda Vidyāvāgiśa's *Viveka* or *Tātparyaviveka* from the Banaras Sanskrit College for me on my request. But the editing was delayed for want of another manuscript of Guṇānanda's commentary till 1946, when a copy of the same was discovered by me in the Indian Museum Collection of the Asiatic Society, Calcutta, in the discovery of which I was materially helped by Sri Anantalal Thakur, M.A., then a Research Scholar of the Calcutta University. Then the work was fully edited and sent to the Metropolitan Printing and Publishing House, Ltd., for printing. The above House printed the first chapter only of the work and returned the remaining portion of the manuscript for certain unavoidable circumstances. The remaining portion of the work is being printed in the Calcutta University Press. The types used by the Metropolitan Printing and Publishing House, Ltd., are wanting in the Calcutta University Press. Thus, two different sets of types will at last complete the work. Hence, it has been proposed to publish the work in two different parts, Part I comprising Chapter I, as printed by the Metropolitan Printing and Publishing House, Ltd., and Part II comprising the remaining portion, as is being printed in the Calcutta University Press. Moreover, Chapter I of the work, being prescribed for the M.A. Examination is in great demand. Thus, for the benefit of the students this is published in advance, as No. IV, Part I of the Asutosh Sanskrit Series, Calcutta University.

The readers are referred to my introduction already published with my edition of *Kusumāñjali-kārikā* (A. S. S., No. 2) dealing with historical and philosophical points of Udayana's work of this text and its commentaries.

In connection with the work, I am indebted to MM. Yogendranath Tarka-Sankhya-Vedantatirtha, my revered teacher, for giving me valuable suggestions in course of reading the proofs of a portion of the work with him, and Dr. Satkari Mookerjee, M.A., Ph.D., Asutosh Professor and Head of the Department of Sanskrit, the General Editor of the Asutosh Sanskrit Series, for writing an excellent Foreword and taking a special interest in my work. I offer my best thanks to both of them. My thanks are also due to Prof. Anantalal Thakur, M.A., and Pt. Umapada Bhattacharya, Panchatirtha, for materially helping me in preparing the press copy of the work.

In publishing the volume, with a heavy heart and deep gratitude, I offer my humble tribute to the sacred memory of the late Dr. Syamaprasad Mookerjee, M.A., LL.D., D.Litt., Barrister-at-Law, M.P., the then President, Council of Post-Graduate Teaching in Arts, Calcutta University, who kindly gave me an opportunity for serving this University, and encouraged me in my research activities, but to my grim disappointment and great misfortune, I could not place this volume in his hand for his untimely and tragic death, only last week. May his soul rest in peace in communion with the Eternal Bliss of the Absolute.

To conclude, I shall be failing in my duty if I do not express my heartiest thanks to Justice Sri Ramaprasad Mookerjee, M.A., LL.B., the then President, Sanskrit Publication Committee, Calcutta University, for his taking a keen interest in the work of the Series, but for whose interest, the work could not have seen the light of day.

SENATE HOUSE,
CALCUTTA,
30th June, 1953.

NARENDRACHANDRA BHATTACHARYA.

प्रथमः स्तवकः

सत्पक्षप्रसरः सतां परिमलप्रोद्बोधबद्धोत्सवो
विम्लानो न विमर्दनेऽमृतरसप्रस्यन्दमाध्वीकभूः ।
ईशस्यैष निवेशितः पदयुगे भृङ्गायमाणं भ्रम-
च्चेतो मे रमयत्वविघ्नमनघो न्यायप्रसूनाञ्जलिः ॥१॥

आमोदैः परितोषिताः परिषदः प्रत्येकमाशाभृतां 5
सान्द्रैः पिञ्जरिताः परागपटलैराशावकाशा वश ।
आहूता मकरन्दबिन्दुनिकरैः पुष्पन्धयश्रेणयो
ये[1]नाकारि[?] स वः पुनातु नटतः शम्भोः प्रसूनाञ्जलिः ॥

प्रेक्षावत्प्रवृत्यङ्गमभिधेयसम्बन्धमभिदधान एवेष्टदेवताकीर्तनरूपमङ्गलमाचरन्नाह—**सत्पक्षेति**। एष ममानघन्यायप्रसूनाञ्जलिः सतां मुमुक्षूणां सुधियां वा चेतो 10 रमयतु सुखयतु दुःखनिदानहीनं करोतु । अनघो निर्दोषः । न्यायः पञ्चरूपोपेतलिङ्ग-प्रतिपादकं वाक्यजातं तादृशवाक्यप्रतिपाद्यं लिङ्गजातञ्च, नीयतेऽभिमतसिद्धिरनेनेति योगबलात् । तदेवाह्लादकत्वात् प्रसूनं, तेषामेव बहूनामञ्जलिरिवाञ्जलिः समूहः । अनघत्वमेवाह—**सदिति**। सति प्रामाणिके पक्षे प्रसरः प्रकृष्टं ज्ञानं प्रमारूपं यस्मात् यस्य वा, तेनाश्रयासिद्धिभागासिद्धिस्वरूपासिद्धिसिद्धसाधनानां निरासः । 15

[1b]

नमः कर्मण्यधिष्ठात्रे[2] वेदप्रामाण्यहेतवे ।
निरस्ताखिलबाधाय प्रमात्रे विश्वकर्मणे ॥
गुणानन्देन विदुषा विचार्य प्रतिपङ्क्तिकम् ।
विविच्यन्ते प्रयत्नेन कुसुमाञ्जलिकारिकाः ॥

प्रारिप्सितविघ्नापनुत्तयेऽनुष्ठितं मङ्गलं शिष्यशिक्षायै व्याख्यातृश्रोतॄणामनुषङ्गतो 20 मङ्गलसमाप्तये च निबध्नन् प्रयोजनाभिधेयसम्बन्धानाह—**सदिति**। एष कुसुमाञ्जलिर्मम चेतो रमयतु, इष्टफलेन योजयतु, ईशस्य पदयुगे रमयतु, तच्चिन्तैकपरीकरोत्विति वा ।

परे तु मे *मत्कर्तृको न्यायप्रसूनाञ्जलिः सतां मुमुक्षूणां सुधियां वा चेतो रमयतु* सुखयत्विति योजयन्ति । अनघत्वं शब्ददोषरहितत्वं, विषयशुद्धेः पूर्वार्धेनैवाभिहितत्वादिति **प्रकाशः ।** अनघो निर्दोषः । पूर्वार्धं[र्धे ?] तु यावद्विशेषदोषबाधबोधनद्वारा सामान्या- 25

1 'येनाकारि' इति पाठो युक्तः । 2 कर्मणि for कर्मणः allowable.

न्यायस्यासिद्धिव्यभिचारविरोधान् परिहर्तुमाह—**परिमलेति**। सतां परिमल-
प्रोद्बोधेन ख्यातिनिश्चयेन बद्ध उत्पादित उल्लासो येन स तथा। असत्-
प्रतिपक्षितत्वमाह—**विम्लान** इति। समबलत्वाभिमतोपस्थाने न विम्लानः न
हीनबलः। न्यायस्य प्रयोजनमाह—**अमृतेति**। अमृतं मोक्षस्तस्य रसोऽभिलाष-
स्तदर्थोनेच्छाविषये मोक्षोपाये निदिध्यासने साक्षात्कारे च प्रणिधानं प्रस्यन्दः स एव
माध्वीकं तस्य भृङ्गप्रवृत्तिस्थानम्। [यद्वा ?] अमृतरसो रस्यमानममृतम् "कृदभिहितो
भावो द्रव्यवत् प्रकाशते" इति न्यायात्। तदेव प्रस्यन्द उत्पत्तिस्तदेव माध्वीकं
तस्य भृङ्गप्रवृत्तिस्थानम्। एतस्मान्न्यायान्मनने सति मुक्तिरिति भवति प्रयोजनवान्
न्यायः। अमृतं मोक्षस्तस्य रस इच्छा तस्य प्रस्यन्द उत्तरोत्तरानुवृत्तिस्तदेव माध्वीकं
तस्य **भृङ्गस्थल्यः**। भवति हि यथा यथा सन्निहितोपायप्राप्तिस्तथा तथा फलोत्-
कण्ठोद्रेक इति नैयायिकाशयः। न्यायान्मनने सति संक[शङ्क ?]मुक्तानिवृत्तौ
निर्भरं निदिध्यासनादाव[?]सक्तो न्यायप्रयोजनं, फलेच्छाया उपायेच्छां प्रति
हेतुत्वात्। **ईशस्येति**। ईशः कर्ता तस्य पदयुगं स्थानद्वयं जीवात्मस्वरूपं
परमात्मस्वरूपं च, तत्र निवेशितः, तत्साधनाय प्रयुक्तः "द्वे ब्रह्मणी वेदितव्ये"
भावनोत्पादकमिति **केचित्**। तन्न, शब्दब्रह्मादिलक्षणस्य तावताप्यलाभात्। न्याय-
पदार्थमर्यादया तल्लाभे तु पूर्वार्धवैयर्थ्यात्। **परे** तु भगवद्विषयतया पावनाधिकत्वेन
न्यायमित्याहुः। 'न्यायः' इति[illegible]पूर्वकप्रतिज्ञादिपञ्चकं, 'नीयते प्राप्यते विवक्षितार्थ-
सिद्धिरनेने'ति [illegible] यदि भण्यते तदा योगरूढिरेव। स
[illegible]। वदति "तां कुसुमाञ्जलिः पुनाति" इति विन्यासविशेषविशिष्टो
[illegible] प्रसूनमिति समासः। वर्णं पुष्पितमित्यादौ
[illegible] यथा [illegible]। अतएव च "वीर्येण
[illegible]" इत्यादि वदन्ति। 'अविम्लान'मिति क्रियाविशेषणम्, इतरत्सर्वादिविशे-
षणिइत्यत्र [illegible]माह—**ईशस्य पदयुगे निवेशित** इति। 'ईशो'
[illegible] ज्ञानकरणं तद्युगं प्रमाणतर्कात्मकम्,
[illegible], तत्र निवेशितस्तत्[illegible] प्रतिपादितत्वेन। पदपदस्य
[illegible]तु पदयुगम् अन्वयव्यतिरेकानुविधायि[illegible], तत्र निवेशित इत्यस्य निवेशनं प्रति
[illegible] "[illegible]" इतिवत् कर्मसंयोगाद्वा निति[2a][illegible]

1 See NVT, p. 36 (?). 2 '[illegible]' [illegible]।

इति **श्रुतेः**। पद्यतेऽनेनेति पदं प्रमाणं, तद्युगमनुमानागमरूपं वा,
संवादार्थमागमस्यापि दर्शनीयत्वात्। तर्कानुमानरूपं वा पदयुगम्। अन्वयव्यति-
रेक्यनुमानरूपं वा। वेदकर्तृत्वक्षितिकर्तृत्वानुमानद्वयरूपं वा। चरमलिङ्गपरामर्शानु-
मितिरूपं वा पदयुगं, ज्ञानद्वयम्। तदर्थं निवेशितः प्रतिज्ञाद्यानुपूर्व्या प्रयुक्तः।
निमित्तसप्तम्याः प्रयोगः। **भृङ्गायमाणमिति**। भृङ्ग इव आत्मानमाचरन्। यथा 5
कुसुमलुब्धो भृङ्गस्तथा न्यायलुब्धं चेतः। अत एव भ्रमन् मोक्षोपायं न्यायमनुसरन्।

तद्गुणनिमित्त इति **प्रकाशः**। मकरन्दपानकर्मणि योग्यताप्रदर्शनाय चेतो विशिनष्टि—
भृङ्गायमाणमिति। भृङ्गो यथा मधुरसे सौरभे मकरन्दे वा सरागस्तथा न्याय-
प्रसूनाञ्जलेः फले सरागमित्यर्थः। अत एव भ्रमत् इष्टफलोपायं न्यायप्रसूनाञ्जलिमनुसरत्।
अन्यथा तु तदाह्लादकत्वं नोपपद्यत एवेति भावः। 10

अर्थदोषराहित्यमाह—**सत्पक्षे**ति। सति पक्षतावच्छेदकविशिष्टे पक्षे सिद्धा-
भावविशिष्टपक्षे। प्रकृष्टः सरः पक्षतावच्छेदकावच्छेदेन अनभिमतं यज्ज्ञानं साध्यस्य
हेतोर्वा यस्मात् स तथा। एतेनाश्रयासिद्धिसिद्धसाधनांशतो भागासिद्धिबाध-
स्वरूपासिद्धयो निरस्ताः। सतां साधूनाम्, ईश्वरसिद्धिविषयिणां तत्सिद्धिना भयादेव
नोदय इति भावः, पक्षसंकुचनादिति तु **प्रकाशः**। परि सर्वतः कार्त्स्न्येन सरः 15
सञ्चारः साध्यतावच्छेदकविशिष्ट साध्यतावच्छेदकानवच्छिन्नसामानाधिकरण्यरूपः, तस्य सः
प्रकृष्टः प्रमात्वबोधः, तत् उत्कृष्टः अप्रामाण्यशङ्काशून्यः बोधः। बाधनिश्चयसंशयान्यत्वं
वा उत्कर्षः तेन सरः स्थिरीकृत उत्सरः तुल्यगन्तारो येन स तथा, बोधे बन्धे उत्सवे वा
सतामित्यस्यान्वयो नित्यसापेक्षत्वादिति। एतेन साध्यसाधनाप्रसिद्धिव्यभिचारविरोधानां
निरासः। सत्प्रतिपक्षितत्वनिरासार्थमाह—**विम्लान** इत्यादि। विमर्दने प्रतिहेतुपरामर्शे 20
सति यो विम्लानः प्रकृतकार्यानुपधायकस्तदन्यः। ईश्वरपदयुगे निवेशितस्यापि
न्यायरूपकुसुमाञ्जलेः प्रयोजनसम्बन्धज्ञानं विना नाह्लादकत्वप्रतिपत्तिरिति तदर्थं तमाह—
अमृतेति। अमृतं मोक्षः स एव रसः द्रवः, विशेषणविशेष्यभावस्य कामचारादित्थ-
मभिधानम्। "कृदभिहित" इति न्यायेन रस्यमानममृतमिति तु **प्रकाशः**। तस्य
प्रस्यन्दः उत्पत्तिः असम्बन्धसम्बन्धोपहितत्वगुणयोगात् गौण्या वृत्त्या स एव माध्वीकम् 25
अत्राप्युत्कटत्वगुणयोगस्तस्य भूः स्थानम्। वस्तुतस्तु विप्रतिपत्तिपञ्चकस्य वक्ष्यमाणस्य
विरोधीनि पञ्च विशेषणानि। प्रथमया आश्रयासिद्धिर्वक्ष्यते, तद्विरोधि 'सत्प[2b]क्षप्रसर'
इति। द्वितीयया प्रमायां गुणजन्यत्वाभाव उक्तः। तत्र सतां वेदप्रामाण्याभ्युपगन्तॄणां
गुणजन्यतया तद्व्यवस्थापनेन च तेषां हर्षः। तृतीयया बाधः, निरसनं तृतीयेन। चतुर्थ्या
नित्यज्ञानस्य प्रमात्वनिरसनम्। तत्रामृतेति अमृतौ नित्यौ रसप्रस्यन्दौ ताविष्टफलकतया 30

स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः ।
यदुपास्तिमसावत्र परमात्मा निरूप्यते ॥२॥

[illegible] ॥१॥

न्यायविदं विविच्य दर्शयति — स्वर्गेति । स्वर्गेति [illegible] उपास्तिम् उपासनाम् ।

[illegible]

[illegible] कश्चित् । [illegible]

[illegible] ॥२॥

[illegible] स्वर्गेति । [illegible]

[illegible]

"तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" "द्वे ब्रह्मणी वेदितव्ये" इत्यादि**श्रुतिभ्यां** परमात्मवेदनस्यापि साक्षाद्वा स्वात्मगोचरसाक्षात्कारद्वारा वा मोक्षहेतुत्वात् तन्निरूपणमपि सफलमिति भावः ॥२॥

स्वर्गाभिन्नयोरपवर्गयोर्जीवन्मुक्तिपरममुक्तयोर्मार्गमुपायं यदुपास्ति यस्योपासनां ध्यानमामनन्ति उपगच्छन्ति कथयन्तीति **केचित्**। यद्यपि "ण्यासश्रन्थो युजि"ति विशेषवचनादासधातो- 5 रासनेत्येव भवति, तथाप्यसु क्षेपण इत्यसुधातोरेवायं प्रयोगः समर्थनीयः, धातूनामनेकार्थ- त्वात्। अतएव "लावण्य उत्पाद्य इवास यत्नः" इत्यादयः प्रयोगास्तेनैव धातुना **वामनेन** समर्थिताः। अतएव "उपसर्गेण धात्वर्थो बलादन्यत्र नीयते" इति तदभियुक्ताः। **परे** तु बहुलवचनात् क्वचिदपवादविषये उत्सर्गस्यापि प्रवृत्तेरासधातोरेव क्तिन्प्रत्ययमाहुः। **प्रकाश**कृतस्तु धातुस्वरूपवाचिनस्तिपो निर्देश इत्याहुः। 10 धातुत्वेन रूपेण तिपः शक्तिः, तत्समभिव्याहृतधातोश्च स्वरूपे लक्षणा, तेनासधातुरिति प्रतीतिः, तिपो धातुत्वमात्रे शक्तौ तु प्रकृतिलक्षणार्थकधातुविशेष्यको धातुत्वविधेयक एव बोधः। अर्थवत्प्रत्ययान्तसमभिव्याहृतसुबर्थस्यापि कृत्प्रत्ययप्रकृत्यर्थेऽन्वयः। इष्टसाधनत्वशक्तभावविहिततव्याद्यन्तो दृष्टान्त इति नाव्युत्पत्तिः। यद्वा धातुना स्वार्थोपस्थितौ तदर्थप्रतिपादकधातुत्वेनैव बोधः। 'व्यक्तिवचन'न्यायेन सर्वनाम्नि 15 बुद्धिस्थत्ववत् स्वप्रकृतित्वस्य नियामकतया वा नातिप्रसङ्गः। इत्थञ्च उपासधातुप्रतिपत्तौ शब्द[तच्छक्ति ?]सम्बन्धेन तदर्थलक्षणा द्विरेफपदवत्। न च तत्तत्कारकविहितप्रत्ययानां कारकान्तरेऽसाधुत्ववत् तिपोऽप्यर्थान्तरे तथात्वमिति वाच्यम्; तिपोऽर्थान्तरे तथात्वेऽपि प्रकृत्यर्थे तदभावात्। अत एव "ईक्षतेर्नाशब्दम्" ब्रह्म[?]ति* **वेदान्तसूत्रम्**। "आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते" इति **कात्यायनः**। "यजतिषु येयजामहं 20 कुर्यादि"ति **श्रुतिः**। एवं प्रयोगा भूरिशोऽनुसन्धेया इति। मनीषिणो वेदयुक्तिविदः। अतः परमात्मा निरूप्यते मननव्यापारविषयीक्रियते।

अयम्भावः—"द्वे ब्रह्मणी वेदितव्ये" परञ्चापरमेव चे[?]त्यत्र ईश्वरवेदनस्य मोक्षहेतुत्वं श्रूयते। तच्च वेदनं साक्षात्काररूपं जीवात्मसाहचर्यात्(?)। इत्थञ्च "आत्मा वा अरे द्रष्टव्यः" इत्यत्रापि आत्मपदं जीवात्मेश्वरोभयपरं स्वावृत्तिप्रागभावाप्रतियोगिज्ञानवत्त्वेनैवोप- 25 स्थापनात्, [3b]सामान्यशब्दस्य विशेषपरत्वं वा। तथा च तत्रापि मननविधेरीश्वरमननमपि मोक्षहेतुरिति [तत्-]साक्षात्कारः साक्षादन्तःकरणशुद्धिद्वारा आत्मसाक्षात्कारोपयोगितया वोपयुज्यत इत्यन्यदेतत्। **परे** तु "तमेव विदित्वाऽतिमृत्युमेती"तीश्वरमुपक्रम्य श्रवणात् तन्मात्रसाक्षात्कारो मोक्षहेतुरित्याहुः। **प्राचां** नये तु 'तं विदित्वैवे'ति योजना ध्येया ॥२॥

---

* "ब्रह्म" is some reader's note, *wrongly put into text by next Copyist.*

इह यद्यपि यं कमपि पुरुषार्थमर्थयमानाः, शुद्धबुद्धस्वभाव इत्यौपनिषदाः,

---

धर्मिणि संशयाभावेऽपि मननानुकूलन्यायपूर्वाङ्गसंशयमुपपादयन्नाह—

इह **यद्यपी**ति। इह न्यायेन निरूपणे कर्तव्ये संशयो नास्त्येव। तथा च किं निरूपणीयं, कुत्र न्यायः प्रवर्तनीय इत्यन्वयः। अत्र यद्यप्येवमुपासते तथापि
5 सन्देह एव प्रकारभेदादिति शेषः। यद्वा संशय एव संशये सत्येव किं निरूपणीयमिति कुत इत्यन्वयः। संशयस्तु नानाप्रकारेणैव श्रुतिभ्यः श्रवणात्, कुत्र तात्पर्यमित्यनिर्णयात्, प्रामाण्यसन्देहाद्वा, मध्यस्थादिवदाहार्य एव वा। शुद्धः केवलः। बुद्धः स्वप्रकाशबोधात्मकः। उ[औ ?]पनिषदा वेदान्तिनः।

मननोपायन्यायपूर्वाङ्गसंशयमुपपादयन्नाह—

इहेत्यादि। यद्यपि तेन तेन रूपेण ते च ईश्वरमुपासत इति धर्मिणि
10 न विप्रतिपत्तिः, तथापि तत्तदभ्युपगतस्य कस्यचिदस्मदनभ्युपगतस्य धर्मस्य सम्भवात् 'श्रवणानन्तरागते'त्यनेन च इह न्यायेन निरूपणे कर्तव्ये भगवति तस्मिन् प्रसिद्धानुभावेऽपि तेन तेन रूपेण विप्रतिपत्त्या सन्देह एव सन्देहोऽस्त्येवेति, न्यायेन किं निरूपणीयमिति कुतः पूर्वपक्ष इति योजना। यद्वा येन येन रूपेण ते ते तमुपासते इत्युक्तं तस्य तत्रास्माभिरभ्युपगमात् उभयवादिसिद्धतया विप्रतिपत्त्यभावात् तेन तेन रूपेण
15 संशयः कुतः, किं निरूपणीयं, कथं न्यायः प्रवर्ततामित्याक्षेपे **तथापी**ति। उभयवाद्यसिद्धधर्मान्तरेण विप्रतिपत्त्या न्यायाङ्गकं मननं स्यादेवेति भावः। अथवा उक्त एव आक्षेपे तथापीत्यनेन पक्षताया एव मननोपयोगितया संशयाभावेऽपि न क्षतिः। श्रवणानन्तरं मोक्षोपायत्वेन विहिता इत्यर्थकेन तादृशफलरूपेष्टसाधनताज्ञानाधीनचिकीर्षाविषयत्वबोधनात्, अन्यथा तेनैव रूपेण श्रवणात्मकसिद्धेरेव सत्त्वात्
20 मननं दुरुपपादमेव स्यादिति भावः। कमपि मुख्यं गौणं वा पुरुषार्थं फलमर्थयमाना इच्छन्तो यमुपासते। येन रूपेण, के तथा इत्याकाङ्क्षायामाह—**शुद्धे**त्यादि। शुद्ध एको निरंशो वा। बुद्धः स्वप्रकाशज्ञानात्मकः जन्यज्ञानवदन्यो वा। औपनिषदा

आदिविद्वान् सिद्ध इति कापिलाः, क्लेशकर्मविपाकाशयैरपरामृष्टो निर्माणकायमधिष्ठाय संप्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः, लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपताः, शिव इति शैवाः, पुरुषोत्तम इति वैष्णवाः, पितामह इति पौराणिकाः, यज्ञपुरुष इति याज्ञिकाः, सर्वज्ञ इति सौगताः, निरावरण इति दिगम्बराः,

---

आदीति। आदौ सर्गादौ विद्वान् चेतनः, न तु चेतनच्छायया प्रकृत्यादिवच्चेतनः। सिद्धः कूटस्थनित्यः। **कापिलाः सांख्याः। क्लेशे**ति। अविद्याऽस्मितारागद्वेषाभिनिवेशाः क्लेशाः। अस्मिताऽहङ्कारः। अभिनिवेशो मरणभयम्। कर्म यागहिंसादि। विपाको जात्यायुर्भोगादिः। फलपर्यन्तमाशेत इत्याशयो धर्मोऽधर्म[श्च ?], एतैरपरामृष्टः। निर्माणकायो वेदनिर्माणार्थं कायः, तदधिष्ठानं तदुपग्रहः। सम्प्रदायो वेदः, तस्य नित्यत्वात् प्रद्योतकः प्रवर्तक इत्यर्थः। अर्थ[नु ?]- ग्राहकश्च घटादिनिर्माणोपदेष्टा। लोकविरुद्धैर्विषभक्षणविषधरधारणादिभिर्वेदविरुद्धैर्ब्रह्मवधादिभिर्निर्लेपो दृष्टादृष्टदोषशून्यः। स्वतन्त्रः परमाणु[णू?]दृष्टादिसाहित्यमन्तरेणापि जगत्कर्ता। पाशुपता महाव्रतीयाः। सर [शिव ?] इति 'प्रमहसि पदे निस्त्रैगुण्ये' वर्तमानः। पुरुषोत्तमो नित्यसर्वज्ञत्वादिभिः। पितामहो जनकस्यापि जनकः। यज्ञपुरुषो यज्ञे प्राधान्येन इज्यः। सर्वज्ञः क्षणिकसर्वज्ञः। निरावरणो

उपनिषदर्थविवेचका वेदान्तिनः। **आदी**ति। आदौ सर्गादौ विद्वान् निखिलवेदार्थज्ञानवान्। सिद्धो योगसमात्सम्पादिताऽणिमादिसिद्धिः। **कापिलाः सांख्याः। क्लेशे**ति। अविद्याऽस्मितारागद्वेषाभिनिवेशाः। अविद्या अज्ञानमनादिर्विनाशी भावः, अस्मिताऽहङ्का[4a]रोऽन्तःकरणविशेषः, अभिनिवेशो मरणभयं, कर्म यागहिंसादि विहित निषिद्धरूपं, विपाको जात्यायुर्भोगादिः। तत्र जातिर्जन्म, फलपर्यन्तमाशेत इत्याशयो धर्माधर्मरूपः, तैरपरामृष्टोऽसम्बद्धः। निर्माणकायं वेदाभिव्यञ्जनघटादिकरणशिक्षार्थञ्च कायव्यूहमधिष्ठाय उपगृह्य, सम्प्रदायो गुरुणा शिष्याय सम्प्रदीयत इति व्युत्पत्त्या वेदस्तस्य प्रद्योतकः व्यञ्जकः, नित्यत्वेन तस्य कारकत्वाभावात्। अनुग्राहको घटादिनिर्माणे शिक्षकः। लोकवेदविरुद्धैर्विषपानब्रह्मशिरश्छेदादिभिर्यो लेपः पापनिष्ठकारणतानिरूपकं तच्च रूपं दुःखं तच्छून्यः, दृष्टादृष्टदोषरहित इति वा। स्वतन्त्रो जगत्कर्ता। शिवः सत्त्वरजस्तमोलक्षणगुणत्रयातीतः। पुरुषोत्तमः पुरुषेषु पुरुषेभ्यो वा उत्तमः। पितामहो जनकस्यापि जनकः। यज्ञपुरुषः प्राधान्येनेज्यः, यज्ञात्मक एव भगवदवतारविशेषोऽस्ति तच्छरीराधिष्ठित इति वा। सर्वज्ञः क्षणिकसर्वज्ञः। तेन नैयायिकवैलक्षण्यम्, उभयसाधारण्ये तु यथाश्रुतमेव। आवरणमावरकशक्तिमती अविद्या,

उपास्यत्वेन देशित इति मीमांसकाः, लोकव्यवहारसिद्ध इति चार्वाकाः, यावदुक्तोपपन्न इति नैयायिकाः, किं बहुना, कारवोऽपि यं विश्वकर्मेत्युपासते. तस्मिन्नेवं जातिगोत्रप्रवरचरणकुलधर्मादिवदासंसारं प्रसिद्धानुभावे भगवति भवे सन्देह एव कुतः ? किं निरूपणीयम् ? तथापि—

---

5 निराकारः, निष्पापो वा। उपास्यत्वेन देशितो विधिबोधितमन्त्रमय इत्यर्थः। लोकव्यवहारसिद्ध इति प्रतिमाद्याकार इत्यर्थः। यावद्भिरुक्तैरुपपन्नो यावद्भिरुक्तेऽप्युपपन्नैरुक्तैरुपपन्नो वा मध्यपदलोपी समासः। सामान्ये संशयाभावेऽपि विशेषमादाय संशयमुपपादयन्नाह—विश्वं कार्यजातं कर्म यस्य विश्वकर्मा। जाति ब्राह्मणत्वादिः। गोत्रं काश्यपादि। प्रवराश्च्यवनादयः। चरणं वेदभागः। अनुभावोऽसाधारणं
10 कार्यं क्षित्यादि। [भवत्य ?]स्मादिति भवः। तथा चेश्वरकर्तृकतया क्षित्यादिकार्ये श्रुतेऽपि ईश्वर एकोऽनेको वा, स्वतन्त्रः परतन्त्रो वा, शरीरी अशरीरी वा इत्यादयः सन्देहाः सन्त्येव। यद्यपि सर्वे धर्मा वेदे श्रुतास्तथापि तात्पर्यसन्देहात् प्रामाण्यसन्देहाद्वा सन्देह इति प्रागुक्तम्।

स्वादृष्टोपार्जितश्च शरीरं पापमात्रं वा। उपास्यत्वेन दि[दे?]शितो देशनाविशिष्टः कश्चित्।
15 लोकव्यवहारसिद्धः चतुर्भुजादिशरीरं तादृशी प्रतिमेति केचित्। उक्तेषु मध्ये यावन्तो धर्मा उपपन्ना युक्तिसिद्धास्तैरुपपन्नः। यद्वा तेषु मध्ये ये ये उपपन्ना युक्तिसिद्धास्ते यत्रेति वा। पूर्वेषां न्यायाविरुद्धधर्मपरत्वे तु यथाश्रुतमेव व्याख्यः। अतिप्रसिद्धार्थमाह—किं बहुनेति। कारवः शिल्पिनः, विश्वकर्मा विश्वं कार्यजातं कर्म कार्यं यस्य स तथा, उपासते ध्यानपूजानमस्कारादिनानाविधव्यापारविषयतां प्रापयन्ति, मननविषयीकुर्वन्तीति तु
20 कारुपक्षेऽसम्भवादुपेक्षितम्। ननु ये ये त्वयोक्तास्ततोऽन्ये विप्रतिपन्नाः स्थास्यन्ति, तत्र च संशयो नानुपपन्न इत्यत आह एवमिति। तथा च नास्त्येव[1] तादृशः कश्चिद् योऽत्र विप्रतिपन्न इति भावः। एवं विभक्तेष्विव, जातिर्ब्राह्मणत्वादिः, गोत्र[4b]प्रवरौ काश्यपादि, चरणं वेदस्य शाखाः कठादयः, कुलधर्मः स्ववंशानतिक्रमेण तत्तत्काले संस्कारः। अतएव "चूडा कार्या यथाकुलमि"ति स्मृतिः। आसंसारं संसार-
25 मभिव्याप्य प्रसिद्धानुभावे प्रसिद्धोऽनुभावः क्षित्यादिलक्षणं कार्यं यस्य यस्मिन् वा, तेनैवं प्रसिद्धं सप्रमाणयति—भव इति। भवत्यस्मादिति भवः, भवत्वेन प्रसिद्धिरेव तत्प्रसिद्धिरिति भावः।

---

1 The Mss. have '[illegible]' between नास्त्येव and तादृशः.

2 See p. 6.

न्यायचर्चेयमीशस्य मननव्यपदेशभाक् ।
उपासनैव क्रियते श्रवणानन्तरागता ॥३॥

श्रुतो हि भगवान् बहुशः श्रुतिस्मृतीतिहासपुराणेष्विदानीं मन्तव्यो भवति ।

ननु अपवर्गोपायश्च उपासना, तदा न्यायचर्चा मननं वा किमर्थमत आह—**न्यायेति** । उपासनान्यायचर्चामनननामिहैकात्मतैव विवक्षिता, तथा च यदुपास्तिमपवर्गोपायमामनन्ति स निरूप्यते । उपासनैव क्रियत इति न्यायचर्चाया मननात्मिकायाश्च कोऽयमवसर इत्यत आह—**श्रवणे**ति । श्रवणानन्तरपरिप्राप्तेत्यर्थः । मननस्य श्रवणानन्तर्यं चेत् तदा श्रवणमेव न जातमस्तीति पुनः स एवानवसर इत्यत आह—**श्रुतो ही**ति । स्मृत्यादीनां संवादार्थमुपादानम् । "श्रोतव्यः श्रुतिवाक्येभ्यः" इत्यत्र श्रुतितः श्रवणस्य विहितत्वात् । अन्यथा शूद्रादीनामप्यधिकारापत्तेः । 'इदानीमि'ति मननावसर इत्यर्थः । **मन्तव्य** इति मननात्मक-प्रतिपत्तिविषयीकर्तव्य

ननूपासना फलवतीत्युक्तं, तावतापि मननोपयोगिनो न्यायस्य न फलसम्बन्ध इत्यत आह—**न्यायचर्चे**ति । न्यायेन चर्चाऽनुमितिरूपा या क्रियते सा उपासनैव, तथा च नार्थान्तरमिति भावः । तस्यास्तत्त्वे मानमाह—**मननव्यपदेशभागि**ति । मननस्य च तत्त्वं सुप्रसिद्धमिति हृदयम् ।

ननु मननव्यपदेशभाज उपासनात्वेन प्रसिद्धावपि तादृग्रूपायास्तस्याः फलसम्बन्धे किं मानमित्याकाङ्क्षायामाह—**श्रवणानन्तरे**ति । श्रवणानन्तरं 'श्रोतव्य' इत्यनन्तरमागता 'मन्तव्य' इति विधिना विहिता । तथा च स एव विधिरत्र मानमिति भावः । इत्थञ्च पाठिकक्रमेणानुष्ठेयक्रमोऽपि ध्वनितः ।

ननु श्रवणानन्तरमेव तदनुष्ठेयमिति नायं तस्यावसर इत्यत्राह—

श्रुतो हीति । हि हेतौ, अवधारणे वा । स्मृत्यादीनां सम्पातायातमुपादानमिति बहवः । **मिश्रा**स्तु यद्यपि 'श्रोतव्यः श्रुतिवाक्येभ्यः' इत्यस्ति, तथापि तत्र श्रुतिपदं प्रमाणशब्दमात्रपरम्, अन्यथा नियमादृष्टकल्पनापत्तेः । नन्वेवं गौरवज्ञानात् पदार्थत्यागे विद्याप्रयुक्तिकल्पनाभिया रथकारे रूढित्यागापत्तिरिति चेन्न, अत्र प्रमाणशब्दस्य विशेष्यतया तदत्यागाद्विशिष्टविशेष्ये शक्तावपि तात्पर्यवशाच्छुद्धविशेष्यतावच्छेदकप्रकारेण बोधने लक्षणानुपगमात् । शक्तिमुख्यविशेष्यकशक्यतावच्छेदकघटकसाक्षात्प्रकारीभूतधर्मप्रकारकबोधस्यैव तादृशशक्तिधीप्रयोज्यत्वोपगमात् । अतएव बलवदनिष्टाननुबन्धित्वविशिष्टेष्ट-

'श्रोतव्यो मन्तव्य' इति **श्रुतेः**।

"आगमेनानुमानेन ध्यानाभ्यासरसेन च।
त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम्॥"

इति **स्मृतेश्च**।

5 तदिह संक्षेपतः पञ्चतयी विप्रतिपत्तिः। अलौकिकस्य परलोकसाधनस्याभावात्।

इत्यर्थः। श्रवणमननयोः नानाविकल्पैकविषयता, सा च धर्मिणि न तु प्रकारेऽपीति न सन्देहानुपपत्तिः।

श्रवणादीनां क्रमं कल्पयन्नाह—**आगमेनेति**। ध्यानं मननं [म] प्रकृतानेनेति यावत्। प्रज्ञां प्रतिपत्तिं प्रकल्पयन् उत्पादयन्, उत्तमो योग आत्मसाक्षात्-

10 काराव्यवहितपूर्ववर्त्यात्ममनःसंयोगः॥३॥

तदिहेति। सम्यक्प्रतिपत्तिजन्मा सन्देह एव तस्मादिह। पञ्चतयी विप्रतिपत्तिः ग्रन्थे निरस्यत इति शेषः। एतन्निरासादेव च **वेदान्त्यादि**विप्रतिपत्तयोऽपि निरस्ता भवन्तीति भावः। अत्र लघुत्वेऽपि पञ्चमी परलोकसाधनाभावं प्राप्य

साधनताकत्वविधिः देवतादौ शुद्धस्य साधनतापेक्षं विना [illegible]। अतएव च न प्रमाण-

15 भावत्वं [5a] विवक्षितम्, [illegible] तदभावे [illegible]

[illegible], [illegible]। अतएव [illegible] तत्प्रयोजकत्वे[1] नियमा-

[illegible]। [illegible] वेदान्तदेशिनस्त्वाहुः।

तत्तु 'श्रुतिवाक्येभ्यः' इत्यस्य श्रुतिसमानार्थकत्वस्य इत्यर्थः, अन्यथा वाक्यवर्थवर्त्तीत्यर्थ च स्मृत्यादिसमर्थकस्यापि तदर्थत्वमिति ध्येयम्।

20 ननु श्रवणानन्तरं मननमनुचितं, श्रवणाभिमतस्य सिद्धत्वेन प्रतिबन्धकाभावादित्यत आह—

श्रोतव्यो मन्तव्य इति। तथा च तदर्थनिश्चयसाधनतामात्रतया विप्रतिपत्तेः सम्भव इति भावः। 'ध्यानाभ्यासरसेन' निदिध्यासनानुकूलो व्यापारः, 'त्रिधा प्रकल्पयन्' इति त्रिविधसंस्कारजं जनयन्, 'उत्तमं' 'योगम्' आत्मसाक्षात्कारं लभते॥३॥

तदिति [illegible]। 'इह' ग्रन्थे [illegible] 'संक्षेपतः' [illegible]

25 'पञ्चतयी' पञ्चप्रकारा 'विप्रतिपत्तिः' विरोधेन प्रवृत्तिर्विवादजनिका [illegible]

प्रतिपत्तिः। तस्याः [illegible] विवृणोति— **अलौकिकस्येत्यादि**। तथा हि

[illegible]

[illegible]

[illegible]। तत्र [illegible]

---

1 B.—[illegible] 2 A.—[illegible] 3 A. [illegible] added. 4 B.—[illegible] 5 B. [illegible] omitted.

अन्यथापि परलोकसाधनानुष्ठानसंभवात्। तदभावावेदकप्रमाणसद्भावात्। सत्त्वेऽपि

विप्रतिपत्तिरित्यर्थः। एवमग्रेऽपि। वेदानाम् आप्तोक्तत्वाधीनं प्रामाण्यं यागादिगोचर-प्रवृत्तिप्रयोजकम्। आप्तश्चेश्वर इत्यनुपपन्नं नित्यनिर्दोषत्वादेव वेदप्रामाण्यसिद्धेरिति मीमांसकविप्रतिपत्तिमाह—**अन्यथापी**ति। नित्यनिर्दोषवेदप्रामाण्येऽपीत्यर्थः। क्षित्यादेः सकर्तृकत्वेन ईश्वरसाधने प्रत्यक्षादिप्रमाणबाध इत्याह— 5
तदभावावेदकेति। सन्नपीश्वरो न प्रमाणम्। तथा च कुतस्तदधीना प्रमा। कथञ्च तामन्तरेण क्षित्यादिकर्तृत्वं वेदवक्तृत्वं वा इत्याह—**सत्त्वेऽपी**ति। यद्वा

सिद्धिर्हेतुः, सा चालौकिकपरलोकस्य साधनाभावरूपैवेति तत्र घटकीभूतप्रत्येकाभावस्यापि तथात्वमिति कृत्वोक्तं **संक्षेपत** इति। तथा च तद्धेतुका विरुद्धा प्रतिपत्तिरिति फलति। एवमग्रेऽपि। वेदो वक्तृवाक्यार्थज्ञानजन्यः प्रमाणशब्दत्वादित्यनुमानेन भगवत्सिद्धौ 10
'अन्यथापि' वाक्यार्थज्ञानजन्यत्वं विनापि। दोषाभावादेव परलोकसाधनस्य यागादेरनुष्ठानं, यतः प्रकृते[1]वेदरूपस्तस्य सम्भवात् अप्रयोजकत्वज्ञानात् विप्रतिपत्तिः। ईश्वरसाधकप्रमाण-सामान्य एव 'तदभावावेदकप्रमाणसद्भावादि'ति बाधसाम[5b]ग्रीतया वा विपरीतप्रतिपत्तौ हेतुः। एवं "मन्त्रायुर्वेदप्रामाण्यवच्च तच्च [तत्?]प्रामाण्यमाप्तप्रामाण्यादि"त्यत्र वेदप्रामाण्ये आप्तप्रामाण्यं हेतुः, तत्र तज्ज्ञानप्रामाण्याभावो हेत्वप्रसिद्धिरूपतया विपरीतप्रतिपत्तौ 15
हेतुः, स च 'सत्त्वेऽपि तस्याप्रमाणत्व'रूपः। यद्वा वेदः प्रमाणवक्तृकः प्रमाणशब्दत्वात् इत्यनुमानेन पक्षधर्मताबलादीश्वरः साधयिष्यते, तन्न सम्भवति, तस्य प्रमाणत्वाभावादिति। पक्षधर्मताबललभ्ये साध्यतावच्छेदकांशेऽभावरूपा साध्याप्रसिद्धिरुक्ता। एवं क्षितिर्न सकर्तृका सकर्तृकत्वसाधकप्रमाणाविषयत्वादित्यपि हेतुर्बाधोत्थापकतया तथा, एवम् अन्यथा तत्साध्यकेऽपि बोध्यम्। **प्रकाश**कृतस्तु सत्यामपि सिषाधयिषाधीनायां पक्षतायां परार्थानु- 20
मानस्थले विप्रतिपत्तिजन्यमानमेव संशयमङ्गमङ्गीकृत्य विप्रतिपत्तिपदं यथाश्रुतार्थकमेव; 'संक्षेप'श्चावान्तरविप्रतिपत्त्यविवक्षा[2], तत्र विषयिण्यां विप्रतिपत्तौ विषयस्य प्रयोजकत्व-विवक्षया पञ्चमीत्याहुः। ल्यब्लोपे पञ्चमीयं तत्तद्विषयं प्राप्य इमा विप्रतिपत्तय इति केचित्। प्रत्येकं तु विप्रतिपत्तिरेवम्।—प्रमेयत्वं साक्षात्कारित्वनिरूपितविषयत्वव्याप्यं न वा? यदि योगजज्ञानस्यापीदृशी विषयता तदा तदनिरूपितत्वेनापि विषयत्वं विशेष्यम्, 25
ईश्वरज्ञानत्वञ्च न तादृशविषयत्वप्रतियोगीति हृदयम्। भवतु वा योगप्रागभावप्रयुक्त-प्रागभावाप्रतियोगित्वरूपं योगाजन्यत्वं तादृशविषयतानिरूपकज्ञानविशेषणं, भवतु वा जन्यत्वमेव विशेषणम्। अप्रसिद्धिस्तु 'कल्प' इत्यनेन मूल एवाभिधास्यते। तद्विशेषेऽदृष्टे च आत्मा ऐन्द्रियकावृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्समवायी न वेति? तदेव विहितजन्यवृत्ति-

---

1 A. प्रकृतेर्वेद-। 2 B.-नपेचा।

तस्याप्रमाणत्वात्। तत्साधकप्रमाणाभावाच्चेति। तत्र न प्रथमः कल्पः। यतः—

तस्येश्वरज्ञानस्य अप्रमाणत्वात् गृहीतग्राहित्वात्। क्षित्यादिकर्तृत्वग्राहकं वेदवक्तृत्वग्राहकं प्रमाणमेव नास्ति, वक्ष्यमाणानामाभासत्वादित्याह—तत्साधकेति।

तत्रेति। तासु विप्रतिपत्तिषु मध्ये प्रथमः कल्पो न, प्रथमः पक्षो नेत्यर्थः।
5 कथमेवमित्यत आह—यत इति। यतो हेतुरस्ति, स चालौकिक इत्यन्वयः।

त्वेन निषिद्धजन्यवृत्तित्वेन च जातिविशेषणे धर्माधर्मयोस्तथा, जीवनयत्नत्वभावनात्वादि च न गुणत्वसाक्षाद्व्याप्यमिति। शरीरत्वं दुःखावच्छेदकावृत्तिजातिसमानाधिकरणं न वेति स्वर्गे, तदेव दुःखपदस्थाने सुखपदप्रक्षेपेण नरके। न च सुखदुःखान्यतरानवच्छेदकशरीरसिद्ध्यार्थान्तरमिति वाच्यम्, शरीरवृत्तिजातित्वावच्छेदेन तदन्यतरावच्छेदक-
10 वृत्तित्वनिर्णयेन बाधादेव तद[6a]नवकाशात्। उभयावच्छेदकावृत्तित्वस्य तद्विशेषणत्वे तु सामान्यतः परलोकमात्रे। साधनत्वे तु दण्डत्वं घटाव्यवहितप्राक्कालवृत्त्यत्यन्ताभावप्रतियोगितावच्छेदकं न वा? तत्तद्घटनिरूपिततत्तदव्यवधानानाञ्च संसर्गमर्यादयैव निवेशात् सामान्यतो नाप्रसिद्धिः, निषेधकोटेश्चाकाशादौ तादृशसम्बन्धाप्रतियोगिनि धर्मान्तरे कम्बुग्रीवादिमत्त्वादौ वा प्रसिद्धिः। दण्डादावनधिकत्वलक्षणं कारणत्वं
15 निर्णीतम्। कार्यत्वावच्छेदेन तादृशकारणवत्त्वस्य साध्यत्वे तु कार्यं सकारणकं न वा? कार्यत्वमवधितानिरूपकतावच्छेदकं न वेत्यादि। इत्थञ्चालौकिकत्वं परलोकसाधनवृत्ति न वा; परलोकसाधनत्वमलौकिकवृत्ति न वेत्याद्याः प्रत्येकसिद्ध्यनन्तरं विप्रतिपत्तयोऽनुसन्धेयाः।

कार्यकारणभावासिद्धौ च न कर्तृतया, तदसिद्ध्या परलोकासिद्ध्या च न तत्-
20 साधनाय नानाविध्नकृतयाऽदृष्टासिद्धौ च न तदधिष्ठातृतया तत्[1]सिद्धिरिति पूर्वपक्षिणोऽभिमानः। तत्राश्रयासिद्धेर्हेतावसाधकत्वं साधनीयम्। पक्षश्चालौकिकं परलोकसाधनम्, तत्रालौकिकसामान्ये परलोकसाधनत्वाभावो वा, परलोकसाधनेऽलौकिकत्वाभावो वा? तदुभयमेव निराकरोति—

तत्रेति। 'प्रथमः कल्पः' पक्षः, न तत्रागमिनमभिप्रेत्याह—यतो हेतुरस्ति,
25 परलोक इति शेषः, परलोको यतो हेतुमानिति यावत्।

---

1 Mss. तत्प्रवर्तक-।

सापेक्षत्वादनादित्वाद्वैचित्र्याद्विश्ववृत्तितः ।
प्रत्यात्मनियमाद्भुक्तेरस्ति हेतुरलौकिकः ॥४॥

तदेव कथमित्यत आह—**सापेक्षत्वादि**ति ।

हेतुर्दण्डादिरस्ति घटादिकार्यनियतपूर्वसन्निति प्रतिज्ञा, मृद्दण्डचक्रादीनां परस्पर-सापेक्षत्वात् । न ह्येषां परस्परापेक्षाऽनुभूयमाना घटादिकार्यम[न्त]रेण सम्भवति । 5
यद्वा कार्यं सहेतुकं सापेक्षत्वात् दण्डाद्यपेक्षोत्पत्तिकत्वादित्यर्थः । अनुमानप्रामाण्यं च व्यवस्थापयिष्यते । हेत्वनभ्युपगमे परप्रतिपत्त्यर्थं वाग्व्यवहारो व्याहत इति भावः । ननु हेतुरपि दण्डादिः कादाचित्क इति सहेतुको वाच्य एव, तत्रापि सहेतुकत्व-मित्यनवस्था इत्यत आह—**अनादित्वादि**ति । बीजाङ्कुरवत् । ननु भवतु साधनं तच्च दृष्टमस्मदाद्यधिष्ठेयमिति नादृष्टं साधनमस्ति येन तदधिष्ठानार्थमीश्वरापेक्षेत्यत 10
आह—**वैचित्र्यादि**ति । दृष्टमात्रेण वैचित्र्यं कार्याणामनुपपन्नमतोऽदृष्टं कल्पनीय-मित्यर्थः । तथापि दृश्यमेव तथास्तु किमन्येनेत्यत आह—**विश्ववृत्तित** इति । विश्वेषां प्रामाणिकानां वृत्तिर्यागादौ प्रवृत्तिर्धर्मार्थाऽतो न कथमदृष्टसिद्धिरित्यर्थः । तथापि तददृष्टं साधारणमस्तु, किं प्रत्यात्मनिष्ठतया भिन्नं कल्पनीयमित्यत आह—
प्रत्यात्मनियमादिति । हेतुभिः साध्यं विशिष्टमर्थमाह—**अस्ती**ति । 'हेतु'रस्ति, 15

तत्र हेत्वाकांक्षायामाह—**सापेक्षत्वादि**ति । प्रागभावप्रतियोगित्वादित्यर्थः । तथा च परलोको हेतुमान् सापेक्षत्वात् घटवदिति फलति । स च तद्धेतुः प्रागभाव-प्रतियोगी सहेतुको न वा ? अन्त्ये तत्रैव व्यभिचारः । प्रथमे तत्तद्धेतुतादृशपरम्परायां तदभ्युपगमे अनवस्थेति कश्चित् तादृशो निर्हेतुक एव वाच्यस्तथा च तत्रैव व्यभिचार इत्यत्राह—**अनादित्वादि**ति । इयमनवस्था न प्रमाणप्रवृत्तिविरोधिनी अनाद्यन- 20
वस्थात्वात् बीजाङ्कुरानवस्थावदित्यर्थः । अथवायं यदि सहेतु र्न स्यात् तर्ह्यनादिः स्यादित्येव तर्कोऽनेन सूचितः । पञ्चम्यर्थश्च विपर्ययसिद्ध्यौपयिकव्यापकताज्ञानविषयत्वम् । द्वितीये त्वाह—**वैचित्र्यादि**ति । परलोको विचित्रहेतुकः कार्यत्वे सति विचित्रत्वात् । कार्यत्वे सति यद् यदपेक्षया विचित्रं तत्तत्का[6b]रणविचित्रहेतुकमिति सामान्यमुखी व्याप्तिः । नन्वत्र दृष्टेनैव विचित्रेण हेतुना अर्थान्तरमत आह—**विश्ववृत्तित** इति । विश्वेषां परलोकार्थिनां 25
वृत्तितः प्रवृत्तितः । तथा च निष्फले कर्मणि प्रवृत्त्यसम्भवात् । यागादिः सफलः शिष्टा-चारविषयत्वात् पाकवदित्यनुमानेन तस्य सफलत्वसिद्धौ साक्षात् साधनत्वासम्भवेन तद्व्या-पारः कश्चित् फलानुगुणो वाच्यस्तत्र चैन्द्रियकत्वबाधादतीन्द्रियत्वं सिध्यतीत्यलौकिकेन [1]परलोकसाधनं नासिद्धमिति भावः । नन्वस्यात्मसमवेतः कश्चित् योग्य एव धर्मो व्यापारत्वेन सम्भाव्यतां, न च तस्य पुरुषानध्यक्षतामात्रेणैवालौकिकत्वमत आह—**प्रत्यात्म-** 30

1 A. परलोके साधनत्वमसिद्धमिति ।

न ह्ययं संसारोऽनेकविधदुःखमयो निरपेक्षो भवितुमर्हति। तदा हि, स्यादेव,

---

न चालौकिकोऽपीत्यर्थः। हेतुसत्त्वे यत् प्रमाणमुक्तं तत्र तर्कमाह—**न हीति**।
अनेकविधदुःखमय इति जगद्वैचित्र्यार्थम्। **संसार** इत्यदृष्टसिद्ध्यभिप्रायेण।
निरपेक्षत्वे विपक्षदण्डमाह—**तदा हीति**। 'स्यादेव' नित्यः स्यादिति स्वमतेन,
5 स्यादित्यलीकं स्यादिति परमते आपादनं, तेन नित्यानभ्युपगमात् आपादकञ्च
निरपेक्षत्वमेव, तच्चाहेतुकत्वम्। अहेतुकस्य मतभेदे द्वयी गतिः। नित्यत्वमलीकत्वं
वा, न तु कादाचित्कः स्यादिति उभयथापि कादाचित्कत्वमनुभूयमानं
हेतुः स्यादित्यापाद्यद्वयस्य तृतीयमापादनम्। "अहेतुका भावोत्पत्तिः

नियमादिति। यागव्यापारयोः फलव्यापारयोश्च सामानाधिकरण्यप्रत्यासत्त्यैव कार्यकारण-
10 भावः कल्प्यते लाघवात्, व्यधिकरणस्य तत्त्वे चातिप्रसङ्गात्। यागः कालान्तरभाविफलानु-
कूलस्वसमानाधिकरणव्यापारक आत्मसमवेतत्वे सति कालान्तरभाविफलानुगुणत्वात् स्मृत्यनु-
कूलानुभववत्। भोगो वा स्वसमानाधिकरणव्यापारजन्यः स्वात्मसमवेतत्वे सति विनष्टकारण-
जन्यत्वात् स्मृतिवदित्यादयः प्रयोगाः। अवघातजनकव्रीहिप्रोक्षणे तदभिधाने व्यभिचार-
वारणाय सत्यन्तम्। **प्रकाश**कृतस्त्वलौकिक परलोकसाधनत्वं वाऽनभ्युपगच्छतो
15 नाश्रयासिद्धता मुद्भावन घटते, प्रतियोग्यप्रसिद्ध्या निषेधानिरूपणात्। तत्र यदि मत एव
प्रतियोगिनः ख्यातिमादाय प्रत्यवतिष्ठते तत्राह—**कल्पो मत** इति। ख्यातिविषयत्वस्य
सत्त्वव्याप्यत्वात् असत्ख्यात्याप्रसिद्धमित्यर्थकं **मत** इति।

नन्वभ्युपेत्य परलोकादिकमुक्तप्रमाणान्या प्रत्यवस्थेयं, सैव त्वदुपरि अपार्थकत्वमुद्भावनीयं
[illegible]प्रसिद्धेरत्राह—**सापेक्षत्वादिति**। पूर्वव्याख्यानुसारेणैव निगदितार्थमेतत्।

20 सहेतुकत्वसाध्यानुमाने अनुकूलतर्कमाह —

न ह्ययमिति। अथ यदि सत्त्वे सति निरपेक्षः स्यात्, स्यादेव तर्हि नित्यः संसारः
आत्मानादिवत्। 'अनेकविधे'ति विचित्रेत्यर्थः। एतच्च 'वैचित्र्यादि'त्यत्रोपयोक्ष्यते।
'दुःखमय' इति वैराग्योपदर्शनात्, तस्य च मुमुक्षावुपयोगः। निरपेक्षो निर्हेतुकः। यद्वा
यदि सत्[a]त्वेऽपि न स्यात् तदा सापेक्षो न स्यादित्यवेष्टापत्तिं निरस्यति—**न
25 ह्ययम**ित्यादिना। अयं यदि सत्त्वे सति निरपेक्षः स्यात् स्यादेव नित्यः, जनकाभावत्वेन

न स्यादेव वा, न तु कदाचित् स्यात्। अकस्मादेव भवतीति चेन्न।

कण्टकतैक्ष्ण्यादिदर्शनादिति सूत्रानुसारेण शङ्कितेऽकस्मादिति ॥४॥

ध्वंसाविशिष्टस्य नित्यत्वे 'सत्त्वे सती'ति नोपादेयम्। परमते त्वाह—**न स्यादेवे**ति। अलीकं स्यादित्यर्थः। सत्त्वञ्च सम्बन्धसामान्येन केवलान्वय्यत्यन्ताभावप्रतियोगित्वम्। उभयमते त्वाह—**न त्वि**ति। कादाचित्कत्वं महाप्रलयपूर्वकालनिष्ठा(?)व्याप्यवृत्त्यत्यन्ताभावप्रतियोगित्वं[1] तन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वं वा, यथाश्रुते प्रागभावे व्यभिचारात्। यद्वा 'स्यादेवे'त्यस्य निखिलकालवृत्तित्वे सति सत्त्वं न [?]स्यात्, 'न स्यादेवे'त्यस्य न कालावृत्तित्वमर्थः, कालावृत्तिश्चाकाशादावेव[2] प्रसिद्धः, तत्र कालवृत्तित्वे सति सहेतुकत्वाभावो निखिलकालवृत्तित्वस्य निखिलकालावृत्तित्वे सति सहेतुकत्वाभावश्च कालावृत्तित्वस्यापादकः,[3] तेन पूर्वत्राकाशादौ द्वितीये प्रागभावे न व्यभिचारः। विशेषणवत्तयाऽवगते विशिष्टाभावः सिध्यन् विशेष्याभावमादाय पर्यवस्यतीति संशयैककोटिमात्रपर्यवसायिता विपर्ययद्वारा तर्कस्येति नानुपयोगः। विशिष्टाभावस्यातिरिक्तत्वेऽनतिरिक्तत्वे वा येन रूपेण संशयकोटिता तेनापर्यवसानमित्यभिप्रायेणाह—**न त्वि**ति। **परे** तु अयं घटो यदि सहेतुको न स्यात् तदा एतत्प्रागभावकालवृत्तिः स्यात् एतत्कालान्यकालवृत्तिश्च स्यादिति 'स्यादेवे'त्य[स्या?]र्थः। तत्र गगनादेः कालावृत्तित्वनये तत्र व्यभिचारमाशङ्क्याह—**न स्यादेवे**ति। एतदधिकरणकालमात्रवृत्ति न स्यादित्यर्थः। अयञ्च विशिष्टाभावः कालावृत्तावपीति नोक्तव्यभिचारः, कादाचित्कत्वञ्च सत्त्वे सत्येतदुत्तरकालवृत्तित्वं, सत्त्वे सति कालवृत्तित्वं वा, तुः समुच्चयार्थ इत्याहुः। अन्यच्च वैपम्यमुदक्षरतया उपेक्षितम्। अत्र शङ्कते—**अकस्मादेव भवती**ति। अत्र हेतुपरेण किंशब्देन नञः सम्बन्धे हेतु विनैव भवतीति लभ्यते, तथा च तर्कमूलीभूतव्याप्तौ अप्रयोजकत्वम्; यदि च नञो भवनेनान्वयः असूर्यम्पश्येत्यादाविव, तदा भवनाभावो लभ्यते। भवनञ्च प्रागभावप्रतियोगित्वं तद्व्यापकमुत्पत्तिमत्त्वं वा, तथा च तर्के इष्टापत्तिः। किंशब्दस्य स्वभिन्नपरत्वे तत्र च नञर्थस्य भेदस्यान्वये स्वभिन्नभिन्नात् स्वस्माद्भवतीति स्वपरत्वे तद्भिन्नाद् भवतीति च ल[7b]भ्यते। तथा चापादकस्य पराभ्युपगमाविषयत्वेन विपर्यये सिद्धसाधनं दोषः ॥४॥

1 A. तन्निष्ठान्योन्याभावप्रतियोगित्वं added. 2 B.—दिरेव। 3 A. च added.

हेतुभूतिनिषेधो न स्वानुपाख्यविधिर्न च।
स्वभाववर्णना नैवमवधेर्नियतत्वतः ॥५॥

हेतुनिषेधे भवनस्यानपेक्षत्वेन सर्वदा भवनमविशेषात्। भवनप्रतिषेधे प्रागिव पश्चादप्यभवनमविशेषात्। उत्पत्तेः पूर्वं स्वयमसतः स्वोत्पत्तावप्रभुत्वेन स्वस्मादिति

तदेतद्विकल्प्य दूषयति—हेत्विति। किंशब्दस्य हेत्वर्थत्वे हेतुनिषेधः पर्यवस्यति, प्रतिषेधवाचकाभावशब्दस्य भवत्यन्वये भवनप्रतिषेधः। तथा च कस्मादपि न भवतीत्यर्थः। यद्वा किं-शब्दोऽन्यपरः, तथा चान्यस्मान्न भवति, किन्तु स्वस्मादेव भवतीत्यर्थः। अथवा किंशब्दः प्रामाणिकपरः, तथा च प्रामाणिकान्नु[न ?] भवति, किन्त्वप्रामाणिकादनुपाख्याद् भवतीत्यर्थः। यद्वा अकस्मादित्यव्युत्पन्न एवायं शब्दः स्वभावमाह—तथा च स्वभावादेव भवतीत्यत्र हेतुर्वैचित्र्यमपेक्षत इत्यर्थः। सर्वत्र परिहारमाह अवधेरिति। घटादीनां दण्डादेरवधेर्नियतपूर्वसत्त्वस्यान्वयव्यतिरेकसम्यक्त्वेन दुर्वारत्वादित्यर्थः।

विकल्पितपक्षेषु विशेषदूषणमाह—हेतुनिषेध इति। हेतुनिरपेक्षं चेद् भवनं तदा सर्वदा घटादेर्भवनं प्रसक्तं, तथा च कादाचित्कत्वमनुभूयमानमनुपपन्नं स्यादित्यर्थः। भवनप्रतिषेधपक्षमाह—भवनेति। कार्यस्य भवनमेव नास्तीति यदुच्यते तदा

तावता चार्वाकैकदेशिमते पक्षधर्मताया अभावादाश्रयासिद्धिरेवेति प्रकारत्रयमपाकृत्य निराकरोति—हेतुभूतीति। सर्वत्र हेतुः 'अवधेर्नियतत्वत' इति स्वपूर्वकालवर्तित्वनियतावधिकत्वेन प्रमाणसिद्धत्वादित्यर्थः।

एकेन हेतुना प्रकारत्रयं निरस्य पक्षद्वये प्रागुक्तं तर्कमनुवदति—हेतुनिषेध इति। 'भवने'ति भवनप्रतियोगिनः कार्यस्य कार्यान्तरनिरपेक्षत्वेन सर्वदा भवनं कार्यस्य सतः सार्वदिकत्वं स्यात्, तावता 'स्यादेव'ति तर्कः स्मारितः। तत्सूचीभूतव्याप्तिग्राहकमाह—अविशेषादिति। इदानीन्तनात् नान्यदेत्यत्र नियामकाभावादित्यर्थः। द्वितीयं तर्कमाह—भवनप्रतिषेध इति। 'प्रागिव' सामग्रीसम्बन्धात् पूर्वमिव, ततः 'पश्चादप्यभवनं' अनुवृत्तिः, तथा चोत्पत्तेरप्यसिद्धिः प्रत्ययो न स्यादिति भावः। 'अविशेषात्' सर्वत्र तथा उत्पत्त्यनिरूपणात्। तृतीयं निरस्यति—उत्पत्तेरिति। 'उत्पत्तेः' स्वस्मात् पूर्वमिति तु विवक्षितं, 'स्वयमसतः' अविद्यमानस्य स्वस्य 'स्वोत्पत्तौ' स्वजनने तादृशप्रभुत्वेनाक्षमत्वेन 'स्वस्मात्' इत्युक्ति पक्षस्यानुपपत्तिः। अप्रभुत्व-

---

[illegible]

पक्षानुपपत्तेः। पौर्वापर्यनियमश्च कार्यकारणभावः। न चैकं पूर्वमपरञ्च। तत्त्वस्य भेदाऽधिष्ठानत्वात्। अनुपाख्यस्य हेतुत्वे प्रागपि सत्त्वप्रसक्तौ पुनः सदातनत्वापत्तेः।

स्यादेतत्। नाऽकस्मादिति कारणनिषेधमात्रं वा, भवनप्रतिषेधो वा, स्वात्महेतुकत्वं वा, निरुपाख्यहेतुकत्वं वाऽभिधित्सितम्, अपि त्वनपेक्ष एव कश्चिन्नियतदेशवन्नियत-

---

कदाचिदपि कार्यं नोत्पद्यते। तथापि कादाचित्कत्वं न स्यादिति भावः। पक्षानुपपत्तेरिति विरोधादिति भावः। विरोधं स्फुटयति—पौर्वापर्येति। प्रागपि सत्त्वप्रसक्ताविव्यापाततः, वस्तुतो निरुपाख्यस्यार्थकारित्वाभ्युपगमे तस्य सत्त्वप्रसक्तौ निरुपाख्यत्वानुपपत्तेः। 5

स्यादेतदिति। यदि पूर्वोक्तं भू[दू?]षणमुद्धृतं तत्राग्रे वक्ष्यमाणमेतत स्यादित्यर्थः। कारिकार्थं स्फुटीकर्तुं वृत्तमनुकीर्तयति—नाकस्मादिति। नियतदेशवदिति। यथा घटस्य कपालमेव, पटस्य तन्तुरेव देशः, तथा कालविशेषोऽपि घटादीनां नियतः स्यात्, किमत्र कारणापेक्षयेत्यर्थः। कालनियमे कारणापेक्षावश्यकी, अन्यथा कादाचित्कत्वमनुभूयमानं व्याहन्येत, एवं देशनियमोऽपि कारणापेक्ष एव, अन्यथा यत्र किञ्चित् क्वचिदुत्पद्येतेति भावः। देशनियमेन गोत्वादिकं परमाणुपरिमाणत्वाद्दृष्टान्तीक्रियते, तत्राह— 10

नेय कथमित्याकाङ्क्षायामाह—पौर्वापर्येति। 'चो' हेतौ। नियतपूर्वसत्त्वमेव यतो हेतुत्वं तन्नियतं च 'यत' इति। ननु नियतपूर्वसत्त्वमेव स्वापेक्षया स्वस्य स्यादित्यत्राह—न चैकमिति। स्वप्रागभावेन सह प्रतियोगिनः कालिकविरोधादिति भावः। ननु प्रागभावेन समं तस्य तथात्वेऽपि तदवधिकत्वमेव तत्पूर्वत्वं वाच्यमित्यत्राह—तत्त्वस्येति। 'तत्त्वस्य' स्वावधिकनियतपूर्वत्वस्य। भिद्यते इति व्युत्पत्त्या भेदो भिन्नः, स च स्वापेक्षया तदधिष्ठानत्वात् स्वभिन्नवृत्तित्वादिति यावत्, स्वभेदाधिष्ठानाधिष्ठानकत्वादिति मध्यपदलोपाद्वा तथा लाभः। 'अनुपाख्यस्य हेतुत्वे' उपाख्याशून्यकहेतुत्वे। 'प्रागपि' स्वस्मात् प्रागपि। अपिना स्वाधिकरणस्वोत्तरकालयोः समुच्चयः। आपादकञ्च सत्त्वेन विशेषितं तेन न प्रागभावे व्यभिचारः। पुनरिति। अहेतुकत्वे[8a]न सदातनत्वापादनमपेक्ष्य कारित्वस्य तन्मते सत्त्वेन तत्रानुपाख्यत्वमेव। तर्हि व्याहतमित्यपि बोध्यम्। 15 20

'स्यादेतत्' एतद्वक्ष्यमाणं स्यात्। तत्र वक्ष्यमाणपक्षस्य दूषितमतवैधर्म्योपदर्शनाय तदनुवदति—नाकस्मादितीति। 'कारणप्रतिषेधमात्र' कारणमात्रप्रतिषेधः। निरुपाख्यहेतु[क?]त्वं वेति। इदमुपलक्षणम्। स्वस्य भावः 'स्वभावः' स्ववृत्तिरिति यावत्। तद्धेतुकत्वं वेत्यपि बोद्धव्यम्। 'अभिधित्सितम्' 'अकस्मादि'त्यभिधानप्रयोजकतात्पर्यविषयः। 'अनपेक्ष एव' अहेतुक एव। कश्चिदाकाशपरिणाहादिर्यथा भवति 'नियतदेशः', तथा कार्यत्वेनाभिमतोऽपि घटादि'र्नियतकालस्वभावः', तथा चानुमानं 25 30

कालस्वभाव इति, ब्रूमः । 'निरवधित्वे अनियतावधिकत्वे वा कादाचित्कत्वव्याघातात् । न ह्युत्तरकाल¹संसर्गित्वमात्रं कादाचित्कत्वं, किन्तु प्रागसत्त्वे सति । सावधित्वे तु स एव प्राच्यो हेतुरित्युच्यते । अस्तु प्रागभाव एवावधिरिति चेन्न । अन्येषामपि तत्काले सत्त्वात् । अन्यथा तस्यैव निरूपणानुपपत्तेः । तथा च न तदेकावधित्वम्

5 **निरवधित्व** इति । निरवधित्वकादाचित्कत्वयोर्विरोधादिति भावः । ननूत्तरकाल²-संसर्गित्वमात्रं कादाचित्कत्वं, तच्चाकाशादौ निरवधावपि दृष्टमेव, तथा च कुतो विरोध इत्यत आह—**न ह्रीति** । तथा च घटाकाशयोः कादाचित्कत्वात् कादाचित्के त्वव्य-वहारोऽपि निर्वहतीति भावः । नन्ववधिमङ्गीकुर्मो, न तु कारणमत आह—**सावधित्व** इति । पूर्वावधित्वमेव सहेतुकत्वमित्यर्थः । नानुपख[मृ?]त्य[च ?] प्रादुर्भावादिति
10 पूर्वद्[प?]त्तिणमभावोपादानकं जगदितिवादिनमुत्थापयति—**अस्त्विति** । कपालादी-नामपि प्रागभाववदेवान्वयव्यतिरेकाऽवधित्वमावश्यकमित्याह—**अन्येषामपीति** । यदि कपालादीनां नियतपूर्वसत्त्वं न स्यात्, तदा प्रागभावोऽपि दुर्निरूपः सामग्रीक्षण एव तन्निरूपणात्, तथा च तस्यावधित्वाभ्युपगमो न[?]स्याम वेत्याह—**अन्यथेति** । **तथाचेति** । तन्निरूपकस्यापि रूपादेरवधित्वसम्भवादित्यर्थः । ननु प्रागभावनिरूप-
15 कत्वेऽपि यथा वज्ररादीनां नावधित्वं तथा कपालादीनामप्यवधित्वमस्तु, को दोष

तर्को वा प्रयोजकमिति भावः । अहेतुकत्वाकादाचित्कत्वयोर्निरुपाधिसहचारेण व्याप्ति-ग्रहात्राप्रयोजकत्वमित्यभिप्रेत्याह—¹**नेति** । 'अनियतावधि[क]त्वे वा' अनियतावधित्व इव । तथा नैकमेव हेतुरित्यत्र यथा कादाचित्कत्वव्याघातस्तथाऽहेतुकत्वेऽपीत्यर्थः । प्रागभावे व्यभिचारमाशङ्क्य तदुद्धरणम् । प्रकारान्तरेणापि सहेतुत्वं साधयति—**न ह्रीति** ।
20 '²उत्तरकालसंसर्गित्वमात्रं' कालवृत्त्यत्यन्ताभावाप्रतियोगित्वमात्रम् । **प्रागसत्त्वे सतीति** । कालसंसर्गित्वं विशिष्योपादानाद् वृत्तौ नातिव्याप्तिः । **परे** तु उत्तरकालसंसर्गित्वं कादाचित्कत्वं तच्च गगनादेरप्यस्तीति व्यभिचारमाशङ्क्य निराचष्टे—'न ही'त्याहुः । तन्मोचरेऽस्य वैयर्थ्यमनुसन्धेयम् । नन्वत्र निरवधित्वमुपाधिरित्यत्राह—**सावधीति** । सावधित्वे तु कार्यत्वाभिमतस्य 'स एव' अवधित्वेन 'प्राच्यो' नियतपूर्ववर्ती 'हेतु'रुच्यते ।
25 हेतुरवाच्यो हेतुरित्युक्तौ विरूपोपाधित्वभावादनन्वय इत्युच्यत इत्युक्तम् **अस्त्विति** । एतावतापि 'अलौकिकं परलोकसाधनमदृष्टमि'त्यत्राश्रयासिद्धिरेव, न वा कर्तृतया भगवतः सिद्धिरिति भावः । 'अन्येषां' नियतान्वयव्यतिरेकशालिनां कपालादीनां 'तत्काले' कार्याव्यवहितप्राक्काले 'सत्त्वात्' । तेषामन्यथासिद्धिग्राहकप्रमाणाभावात् कारणत्व-मेवार्थंतरगम्यमिति भावः । 'अन्यथा' तदानीं तादृशानामसत्त्वे 'तस्यैव' प्रागभावस्यैव सामग्रीव्यञ्जकत्वानन्वयेति भावः । 'न तदेकावधित्वं' न प्रागभावैकावधित्वम् [8b]
30

1 मुद्रानन्द reads न निरवधित्वे । 2 महरमिश्र-गुणानन्दसम्मतः पाठः ।

अविशेषात्। इतरनिरपेक्षस्य प्रागभावस्यावधित्वे प्रागपि तदवधेः कार्यसत्त्वप्रसङ्गात्। सन्तु ये केचिदवधयो, न तु तेऽपेक्ष्यन्त इति स्वभावार्थ इति चेन्—नाऽपेक्ष्यन्त इति कोऽर्थः? किं न नियताः? आहोस्विन्नियता अप्यनुपकारकाः[1]? प्रथमे धूमो दहनवद्गर्दभमप्यवधीकुर्यात्, नियामकाऽभावात्। द्वितीये तु किमुपकारान्तरेण, नियमस्यैवाऽपेक्षार्थत्वात्, तस्यैव च कारणात्मत्वात्, 5

इत्यत आह—इतरेति। यदि प्रागभावमात्रमवधिः स्यात्, तदा तदधीनमात्रोत्पत्तिकस्य कार्यस्यानुभूयमानं कादाचित्कत्वं भज्येतेत्यर्थः। ननु कार्येण योऽवधिरपेक्षणीयः स्वोत्पत्तौ तत् कारणं भवेत्, न त्ववधिमात्रमेव कारणमित्याह—सन्त्विति। किन्नियता इति। अनि[य]तावधिकमेव कार्यमित्यर्थः। आहोस्विदिति। दण्डादयोऽवधयोऽपि कार्ये घटादौ नोपकारमादधतीति, न च कारणमित्यर्थः। धूम इति। धूमस्यानियतावधित्वे धूमार्थी 'दहनवद्' गर्दभेऽपि प्रवर्तेत, यद्वा दहनासमवधानेऽपि कदाचिद् गर्दभादपि धूमो दृश्येतेत्यर्थः। यद्वा धूमत्वावच्छिन्नं प्रति दहनत्वावच्छेदेन गृहीता कारणता भज्येतेत्यर्थः। अत्र सर्वत्र हेतूपवर्णनम्। नियामकाऽभावादिति। यदि कारणानियमः स्यात्, तदेदमनिष्टं स्यादु इत्यत्र तात्पर्यम्। ननु तर्कविधानादेरिच्छया, किमुपकारान्तरेणापि? अनाहितोपकारोऽपि यन्नियतपूर्ववर्तिजातीयः स एव तत्कारणमित्यर्थः। अन्यथोपकारेऽप्युपकारान्तराधानेऽनवस्था स्यादिति भावः। तस्यैवेति। नियतपूर्ववर्तिजातीयस्यैव कारणपदवाच्यत्वादित्यर्थः। ननु 10 15

'अविशेषात्' कारणताग्राहकान्वयव्यतिरेकग्रहस्य प्रागभाव इव कपालादावपि सत्त्वात्। ननु कार्योत्पत्तिद्वितीयक्षणे सत्येव कारणत्वाभिमतेष्वन्येषु प्रागभावव्यतिरेकात् कार्योत्पत्तिव्यतिरेको दृष्टः, न त्वन्यव्यतिरेकादित्यत्राह—इतरेति। 'प्रागपि' कपालादिसमवधानात् 'तदवधेः' प्रागभावरूपैकावधेः कार्यस्य सत्त्वमुत्पत्तिरूपं, तथा च यथा द्वितीयक्षणे प्रागभावव्यतिरेकात् कार्यानुत्पत्तिः, तथा सत्यपि प्रागभावे कपालादिसमवधानात् पूर्वं कार्यानुत्पत्त्या तस्यापि हेतुत्वमिति भावः। 'स एव प्राग्यो हेतुरि'त्यत्र शङ्कते—सन्त्विति। 'ये केचित्' प्रागभावस्तदितरे वा, तेन कार्येण तु 'ते नापेक्ष्यन्ते' तथा च तदवधित्वेन तद्धेतुव्यपदेशत्वे साध्ये तत्कार्यापेक्षणीयत्वमुपाधिरिति 'स्वभावार्थः' स्वभाववादिनां तात्पर्यम्। 'न नियता' न नियतपूर्ववर्तिनः। 'नियता अपि' नियतपूर्ववर्तिनोऽपि। ''नोपकारकाः' न तत्तद्वृत्तिधर्मोत्पादकाः। प्रथम इति। तथा च दहनाद्धूम इतिवत् गर्दभादित्यपि प्रत्ययः स्यादिति भावः। तावता च नियतपूर्ववर्तित्वं नियतमवधित्वमकामेनापि वाच्यमिति सिद्धम्। केचित्तु धूमार्थी दहन इव रासभेऽपि प्रवर्तेतेत्यर्थः। यद्वा, दहनासमवधानेऽपि क्वचिद्रासभादपि धूम उत्पद्येत इत्यर्थ इत्याहुः। 'किमुपकारान्तरेण' कार्यनिष्ठधर्मान्तरजननेन, अन्यथा तादृशधर्मापेक्षणीयत्वनिर्वाहाय तत्रापि तदधीनधर्मान्तरकल्पनेऽनवस्था स्यादिति 'नियमस्यैव' नियतपूर्ववर्तित्वस्यैवा'ऽपेक्षार्थत्वात्' अपेक्षाव्यवहारविषयत्वात्। 'कारणार्थ[त्मा?]त्वात्' कारणव्यपदेश्यत्वव्यापकत्वात्। तथा चावधित्वेन हेतुव्यपदेश्यत्वे 20 25 30

---

1 गुणानन्द reads नोपकारकाः for अनुपकारकाः।

ईदृशस्य च स्वभाववादस्येष्टत्वात्। नित्यस्वभावनियमदर्शनात्। न ह्याकाशस्य तत्स्वभावकत्विकमिति सर्वस्य किं न स्यादिति

नाहितोऽस्कारत्वाविरोधात्. कथं कस्यचिदेव नियतपूर्वभावनियमः स्वभाववादं विनेत्यत आह—**ईदृशस्य चेति**। **नित्येति**। यथाकाशादीनां शब्दाश्रयत्वं स्वभावो न तु[तु?] सर्वस्य, तथा घटादीनामेव कादाचित्कत्वं स्वभावात् न त्वाकाशादीनामपीति न कादाचित्कत्वानुरोधेन सहेतुकत्वाभ्युपगमः। तदुक्तं **दिङ्नागेन—**

नियतत्वा भवन्त्येके नित्यास्तत्वाश्च केचन।
विचित्राः केचिदित्यत्र तत्स्वभावो नियामकः॥
वह्निरुष्णो जलं शीतं समस्पर्शस्तथाऽनिलः।
केनेदं रचितं तस्मात् स्वभावात्तद्व्यवस्थितिः॥ इत्यर्थः।

न च 'नियतदेशवदि'त्यादिना पौनरुक्त्यं, यत्र यन्नियतं तत्र[त्र?] कारणनियम्य-मित्युक्तं, सम्प्रति तु यस्य सः[यः?] स्वभावः स केनापि [न?] नियम्य इत्यपौनरुक्त्यम्।

केचित्तु, ननु 'नियतदेशवदि'ति यत्तया पूर्वमुक्तं तदोस्तुतमहेतुकत्वेऽपि' यथा नियतदेशत्वं तथा नियतकालतापि स्यात्, को विरोध इत्याह— **नित्येति**। न हीति। 'तत्त्वम्' आकाशत्वं परम्परासम्बन्धेन शब्दत्वमेव, स्वस्य द्रव्यविशत्वं वा। 'न ह्याकाशस्य तत्त्वमि'ति ब्रूयात—**सर्वस्येति**। एतन्मात्रनियतो धर्मः स्वभावः, स यद्यन्यस्यापि स्यात्, तदा स्वभावत्वव्याघात

मात्रे कार्यापेक्षणीयत्वं साधनव्यापकतया नोपाधिरिति सिद्धम्। ननु तद्वत्स्वाकाश-जनकत्वेऽपि घटावधित्वं कपालादावेव न वेमादावित्यत्र किंनियामकमित्यत आह— **ईदृशस्येति**। अवधित्वव्यापकत्वमेव 'स्वभाव' इति 'यादृश' इत्यादि उपकार्य उपकारकत्वेन जनने अनवस्थानिता उपकारे उपकारजननेऽपि[9a]तदवधित्वं तथैवेति उच्यते यथा 'बीजत्वात्' तथापि हेतुत्वात्। तथा च सर्वादि तथैव नास्त्यविति भावः। अभ्युपगतस्वभाववादं दृष्टान्त—**नित्येति**। नित्यस्याकाशादेर्यः स्वभावः शब्दाश्रयत्वलक्षणनियमदर्शनात् कादाचित्कत्वं स्यात्। यथा स्वभावादेतदवधित्वं तथैव नान्यत्रेति स्वीक्रियते तथा कादाचित्कत्वमपि आकाशादावेव नान्यत्रेति वाच्यमिति भावः। दृष्टान्ते घटावधित्वं स्वकारणनियामकेन वक्तुं शक्यते अत उक्तं **नित्येति**। 'तत्त्वं' शब्दावधित्वम् 'आकस्मिकं' हेतुत्वाभिमतं, पूर्वं परिमाणादिकमादाय शङ्का, इदानीमभ्युपगतस्वभाववाद-मादाय शङ्केति न पौनरुक्त्यम्। **परे** तु इत्यपि शङ्काऽऽकाशपरिमाणादिकमाश्रित्यैव, पूर्वे घोषपरिमाणादिषु कादाचित्कत्वं यथा विशेष कारणं नियतं तथा घटादीनां कादाचित्-

घटाद्युचितमिति चेन्न । सर्वस्य भवतः स्वभावत्वानुपपत्तेः । न ह्येकमनेकस्वभावं नाम, व्याघातात् । नन्वेवमिहाऽपि सर्वदा भवतः कादाचित्कत्वस्वभावव्याघात इति तुल्यः परिहारः । न तुल्यः । निरवधित्वेऽनियतावधित्वे वा कादाचित्कत्वव्याघातात् ।

इत्यर्थः । किञ्चैवं सत्येकमनेकस्वभावं स्यात्तदाह न त्वे[ह्ये?]कमिति । कादाचित्कत्वस्वभावस्य घटादेः सदातनत्वापादनेऽपि स्वभावव्याघातस्तथापीति शङ्कते—नन्वि[न्वि?]ति । परिहरति—न तुल्य इति । देशनियमेऽवध्यपेक्षा नास्ति, कालनियमेऽप्यस्त्यवध्यपेक्षा । स एवावधिः कारणं पर्यवस्येदिति भावः । एतदेव व्याघातमु[ल्लिख्य?] स्फुटयति—निरवधित्व इति । 5

फलमपीति कादाचित्कत्वेन सहेतुकत्वे साध्येऽप्रयोजकत्वमुक्तमिदानीं कादाचित्कत्वं न कारणनियतं स्वभावनियतत्वात् व्योमपरिमाणवदिति सत्प्रतिपक्षोद्भावनम् । 10
यद्वा, यन्न नियतं तत् कारणनियम्यमित्युक्तमिदानीं यो यस्य स्वभावः स न कारणनियम्य इत्युच्यत इति न पौनरुक्त्यमित्याहुः । सर्वस्येति । 'स्वभाव' इत्यत्र भावपदं धर्मार्थकं, धर्मत्वेन सामान्यतो धर्मिप्राप्तौ स्वस्याभिधानं निषेधफलकमिति यस्यैव यो धर्मः स तस्य स्वभावः, स चेद्धर्मोऽन्यस्यापि स्यात्, तदा तस्य स्वभावत्वमेव व्याहन्येत, हेतुं विनापि तेषां देशनियमादित्यर्थः । अत्रोपष्टम्भकमाह—न हीति । 15
एकमाकाशादि । अनेकेति । न एकं न एकमात्रं स्वाश्रयतया सम्बन्धि यस्य तदनेकमनेकवृत्तीति यावत्, तत्स्वभावकमित्यर्थः । तस्यान्यवृत्तित्वे त्वनेकवृत्तिधर्मस्यैकस्वभावत्वव्याघातादेकस्यानेकवृत्तिधर्मस्वभावकत्वविरोध उपष्टम्भको भवत्येवेति ध्येयम् । नन्वेवं कादाचित्कत्वं प्रागभावप्रतियोगिनां स्वभावो गगनादौ स्वभावत्वव्याघातादेव न वर्तते, तादृशनियमार्थमपि न कारणापेक्षेति तु[9b]ल्यमित्याह— 20
नन्वेवमिति । 'सर्वदा' भवतः सार्वदिके सतः तद्वृत्तेरिति यावत्, कादाचित्कस्य 'कादाचित्क'त्वस्वभावव्याघात' इति विनैव कारणं देशनियमो भविष्यति, किं कारणेनेत्यर्थः । दैशिकसम्बन्धेन यो यस्य स्वभावस्तस्य हेत्वनियम्यत्वेऽपि कालिकसम्बन्धेन कस्यचिदेव कालस्य घटस्वभावो नान्यस्येत्यत्र कारणमेव नियामकं वाच्यमित्यभिप्रायेणाह—तुल्यः [इति?] । न च प्रागभावस्य तेन सम्बन्धेन तत्स्वभावत्वेन कारणनियम्यत्वमिति वाच्यं, 25
तत्रापि प्रतियोगिकारणनियम्यत्वोपगमात् । कारणसामान्यनिषेधे तु किं कस्य नियामकमिति भावात् । नन्ववधिरेव तन्नियामकोऽस्तु, कारणस्य न तावतापि

1 B-स-omitted. A -स्व-omitted.

नियतावधित्वे[1] हेतुवादाभ्युपगमात्। स्यादेतत्। उत्तरस्य पूर्वः पूर्वस्योत्तरो मध्यमस्य उभयमवधिरस्तु। दर्शनस्य दुरपह्नवत्वात्। त्वयाऽप्येतदभ्युपगन्तव्यम्,

---

ननु निरवधित्वमनियतावधित्वं वा न ब्रूमो येन कादाचित्कत्वं व्याहन्येत, किन्तु नियतावधित्वमेवाचक्ष्महे, न तु कारणत्वं तत्राह—**नियतावधित्व** इति। ननु
5 नियतावधिकत्वेन सहेतुकत्वं वा साध्यते सोपादानकत्वं वा। आद्ये प्रागभावे व्यभिचारः। अन्त्ये तु ध्वंसेऽपि व्यभिचारः। किञ्च सामग्र्याः कादाचित्कत्वेऽपि न सहेतुकत्वमनवस्थानादिति यथा कादाचित्कापि सामग्री न सहेतुका तथा घटादिरपि न सहेतुकः स्यात्। किञ्च दृष्टान्वयव्यतिरेकाणामपि तृणारणिमणीनां व्यभिचाराच्च कारणत्वम्, एवं धूमादीनामपि कारणनियमो न भवेत्, इत्याद्येकवारेणाशङ्कते—
10 **स्यादेतदि**ति। **केचित्तु** ननु सावधित्वमङ्गीक्रियत एव, किन्तु सावधिर्न कारणम्। तत्रापि सावधित्वेन सहेतुकत्वेऽनवस्थानात्, किन्तूदासीन एव कश्चिदिति हृदि निधायाह 'स्यादेतदिती'त्याहुः। उत्तरस्य ध्वंसस्य पूर्वः प्रतियोगी। पूर्वस्य प्रागभावस्य उत्तरः प्रतियोग्येव[व?], मध्यमस्य इष्टोभयावधेर्घटादेरुभयं प्रागभावो ध्वंसश्चावधिरस्तु। स्वीकारे बीजमाह—**दर्शनस्ये**ति। अनेनैव बीजेन
15 सिद्धान्तिनमपि स्वीकारयति—**त्वयापी**ति। स्वीकृतं मया, किं तत इत्यत आह—

सिद्धिरित्यत आह—**नियतावधित्वे त्वि**'ति। **हेतुवादे**ति। वादः शब्दो वाचकतया यस्यास्ति तस्योपगमात्, य एव तन्नियामकोऽवधिः स एव हेतुपदवाच्य इत्यर्थः।

ननु घटादेः कादाचित्कत्वस्वभावनियामिका सामग्र्येव वाच्या, सापि कादाचित्की न वा? आद्ये तस्या अपि तथात्वे सामग्र्येव नियामिका वाच्येत्यनवस्थेति कादाचित्-
20 कसामग्रीं विनैव सामग्रीं कादाचित्कीं वाच्या, तथा च क्षित्यादिरपि तथैव स्यादिति तद्धेतुतया न भगवत्सिद्धिरित्यभिप्रायेणाह—**स्यादेतदि**ति। नन्ववधित्वस्य उभयावधिमत्त्वव्याप्यत्वादुत्तरावधिमत्याः सामग्र्याः पूर्वावधिरावश्यक इति प्रामाणिकत्वादियमनवस्था न दोषायेति दर्शयितुमाह—**उत्तरस्ये**त्यादि। उत्तरस्य ध्वंसस्य पूर्वः प्रतियोगी, पूर्वस्य प्रागभावस्योत्तरः स्वध्वंस इत्युभयावधिमत्त्वव्यभिचारो दर्शितः, न तु विरुद्धत्वमित्याह—
25 **मध्यमस्ये**ति। उत्पत्तिमज्जन्मविनाशस्येत्यर्थः। अन्यदीयजन्मविनाशयोरवधित्वं कथमिति शङ्कां निरस्यति—**दर्शनस्ये**ति। तद्दर्शनेनाबाधितत्वेनानुभवसिद्धत्वादित्यर्थः। ध्वंसप्रागभावयो-

---

1 दुरपह्नवत्वतः पाठः।

न हि भाववदभावेऽप्युभयाऽवधित्वमस्ति। तद्वद्भावेष्वप्यनुपलभ्यमानैकैककोटिषु स्यात्। न स्यात्, अनादित्वात्।

प्रवाहोनादिमानेष न विजात्येकशक्तिमान्।

न त्वा[स्या?]द्िति। **न ह्**ीति। अनुपलभ्यमानै[कै?]ककोटिषु तरुमहीरुहादिषु, तथा च कार्यत्वान्न सकर्तृकत्वसिद्धिरिति नेश्वरसिद्धिरिति भावः। तत्र कादाचित्कत्वं सहेतुकत्वे साध्ये सामग्र्यां व्यभिचारीति यदुक्तं तत्राह—**अनादित्वाद्**िति। सामग्र्यपि सामग्र्यधीना, एवं साऽपीत्यनादित्वमेवात्र परीहारः। दृष्टान्वयव्यतिरेकाणामपि तृणादीनां व्यभिचारपरिहारो मण्वचिन्तन[?] एवानादित्वादिति ॥५॥ 5

हेतुं विवरितुं कारिकयोपगृह्णाति—**प्रवाह** इति। कार्यकारणप्रवाहोऽनादिरेव। अनादित्वं च ध्वंसव्याप्यप्रागभावप्रतियोगित्वम्, तथापि व्यक्त्योरेव कार्यकारणभावोऽस्तु न जातिगर्भो येन कार्यत्वावच्छेदेनैव सकर्तृकत्वं सिध्येत[त्?]। अथ नियतजातीयकार्यान्यथानुपपत्त्या सामान्यगर्भ एव कार्यकारणभावोऽननुगस्तु तृणादावेकशक्तिमत्त्वेन समाधेय इत्यत आह—**न विजात**ीति। विजातिषु विरुद्धजातिषु तृणारणिमणिषु वह्न्यनुकूलशक्तिमत्तया कारणत्वमित्यपि नास्ति इत्यर्थः। नत्वे[न्वे ?]वं 10

र्व्यभिचारमुद्धरति—**न ह्**ीति। प्रतियोग्युन्मज्जनापत्तेरिति भावः। 'तद्वत्' सामग्रीवत्, 'भावेषु' अदृष्टप्राक्कोटिकक्षितिसमुद्रपरलोकादिषु विनैव कारणं कादाचित्कत्वं 'स्यात्'। सामग्र्याः पूर्वावधिशून्यत्वे बाधकमाह—**अनादित्वाद्**िति। सामग्र्यधिकरणक्षणध्वंसोत्पत्ति[10a]क्षणस्य तत्कार्यवत्त्वनियमेन तत्कार्यस्यानादित्वप्रसङ्गादित्यर्थः। तथा चायं घटो यदि पूर्वावधिमदवधिको न स्यादनादिः स्यादिति प्रतिकूलतर्कशरीरम् ॥५॥ 15

नन्वनवस्थाभिया तर्कोऽयं शिथिलमूलः स्यादित्यत्राह— 20

प्रवाहोऽनादिमान्िति। [1]प्रवाहः 'सामग्रीपरम्परा' 'न [2]आदिमान्', अपि त्वनादिः अनादित्वादेव च नानवस्था, न प्रमाणप्रवृत्तिविरोधिनीति भावः। यद्वा'ऽ[3]नादिमान्' आदिमद्भिन्नः, यथाश्रुते मतुपोऽनुपपत्तिर्ध्येया। अनादित्वञ्च स्वाश्रयध्वंसव्याप्यप्रागभावप्रतियोगित्वं, स्वं येन रूपेणानादित्वम्। ननु सावधित्वे च 'हेतुवादाभ्युपगमादि'त्युक्तम्। न हि वह्नेस्तृणाद्यवधिकत्वमस्ति, न च तृणादिहेतुकत्वं व्यभिचारेण नियमगर्भकारणत्वात् सम्भवति, तस्मात् यद्व्यक्त्यवधिर्यत् स एव तद्धेतुरित्येवं वाच्यम्। इत्थञ्च कार्यसामान्यस्य 25

1 A omitted. 2 गुणानन्दसम्मतः पाठः। 3 शङ्करमिश्रसम्मतः पाठः।

तत्त्वे यत्नवता भाव्यमन्वयव्यतिरेकयोः ॥६॥

प्रागभावो ध्रुवः कालावधिरनादिः, एवं भावोऽपि घटादिः स्यात्। अनुपलभ्यमानत्वाङ्कुरादिकर्त्रादिविषयं नेदमनिष्टमिति चेन्न।

तृणारणिमणीनां कारणत्वं परस्परव्यभिचारेण कथं ग्राह्यमित्यत आह—**तत्त्व** इति।
5 अन्वयव्यतिरेकयोस्तत्त्वे नियतत्वे ग्राह्ये पुरुषेण 'यत्नवता भाव्यम्'। तथा च वह्न्यवान्तरजातिकल्पनया तृणादावन्वयव्यतिरेकनियमो ग्राह्य इति भावः।

सावधिकत्वस्य सहेतुकत्वे व्यभिचारं निरस्यति—**प्रागभावो** हीति। तस्यो-त्तरकालावधित्वम्। तच्च न सहेतुकत्वे हेतुर्येन व्यभिचारः स्यात्। न हि या[नि?] सावधित्वं प्रागभावे, तदेव घटादावपीति। वैषम्यमसहमान आह—**अनुपलभ्यमाने**ति।

---

10 कर्तृत्वतया न भगवत्सिद्धिः, न वा यागादेः स्वर्गजनकतानिर्वाहकापूर्वे मानमस्ति येन परलोकसाधनादृष्टसत्त्वानुमितिः। तत्र तृणादीनां व्यभिचारिणामप्येकशक्तिमत्त्वेन कारणत्वमिति कर्तृतावच्छेदकशक्तिमत्त्वेन कार्यत्वावच्छिन्नं प्रति कारणत्वेन भगवत्सिद्धिरितीश्वरद्विषो **मीमांसक**स्य समाधानं निरस्यति—**ने**ति। 'विजातिषु' विजातीयेषु तृणादिषु कार्यकारणभावे 'नैकशक्तिमान्'। यद्वा 'विजातिः' तृणादिः 'नैकशक्तिमान्' इत्यर्थः। ईदृशं
15 कारणत्वमेकशक्त्यवच्छिन्नं नेत्यर्थः। तृणादिकं वह्न्यनुकूलातीन्द्रियधर्मवत्, वक्ष्यमाणयुक्तेरिति **मीमांसक**समाधानं निरस्य स्वमतमाह—**तत्त्व** इति। अन्वयव्यतिरेकयोर्वह्नितृणाभावयो-'स्तत्त्वे' तृणवह्न्यभाववन्निष्ठनियमग्रहे तृणेतरवह्निनिष्ठविलक्षणधर्मस्य ग्रहे 'यत्नवता भाव्यं' तद्ग्राहकग्रहाय यतितव्यम्। ज्ञाते च तद्वदनवह्निनिष्ठविलक्षणजातीनां ग्रहे तयोर्व्याप्तिग्रहः सुकर इति भावः।

20 'अनादित्वादि'ति हेतुं प्रसङ्गतया विवृणोति—**प्रागभावो** हीति। अनादित्वे सति विनाशित्वमसाधकं, तत्प्रसिद्ध्यर्थमुक्तं 'प्रागभावो ध्रुवः कालावधिरनादि'रिति। वैषम्यमाह—**अनुपलभ्यमाने**ति। 'प्राक्कोटिक'त्वं प्रागवधिकत्वम्।

---

1 तृणाद्य omits—तृ-.

तावन्मात्रावधिस्वभावत्वे तदहर्वत्पूर्वेद्युरपि तमवधीकृत्य तदुत्तरस्य सत्त्वप्रसङ्गात्, 'अपेक्षणीयान्तराभावात्। एवं पूर्वपूर्वमपि। भावे तदेव सदातनत्वम्। तदहरेवानेन भवितव्यमित्यस्य स्वभाव इति चेन्न। तस्याप्यहः पूर्वन्यायेन पूर्वमपि सत्त्वप्रसङ्गात्। तस्मात्तस्यापि तत्पूर्वकत्वमेवं तत्पूर्वस्यापीत्यनादित्वमेव ज्यायो, न त्वपूर्वानुत्पादे कस्यचिदपूर्वस्य सम्भव इति। तथापि व्यक्त्यपेक्षया नियमोऽस्तु, न जात्यपेक्षयेति 5

घटादिर्यदि पूर्वावधिशून्यः स्यात्, तदा तन्मात्राधीनं तत्कार्यमपि पूर्वावधिशून्यं सन् सदातनं स्यादिति कादाचित्कत्वभङ्गप्रसङ्ग एवेत्याह—**तावन्मात्रे**ति। **तदहर्वदि**ति। समासान्तविधेरनित्यत्वेन समाधेयम्। **अनेने**ति। अनुपलभ्यमानप्राक्कोटिकस्य घटादेर्यत् कार्यं तेन च तस्मिन्नेव दिने भवितव्यमिति तत्स्वभावाभ्युपगमे कथं सदातनत्वमित्यर्थः। अहस्तावत् कालः कालोपाधिर्वा, 10 उभयथापि तत्कार्यस्योक्तन्यायेन सदातनत्वमित्याह—**तस्यापी**ति। कार्यकारणभावप्रवाहस्यानादित्वाभ्युपगममन्तरेण न निस्तार इत्युपसंहरति—**तस्मादि**ति। कार्यकारणभावप्रवाहानादितामेव द्रढयति—**न त्वि**ति। घट आगन्तुकहेत्वधीन एवं सोऽपीत्यनादित्वमेवेत्यर्थः। **तथापी**ति। या दण्डव्यक्तिर्घटपूर्वसती दृश्यते सैव तद्घटव्यक्तिं प्रति कारणं, न तु घटजातीयं प्रति दण्डजातीयमित्यर्थः। एवं सति 15

'तावन्मात्रावधिकस्वभावत्वे' सामग्रीमात्रावधिस्वभावत्वेऽनुपलभ्यमानप्राक्कोटिकमात्रावधिकस्वभावत्व इति [10b] यावत्। तदा 'तदहर्वत्' तत्काल इव 'पूर्वेद्यु'स्तत्पूर्वमपि 'सत्त्वप्रसङ्गात्'। 'तदहरिति' समासान्तविधेरनित्यत्वात् नात्प्रत्ययः। अत्र हेतुमाह—**अपेक्षणीये**ति। सामग्र्यव्यवहितोत्तरत्वस्य कार्यवत्त्वव्याप्यत्वादित्यर्थः। क्षणस्य सूक्ष्मत्वात् पूर्वक्षणे तदापादने कदाचिदिष्टापत्तेराह—**एवमि**ति। 20 इत्थमनादेस्तस्य कदाचिदनुपलभ्यमानध्वंसस्य 'तदेव' अनादित्वमेव, 'सदातनत्वं' सदातनत्वे पर्यवसन्नम्, एतच्च न केनाप्यनुमन्यत इति[1] अपेक्षणीया'सम्भवाभावादि'त्यत्र शङ्कते—**तदहरि**ति। तं [2]क्षणं प्राप्यैव तेन भवितव्यमित्यर्थः। स एव क्षणः कथमस्यापेक्षणीयो नान्य इत्यत्र नियामकाकांक्षायामाह—**इत्यस्य स्वभाव** इति। 'तस्याप्यहः' तस्यापि क्षणस्य 'पूर्वन्यायेनानुपलभ्यमानप्राक्कोटिक'मात्रावधिकत्वेन 'पूर्वं' स्वोत्पत्तेः 25 प्राक्, तस्मात् सामग्रीप्रवाहस्यानादित्वमनायत्यैवाभ्युपेयमित्युपसंहरति—**तस्मादि**ति। 'तस्यापि' क्षणस्य तत्पूर्वापेक्षत्वम्, 'एवं' तत्पूर्वक्षणस्यापीति 'अनादित्वमेव' कारणप्रवाहस्येति। **अपूर्वे**ति। कार्याव्यवहितप्राक्क्षणातिरिक्तप्राक्क्षणवृत्तीत्यर्थः। 'अपूर्वस्य' 'सम्भव' उत्पत्तिः। उक्ताभिसन्धिना शङ्कते—**तथापी**ति। 'नियमोऽस्त्वि'त्यस्य कारणताघटक इति शेषः। 'न जात्यपेक्षया' नानेकवृत्तिधर्मनिरूपितो नियमस्तथेत्यर्थः। कार्यत्वं नानेकवृत्ति- 30

1 गुणानन्दसम्मतः पाठः। 2 B लक्षणं।

चेन्न। नियतजातीयस्वभावताव्याघातात्। यदि हि यतः कुतश्चिद्भवन्नेव तज्जातीयस्वभावः स्यात्, सर्वस्य सर्वजातीयत्वमेकजातीयत्वं वा स्यात्। एवं तज्जातीयेन यतः कुतश्चिद्भवितव्यमित्यस्य स्वभावः, तदाऽपि सर्वस्मात् सर्वजातीयमेकजातीयं वा

नियतजातीयं कार्यं न स्यादित्याह—**नियते**ति। ननु कार्यस्यायं स्वभावो
5 यद् 'यतः कुतश्चिद्'पि 'भवन्नि'यतजातीयं भवेत् तत्राह—**यदि ही**ति। कार्यपक्षकं तर्कद्वयमाह—**सर्वस्ये**ति। अयं घटो यदि घटजनकयावज्जन्यः स्यात्, घटजातीयः स्यात्। एवं धूमादिजातीयत्वमपि घटस्यापाद्य[म?]मित्येव सर्वजातीयत्व.पादनार्थः। घटभिन्नं कार्यं यदि घटजनकयावज्जन्यं स्यात्, घटजातीयः स्यादित्येकजातीयत्व[ा?]-पादनम्। कारणपक्षकं तदाह—**एवमि**ति। यदि घटसामग्री घटसामग्र्यभिन्ना
10 स्यात् पटजननी स्यात्। एवं धूमजननत्वादिकमापाद्यम्। घटान्यकार्यसामग्री यदि पटसामग्र्यभिन्ना स्यात् पटजनिका स्यादित्येकजातीयत्वापादनम्। ननु कार्यसाजात्यं यदि कारणसाजात्यनिबन्धनं तदा तृणादिवैजात्येऽपि वह्निसाजात्यं न भवेदित्याह—**कथमि**ति। **मीमांसकः** प्रत्यवतिष्ठते—**एकशक्तिमत्त्वादि**ति। वह्न्यनुकूलैकशक्तिमज्जन्यतयैव वह्निजातीयत्वमित्यर्थः। एवं सति वह्नेस्तृणानुमान-
15 भङ्गवद् धूमाद्वह्न्यनुमानभङ्गः। तृणव्यावृत्त्या वह्निव्यावृत्त्यनुमानभङ्गवत् वह्निव्यावृत्त्या धूमव्यावृत्त्यनुमानमपि भज्येत इत्याह—**यदि ही**त्यादि। उभयत्रापि हेतुमाह—

धर्मावच्छिन्नमिति तु विवक्षितम्। **नियते**ति। नियता कार्यत्वेन कार्यमात्रवृत्तिः कार्यभिन्ना वृत्तिरिति यावत्। एतादृशी या जातिस्तद्व्य'व्याघातादि'त्यर्थः। तथा च वह्निजात्य-वच्छिन्नकार्यताको न स्यात्, अकार्यावृत्तिजातिमान्न स्यादिति तर्कशरीरम्। **पर**नये त्वसत्-
20 ख्यात्यापादकप्रतियोगिप्रसिद्धिः। एवमग्रेऽपि। एतन्मूलीभूतव्याप्तावप्रयोजकत्वाशङ्कायामाह—**यदि ही**ति। 'यदि' घटत्वं कार्यमात्रवृत्तित्वे सति पटसामग्र्यघटकवृत्तिधर्मावच्छिन्न-कारणतानिरूपितकार्यतावच्छेदकं न स्यात् तदा पटवृत्तिः स्यात् पटत्ववत्। एवं पटत्वं पक्षीकृत्यापादकेऽप्सामग्र्युपादाने घटवृत्तित्वापादनमिति 'सर्वस्य सर्वजातीयत्वम्'। तासाञ्च जातीनामविकरणभेदमन्तरेण भेदानुपपत्तेराह—**एकजातीयत्वं वे**ति। घटत्वं यदि
25 कार्यमात्रवृत्तिजातित्वे सति पटसामग्र्यघट'नि[11a]ष्ठकारणतानिरूपितकार्यतावच्छेदकं न स्यात्, पटमात्रवृत्ति स्यात्। पटत्वाव्याप्यत्वस्यापादकविशेषणत्वे पटत्वं स्यादिति। एवं पटत्वं पक्षीकृत्य घटत्वात्मकत्वमापाद्यम्। **एवमि**ति। घटसामग्री यदि घटत्वावच्छिन्नकार्यता-निरूपितकारणताघटिता न स्यात्, घटभिन्नजनिका स्यात्। तादृशसामग्रीत्वामम्यवदत् पटत्वावच्छिन्नकारणता च तन्मतेऽसत्ख्यात्युपनीता, अस्मन्नये च सुलभप्रसिद्धिरेव। एवं

30 1 B-घटक-

स्यात्। कथं तर्हि तृणारणिमणिभ्यो भवन्नाशुशुक्षणिरेकजातीयः ? एकशक्तिमत्त्वादिति चेन्न। यदि हि विजातीयेष्वप्येकजातीयकार्यकारणशक्तिः समवेयान्न कार्यात्कारणविशेषः क्वाप्यनुमीयेत। कारणव्यावृत्त्या च न तज्जातीयस्यैव कार्यस्य व्यावृत्तिरवसीयेत। तदभावेऽपि तज्जातीयशक्तिमतोऽन्यस्मादपि तदुत्पत्तिसंभवात्।

तदभावेऽपीत्यादि। दृष्टव्यभिचारस्थले तृणादावेव तत्कल्पनं, न तु सर्वत्र, येनोक्तदोषः 5

पटसामग्रीमपि पक्षीकृत्य 'घटत्वे'त्यापादके 'पटत्वो'पादाने पटभिन्नजनकत्वापादनम्। तथा पटसामग्री यदि पटान्यत्यनेकवृत्तिधर्मावच्छिन्नकार्यतानिरूपितकारणताघटिता न स्यात्,घट-भिन्नजनिका स्यात्। इत्थं पटसामग्रीमपि पक्षीकृत्यापादके 'घटे'त्यत्र 'पटे'त्युपादाने घटजन-कत्वापादनमनेकवृत्तिधर्मावच्छिन्नकारणता च तन्नये[1] 'सांवृत्तिकप्रसिद्धिः। **प्रकाश**कृतस्तु अयं घटो यदि पटजनकयावज्जन्यः स्यात्, पटजातीयः स्यात्, एवं यदि धूमजनकयावज्जन्यः 10 स्यात्, तदा धूमजातीयः स्यात्। एवमन्योन्यजातीयत्वमप्यापाद्यमिति 'सर्वजातीयत्वा'-पादनार्थः। घटभिन्नं कार्यं यदि यावद्घटजनकजन्यं स्यात्, घटजातीयं स्यादि'त्येकजातीयत्वा'-पादनार्थः। कारणपक्षकं तर्कद्वयमाह—**एवमि**ति। घटसामग्री यदि पटप्रयोजकयावद्रूपवती स्यात्,पटजातीयजननी स्यात्,एवं धूमादिजातीयजनकत्वमप्यापाद्यम्। घटान्यकार्यसामग्री यदि घटप्रयोजकयावद्धर्मवती स्यात्, घटजातीयजननी स्यादिति क्रमेणापादनमित्याहुः। तच्चिन्त्यम्। 15 आपादकस्य परानभ्युपगतत्वेन विपर्यये सिद्धसाधनात्। एतावता प्रबन्धेन कार्यमात्रवृत्ति-जातेः कार्यतावच्छेदकत्वं व्यवस्थाप्य 'व्यक्त्योरेवे'ति दूषितम्। तत्र शङ्कते—**कथमि**ति। 'तर्हि' कार्यमात्रवृत्तिजातेः कार्यतावच्छेदकत्वनियमे 'आशुशुक्षणि'र्वह्नि'रेकजातीयः' वह्नित्व-लक्षणकार्यमात्रवृत्तिजातिमान्। तृणत्वाद्यवच्छिन्नकारणतानिरूपितकार्यतावच्छेदकत्वं तस्य निरसितुमाह—**तृणादिभ्यो भवन्नि**ति। परस्परनिरपेक्षेभ्य इति च पूरणीयं, तेन व्यभि- 20 चारितया तदनवच्छेदकत्वलाभः। ननु यद्येकजातीयकारणनियमात् कार्यतानियमस्तर्हि भिन्न-जातीयेभ्यस्तृणादिभ्यः कथमेकजातीयका(11b)र्यमित्याह—**कथमि**तीत्यपरे। **मीमांसक**मुत्तरयति—**एके**ति। तृणारणिमणीनां कारणत्वमिति शेषः। तथा च तादृशावच्छिन्न-कारणतानिरूपितकार्यतावच्छेदकमेवव ह्नित्वमिति नोक्तदोष इति भावः। 'विजातीयेषु'भयवादि-सिद्धानतिप्रसक्तधर्मशून्येषु परस्परमैन्द्रियकेषु 'एके'त्यनुगतधर्मावच्छिन्नकार्यतानिरूपित- 25 कारणतावच्छेदकमतीन्द्रियो धर्मः 'समवेयात्', येन सम्बन्धेन कारणतावच्छेदकत्वं तेन सम्बन्धेन वर्तेत, अतएव मणित्वादेः कालिकसम्बन्धेन तृणादिवृत्तित्वेऽपि न क्षतिः। 'कार्य'विशेषाद्धूमादिलक्षणात् 'कारणविशेषो' वह्न्यादिः 'क्वापि' 'नानुमीयेत' वह्निस्तृणमिवेति निदर्शनम्। 'कारणव्यावृत्त्या' वह्न्यादिव्यावृत्त्या, 'तज्जातीयस्यैव' यादृशेन कारणमनुमीयते, तादृशस्य 'कार्यस्य' धूमादे'र्व्यावृत्ति'श्च 'नावसीयेत'। उभयत्र हेतुमाह—**तदभावेऽपी**ति। 30 वह्न्यादि 'जातीयशक्तिमतो' धूमाद्यनुकूलशक्तिमतो'ऽन्यस्माद्'ह्निभिन्नात् 'तदुत्पत्तिसम्भवात्'

1 B तन्नये omitted before सांवृत्तिक-।

यावद्दर्शनं व्यवस्था भविष्यतीति चेन्न। निमित्तस्याऽदर्शनात्, दृष्टस्य चानिमित्तत्वात्। एतेन सूक्ष्मजातीयादिति निरस्तम्। अवह्नेरपि तत्सौक्ष्म्याद्धूमोत्पत्त्यापत्तेः। कार्यजातिभेदाभेदयोः समवायिभेदाभेदाविव तन्त्रं, न निमित्तासमवायिनीति चेन्न। तयोरकारणत्व-

---

स्यादित्याशङ्क्ते—**यावदि**ति। तृणादावप्येकशक्तिमत्त्वं न दृश्यते, शक्तेरतीन्द्रियत्वात्।
5 अनुमानं त्वन्योन्याश्रयपरमाह। तत्तृणादेः कारणत्वग्रहे शक्तिकल्पनं, तत्कल्पने च व्यभिचाराग्रहात् कारणत्वग्रह इति निमित्तस्यादर्शनं, तृणत्वादिकं च दृष्टत्वावच्छेदकं व्यभिचारादित्याह—**निमित्तस्ये**ति। **एतेने**ति। सौक्ष्म्यञ्च योग्यव्यक्तिवृत्तित्वेऽप्यतीन्द्रियत्वम्। वह्निकुर्वद्रूपत्वजात्या तृणादिकमेकजातीयं कृत्वा कारणत्वग्रह इत्यप्यन्योन्याश्रयादिग्रस्तमित्यर्थः। कार्यलिङ्गकानु[प?]लब्धिलिङ्गकानुमानद्वयभङ्गश्चात्रापीत्याह—
10 **अवह्नेरपी**ति। रासमादेरपि कुर्वद्रू[द्रू?]पतो वह्निसम्भावनायां क्वानुमानमित्यर्थः। ननु वह्नेरेकजात्यं समवायिकारणवह्न्येकजात्यधीनम्, न तु निमित्तकारणसाजात्याधीनमतः किं तत्साजात्यचिन्तयेत्याह—**कार्ये**ति। यदि तद्भेदः कार्यभेदः प्रयोजको न स्यात्, तदा तयोरसाधारणकारणत्वाभावप्रसङ्ग इत्याह—**तयोरि**ति। यद्वा यदि सामान्यं कारणतावच्छेदकं न स्यात्तदा 'तयोः' कारणत्वमेव न स्यात्, ग्रहीतुमशक्यत्वा-
15 दित्याह—**तयोरि**ति। नन्वेकस्यां दण्डव्यक्तौ सत्यां घटोत्पत्तिदर्शनात् कथं न सा

धूमाद्युत्पत्तिसम्भवात्। ननु यदवच्छेदेन यत्रान्वयव्यतिरेकग्रहस्तदवच्छेदेनैव कारणता गृह्यते, न च वह्न्यवह्निसाधारणातीन्द्रियरूपेण धूमत्वावच्छिन्नं प्रति तद्ग्रहः, किन्तु वह्नित्वेनैवेति न कार्यानुपलब्धिलिङ्गकानुमानबाध इत्याह—**यावद्दर्शनमि**ति। 'यावद्दर्शनं' येन रूपेणान्वयव्यतिरेकग्रह'व्यवस्था' तेन रूपेण कारणत्वव्यवस्थितिः। 'निमित्तस्य' तृणादिषु
20 वह्निकारणतावच्छेदकत्वेन भवदभिमतस्य 'अदर्शनात्' अन्वयव्यतिरेकग्रहाविषयत्वात्, 'दृष्टस्य' वह्निविषयेऽन्वयव्यतिरेकग्रहविषयस्य 'अनिमित्तत्वात्' वह्नित्वावच्छिन्नकारणतानिरूपितकार्यतानवच्छेदकत्वात्। **बौद्ध**मतमपवदति—**एतेने**ति। सूक्ष्मादतीन्द्रियात् एकजातीयात् वह्निफलोपधायकमात्रवृत्तिवह्निकुर्वद्रूपत्वरूपजात्यवच्छिन्नात्। सूक्ष्मत्वं विशेष्ये बाधात् तादृशजातौ विशेषणेऽन्वयि तेन सूक्ष्मा या तादृशी जातिस्तदवच्छिन्नादिति फलति।
25 'आशुशुक्षणिरेकजातीय' इति प्राक्तनेनानुषङ्गान्निराकांक्षप्रतिपत्तिः। 'तत्सौक्ष्म्यात्' सूक्ष्मतादृशजातिमतः, तथा चोक्तानुमानद्वयभङ्ग इति भावः। ननु समवायिकारणताग्रह एव व्यभिचारग्रहो[हे?] विरोधी, न तु निमित्तासमवायिकारणत्वग्रहे; तथा च 'तृणत्वादिनैव[12a] वह्निसामान्यं प्रति हेतुत्वं गृह्यतामित्यभिप्रायेण तत्र विनिगमकमाह—**कार्यजाती**ति। तथा च यादृशकारणसाजात्यं कार्यसाजात्यप्रयोजकं यादृशकारणवैजात्यञ्च कार्यवैजात्यप्रयोजकं तत्रैव
30 व्यभिचारग्रहस्तत्कारणताग्रहे विरोधी नान्यकारणताग्रह इत्याखण्डलार्थः। 'समवायिभेदाभेदौ' तत्साजात्यवैजात्ये 'न निमित्तासमवायिनी' न निमित्तासमवायिसाजात्यवैजात्ययोर्निमित्तासम-

प्रसङ्गात्। न हि सति भावमात्रं तत्, किन्तु सत्येव भावः। न च जातिनियमे समवायिकारणमात्रं निबन्धनम्, अपि तु सामग्री। अन्यथा द्रव्यगुणकर्मणामेकोपादानकत्वे विजातीयत्वं न स्यात्। न च कार्यद्रव्यस्यैव जातिरिति युक्तम्। आरभ्यगुणैर्व्याप्यजातीयैरारम्भदर्शनात्।

कारणतत्त्वम् आह—**न हीति**। **किन्त्विति**। तां विनापि घटकारणान्तरदर्शनात्, व्यभिचारात् सा कथं हेतुः स्यात्। न हि तस्यां सत्यामेव घटो भवतीति नियमः, तथा भावानन्तरं तज्जातीयत्वे तन्त्रनियमः। समवायिकारणसाजात्यमात्रनिबन्धनं तत्साजात्यमित्यत्र व्यभिचारमाह **न चे[चे?]ति**। द्रव्यसमवायिकारणानां द्रव्यगुणकर्मणां वैजात्यदर्शनात्। तर्हि कार्यसाजात्ये किं निबन्धनं तत्राह—**अपि त्विति**। एकजातीयकारणजन्यकार्याणां कार्यसाजात्यनियमः, न तु द्रव्यरूपकार्यसाजात्यं समवायिकारणसाजात्यनिबन्धनमत आह—**न चेति**। व्यभिचारमाह—**आरब्धेति**।

व्यभिचारितत्वेन नियमनकारणस्य साहित्याभावप्रसङ्गात्। कारणतत्त्वस्य नियामकत्वं मुक्तिमाह—**न हीति**। 'सति' कारणसामग्र्यां 'भावः' सत्त्वं कार्यस्याभिमतस्य व्यभिचारिजातीयस्याप्यापत्तेरिति भावः। उक्तं नियामकं दूषयति—**न चे[चे?]ति**। 'जातिनियमे' कार्यसाजात्ये 'समवायिकारणमात्रम्' एकजातीयसमवायिकारणकत्वं तत्कार्यतावच्छेदकरूपेणैकजातीयत्वप्रयोजकमिति भावः। 'सामग्री' तत्साजात्यमन्यथा सजातीयसमवायिकारणकत्वम्, एकधर्मावच्छिन्नसमवायिकारणकत्वं वा तत्कार्यतावच्छेदकरूपेण कार्यसाजात्यप्रयोजकं द्रव्याणां स्यात्। गुणानां संयोगविभागादीनां कर्मणाञ्च एकोपादानकत्वे द्रव्यसमवेतजन्यगुणसमवायिकारणकत्वेन विजातीयत्वं स्यात्, तत्कार्यतावच्छेदकरूपेण साजात्यं स्यात्। **न चे[चे?]ति**। तथा च सजातीयसमवायिकारणकद्रव्यत्वं तद्व्याप्यमिति भावः। 'अवयवैः' परमाणुभिर्द्व्यणुकारम्भदर्शनात्' दधिद्व्यणुकारम्भदर्शनादिति प्रमाणसूचनाय। न चात्र प्रमाणाभावः, सति दुग्धे दध्यारम्भादर्शनेन तज्जातीयस्य हेतुत्वकल्पनस्य च व्यभिचारात्, स्यानिष्टत्वाद् दधिद्व्यणुकं प्रति सामानाधिकरण्यप्रत्यासत्त्या दुग्धनाशो हेतुर्वाच्यः। न च निर्गुणद्रव्यसम्भवाद्दध्यारम्भापत्तिरिति वाच्यम्, अम्लसंयोगसंयुक्तदुग्धारम्भकस्य दधिजनकत्वोपगमात्। तत्र दधिजातीयद्रव्यध्वंसेन वाच्यं, तेन दधिद्व्यणुकनाशानन्तरं तद्व्यणुकोत्पादेऽपि न क्षतिः। अम्लसंयोगः पाकविशेषसहकारेण रसविशेष एव हेतुः, न दुग्धध्वंस इति तु उपायः, दध्यारम्भकतावच्छेदकरसविशेषवत्त्वं रसविशेषवत्त्वेन वा जन्यतावच्छेदकं तत्, न च रसवृत्तितादृशजातेः कारणत्वमनुगतं दुर्वचमिति वाच्यं, पृथिवीत्वेनैव तदवच्छिन्नं प्रति हेतुत्वोपगमात्। त[12b]द्व्याप्यञ्च जातिद्वयम्, एकं पाकविशेषजन्यतावच्छेदकम्, अपरञ्च दधिजन्यतावच्छेदकं, विशेषसामग्रीमादायैव सामान्य-

एतेनाऽपोहवादे नियमो निरस्तः । 'कार्यकारणभावाद्' इत्यादिविरुद्धप्रसङ्गात् ।

ननु तृणारणिमणीनां शक्त्यैकेन तृणादीनां कारणत्वग्रहः स्यादित्यत आह—एतेनेति । अत्रापि वह्निविजातीयान्यत्वेन धूमं प्रति कारणता स्यादिति धूमाद्वह्न्यनुमानं न स्यात् । 'नियमः' कारणता । न हि सर्वत्र कारणविशेषस्यानुमानमिति धूम
5 इति भावः । यद्यपि वह्नौ वैजात्यं योग्यानुपलब्धिबाधितम्, तथा च एकशक्तिमत्त्वेनैव तृणादीनां कारणत्वं कल्पयितुमुचितम्, तथापि नानास्थलेष्वरणिषु, मणिषु, तथा फूत्कारादौ शक्तिनानात्वकल्पनापेक्षया वह्निवैजात्यकल्पनमेव लाघवादुचितम् । फूत्काराद्यनन्तरजायमानवह्निव्यक्तिषु तदुपलम्भोऽप्यस्ति, स्वर्ण[द्रव्य ?]कयोरिव श्यामकपिशयोः । न च यथा समवायिकारणासमवायिकारणध्वंसजन्यद्रव्यध्वंसे
10 वैजात्यमन्तरेणापि कार[ण]त्वमेकशक्तिम[त्त्वे ?]नैव वाच्यम्, तथा प्रकृतेऽपि किं न स्यादिति वाच्यं, तत्रापि समवायिकारणनाशनाश्यद्रव्यनाशत्वेन, असमवायिकारणनाशनाश्यद्रव्यनाशत्वेनैव तदुभयकारणत्वात् । यद्वा विद्यमानाश्रयिकद्रव्यनाशत्वेनासमवायिकारणमस्य द्रव्यनाशं प्रति कारणत्वात् । तदुभयनाशजन्यो नियमः ।

सामग्र्याः कार्यजनकत्वे च नातिप्रसङ्गः । अतएव दुग्धप्राचुर्ये दधिप्राचुर्यमित्याहुः ।
15 अतएव दधिद्व्यणुकं दुग्धोपादानोपादेयं दुग्धध्वंसजन्यद्रव्यत्वात्, यद्द्रव्यध्वंसजन्यं यद्द्रव्यं तत्तदुपादानोपादेयकं महादुग्धध्वंसजन्यखण्डदुग्धवदित्यप्यनुमानम् । अत्र सामानाधिकरण्यप्रत्यासत्त्या ध्वंसमात्रवृत्तिधर्मावच्छिन्नत्वेन वा कारणत्वस्य लाभाय प्रथमद्रव्यपदं, तेन कालोपाधितया घटादिध्वंसजन्यघटादौ न व्यभिचारः । महादुग्धोत्पत्तिकाले खण्डदुग्धोत्पत्तिवारणाय तद्धर्मो तद्ध्वंसत्वेनैव हेतुत्वोपगमात् न दृष्टान्तासिद्धिः । **केचित्तु**
20 भावाभावसाधारणध्वंसत्वस्य व्याप्तिघटकतया कपालप्रागभावध्वंसात्मककपालजन्ये घटे प्रागभावोपादानोपादेये व्यभिचारवारणाय तत् । न च प्रागभावोपादानाप्रसिद्ध्या न तथेति वाच्यं, तत्साधारणसम्बन्धस्यैवोपादानपदार्थत्वात् । हेतुमति साध्याप्रसिद्धेरपि दोषत्वाच्च । कपालध्वंसजन्ये घटध्वंसे व्यभिचारवारणाय चरमद्रव्यपदम् । ब्राह्मणादिशरीरध्वंसस्य नारकिशरीरं प्रति हेतुत्वोपगमेऽपि न सामानाधिकरण्यप्रत्यासत्त्या तथात्वं दृष्टद्वारा
25 वा तज्जन्यत्वं वाच्यं, न चाप्रत्यक्षत्र्यणुकद्व्यणुकानां तत्र कल्पनायां गौरवेण तेषामेवावयवानां तथात्वकल्पने लाघवादिति भावात् । **एकदेशिनस्तु** परमाणुसाधारणो जातिविशेष एव दधिजनकतावच्छेदको लाघवात्, अन्यथावयव्यपि स्वल्पयोग्य एव, कॢप्ते च तेन रूपेण कारणत्वे उपादानकल्पनागौरवं न दोषाय । एतेन दुग्धादयो व्याख्याताः । दुग्धध्वंसस्य च दधिजनकत्वस्यापि कथञ्चिद्विलक्षणस्याभावस्यान्वयव्यतिरेकाभ्यां हेतुत्वोप-
30 गमान्नातिप्रसङ्ग इत्याहुः ।

एतेनेति । तृणाद्यन्यान्यत्वेनैव वह्निसामान्यं प्रति कारणत्वमित्यत्रापि कार्येण कारणानुमानं न स्यात्, वह्निविशेषान्यान्यत्वेनैव तथापि धूमं प्रति हेतुत्वमिति व्यभिचारसंभवात् । अथैतस्मिन् तत्सिद्धान्तविशेषमाह—**कार्यकारणे**ति । आदिपदात् स्वभाव

तस्मान्नियतजातीयतास्वभावभङ्गे न[1] व्यक्त्यपेक्षयैव नियम इति फुत्कारेण तृणादेरेव, निर्मन्थनेनारणेरेव, प्रतिफलिततरणिकिरणैर्मणेरेवेति प्रकारनियमवत्तेनैव व्यज्यमानस्य

"कार्यकारणभावाद्वा स्वभावाद्वा नियामकात् ।
अविनाभावनियमोऽदर्शनान्न न दर्शनात्" ॥

इति त्वदभ्युपगमः । तत्र स्वभावनियमेऽपि कार्यकारणभाव एव तन्त्रम् । तद्भङ्गे[1] तस्यापि भङ्ग इत्यर्थः । **कथं तर्हीत्या**द्याक्षेपमुपसंहरति—**तस्मादि**ति । **व्यक्त्यपेक्षयैवे**ति । पूर्वव्यक्तिरुत्तरव्यक्तौ कारणं, न तु जातिनियता कारणतेत्यर्थः । **फुत्कारेणे**ति । फुत्कारादि···(?)···नियतसहकारिसमवहिततृणादिजन्यवह्निषु वह्नित्वावान्तरजातित्रयकल्पनेन व्यभिचारविरहान्न जातिगर्भकार्यकारणभावभङ्ग इत्यर्थः । 'प्रकारनियमः' सहकारिनियमः । वह्निवैचित्र्योपपादनेनावान्तरजातिभेदं 10

नियमपरिग्रहः । तत्रापि कार्यकारणभावस्यैव मूलत्वात् व्यक्त्योरेव नियमोऽस्त्विति वादी उपसंहरति—**तस्मादि**ति । नियतजातीयतास्वभावभङ्गे कार्यमात्रवृत्तिजातित्वस्य कार्यतावच्छेदकत्वव्याप्तिभङ्गे वह्नौ वह्न्यर्थिप्रवृत्तिदर्शनाद् वह्निसामान्ये विलक्षणस्पर्शवत्त्वेन तादृशस्पर्शत्वेनैव वा हेतुत्वं वाच्यम्, [13a] अन्यथा इष्टस्वरूपयोग्यतानिश्चयं विना प्रवृत्त्याद्यनुपपत्तेरिति सामान्यतस्तत्त्वे **मूलम्** । तत्र यदि इष्टस्वरूपयोग्यतानिश्चयाधीना 15 प्रवृत्तिस्तदा तृणादौ प्रवृत्तिर्न स्यात्, वह्निसामान्यं प्रति तेषां व्यभिचारात् । व्यक्तिविशेषं प्रति तस्य च प्रवृत्त्यप्रयोजकत्वमित्याभिप्रायिकं बाधकं निरस्यन्नाह—**ने**त्यादि । अत्र कार्यनिष्ठजातित्रयकल्पने तत्साक्षात्कारं प्रति कारणत्रयकल्पने च गौरवात्, उभयसिद्धक्लृप्तकारणभावेषु तृणादिषु फुत्कारादिषु च शक्तिद्वयं कारणतावच्छेदकमेव कल्प्यते । यदा च व्यभिचारसन्देहस्तदा तेन तदनुमानेऽपि न क्षतिरिति पुनरुपस्थितं **मीमांसकं** 20 निरस्य जातित्रयं व्यवस्थापयति—**फुत्कारेणे**त्यादिना । यदि तादृशैकशक्तिमत्त्वेन कारणत्वं, तदा फुत्कारसहकारात् तृणादिवाऽरण्यादेरपि निर्मन्थनादिसहकारात् तृणादपि वह्निः स्यादिति, तृणजन्यतावच्छेदकमेव फुत्कारजन्यतावच्छेदकमेवमन्यत्रापि बोध्यमिति गुर्वप्यन्यथानुपपत्त्या जातित्रयमेव तत्तत्कार्यतावच्छेदकं कल्प्यते इत्यर्थः । 'प्रकारनियमवत्' सहकारिनियमवत् । अनुपलब्धिबाधमुद्धरति—**तेनैवे**ति । कारणविशेषजन्यत्वेनैवेत्यर्थः । 25

---

1 गुणानन्द and शङ्करमिश्र read भङ्गे न instead of भङ्गेन ।

कार्यजातिभेदस्य भावात्। दृश्यते च पावकत्वाविशेषेऽपि प्रदीपः प्रासादोदरव्यापकमालोकमारभते, न तथा ज्वालाजालजटिलोऽपि दारुदहनो, नतराञ्च कारीषः।

यस्तु तं नाऽऽकलयेत्, स कार्यसामान्येन कारणमात्रमनुमिनुयादिति किमनुपपन्नम्? एवं तर्हि धूमादावपि कश्चिदनुपलक्षणीयो विशेषः स्याद् यस्य दहनापेक्षेति न धूमादिसामान्याद्वह्निसामान्यादिसिद्धिः[1]। एतेन व्यतिरेको व्याख्यातः। तथा च कार्यानुपलब्धि-

---

साधयति—दृश्यत इति। विवादपदं वह्नयो वह्नित्वावान्तरसामान्यवत्ता[न्तो?] नियतसहकार्यनुप्रवेशेन जायमानत्वात् प्रदीपादिवदित्यनुमानमित्यर्थः।

ननु वैजात्यं दुरूहमतः कथं कारणानुमानमत आह—यस्त्विति। द्रव्यनाशे तु समवायिनिरूपितयावत्कारणनाशजन्यनाशत्वेन निमित्तेतरकारणनाशजन्यनाशत्वेन वा कारणत्वमिति भावः। एवं सति धूमसामान्येन वह्निसामान्यानुमानं न स्यात्, धूमेऽपि वैजात्यशङ्कातादवस्थ्यादित्याह—एवं तर्हीति। न वा वह्नयभावेन धूमाभावोऽनुमीयेत कारणान्तराधीनधूमसद्भावसम्भवादित्याह—एतेनेति। 'व्यतिरेको' व्यतिरेकानुमानभङ्गः। कार्येति। 'कार्यलिङ्गकं' कार्येण कारणानुमानम् 'अनुपलब्धि-

---

'जातिभेदस्य' वह्नयवान्तरजातीनां 'भावात्' सत्त्वात्। ननु वह्नित्वं न जातिव्यापकं वह्नीतरावृत्तित्वात् तद्रूपवत् इत्यनुमानबाधितं तत् स्यादित्यत आह—दृश्यते चेति। तथा च कार्यविशेषजनकतावच्छेदकत्वेन तद्व्याप्यजातेरवश्योपगमात् नोक्तानुमानमिति भावः। 'पावकत्वाविशेषेऽपी'त्यनेन तत्तत्कार्यविशेषे पावकसामान्यस्यान्वयव्यभिचारो दर्शितः।

'यस्तु तं' वह्निगतं जातिभेदं 'नाकलयेत्' न गृह्णाति, 'स कार्यसामान्येन' वह्निमात्रेण 'कारणमात्रं' वह्निसामान्यकारणमात्रं विलक्षणस्पर्शादिमन्तमेव वा, न तु विशिष्य तृणादिकम्। दीधितिकृतस्तु तृणफुत्कारयोररणिनिर्मन्थनयोर्मणितरणिकिरणयोर्ये सम्बन्धविशेषास्तेषामेवैकशक्तिमत्त्वेन कारणत्वं कल्प्यत इति नातिप्रसङ्ग इत्याहुः। 'एवं' वह्नाविव। तर्हीति। 'न 'दहनादिसिद्धिरि'त्यत्रान्वयी। 'अनुपलक्षणीयः' कार्यकारणविशेषव्यङ्ग्यः 'विशेषः' जातिविशेषः। यद्धर्मस्य यदवच्छिन्नस्य 'व्यतिरेकः' वह्निसामान्यव्यतिरेकः 'व्याख्यातः' अलिङ्गतया निरूपितः। 'कार्यं' धूमादि, 'अनुपलब्धिः' प्रतियोग्यनुपलम्भ-

---

1 धानन्द reads दहनादिसिद्धिः for वह्निसामान्यादिसिद्धिः।

लिङ्गभङ्गे स्वभावस्याप्यसिद्धेर्गतमनुमानेनेति चेत्, प्रत्यक्षानुपलम्भगोचरो जातिभेदो न कार्यप्रयोजक इति वदतो **बौद्धस्य** शिरस्येष प्रहारः। अस्माकन्तु यत्सामान्याक्रान्तयोर्ययोरन्वयव्यतिरेकवत्ता तयोस्तथैव हेतुहेतुमद्भावनिश्चयः। तथाचाऽवान्तरविशेषसद्भावेऽपि न नो विरोधः। किं पुनस्तार्णादौ दहनसामान्यस्य प्रयोजकम्? तृणादीनां विशेष एव नियतत्वादिति चेत्, तेजोमात्रोत्पत्तौ पवनो निमित्तम्, अवयवसंयोगोऽसमवायी, तेजोऽवयवाः समवायिनः। 5

लिङ्गं' कारणानुपलब्ध्या कार्याभावानुमानमित्यर्थः। **स्वभावस्यापी**ति। तत्रापि कार्यकारणभावविलोपप्रसङ्ग एव विपक्षबाधक इति भावः। 'प्रत्यक्षानुपलम्भगोचरो'ऽन्वयव्यतिरेकगोचरः। अङ्कुरतावच्छिन्नकार्यं प्रति बीजत्वेन न कारणता, किन्तु ऊर्वद्रू[कुर्वद्रू?]पत्वावच्छेदेन कारणत्ववादिन इत्यर्थः। **एष प्रहार** इति। अनुमानमात्रभङ्गप्रसङ्ग इत्यर्थः। तन्मतेऽङ्कुरेण बीजानुमानं धूमेन वह्न्यनुमानञ्च न स्यात्, वह्नित्वादेस्तत्राप्रयोजकत्वात्, कुर्वद्रूपस्य च दुर्ज्ञेयत्वादिति भावः। स्वमतमुपपादयति— **अस्माकं त्वि**ति। बाधकाभावेन वह्नित्वधूमत्वावच्छेदेनैव कार्यकारणभावग्रहादनुमानमप्रत्यूहमेव, तृणादिस्थले तु व्यभिचारान्न सामान्यतः कार्यकारणभावग्रह इति भावः। **अवान्तरे**ति। पाण्डरधूमत्वेन पालालकवह्नित्वेन कार्यकारणभावेऽपि सामान्यानुमानमिति भावः। ननु यदि तृणादीनां विशेषेष्वेव कारणता तदा वह्नित्वमाकस्मिकं स्यादित्याह—**किं पुनरि**ति। तथा च वह्निसामान्येन कस्यापि कारणस्याप्यनुमानं न स्यादिति भावः। अस्तु तावद्वह्निसामान्यप्रयोजकनिर्वचनम्। तद्व्यापकव्याप्यधर्मावच्छिन्नस्यापि कारणं निर्वक्तुं शक्यत इति प्रादि[प्रौढि?]वादेनाह— **तेजोमात्रोत्पत्तावि**[ति?]। कार्यतेजोमात्रेत्य[र्थः?]। प्रदीपादौ पवनस्य कारणता 20

गम्यः कारणाभावः, तयो'र्लिङ्ग'त्व'भङ्गे' [13·b] उक्तप्रणाल्या व्यभिचारसंशयेन व्याप्यग्राहकत्वे 'स्वभावस्य' तादात्म्येन शिंशपादेरसिद्धेरप्रयोजकत्वेन वृक्षादिनिरूपितव्याप्यसिद्धेः, तत्रापि कार्यकारणभावस्यैव मूलत्वात्। 'प्रत्यक्षानुपलम्भगोचरो' यदवच्छेदेनान्वयव्यतिरेकज्ञानं 'न कार्ये प्रयोजकः' न कारणतावच्छेदकमपि त्वतीन्द्रियं तत्कार्यकुर्वद्रूपत्वम्।

'अन्वयव्यतिरेकवत्ता' सहचारदर्शनव्यभिचारज्ञानव्यतिरेकौ 'तयो'स्तज्जातीययोः 'तथैव' तत्सामान्यावच्छेदेनैव वह्न्यन्वयव्यतिरेकग्रहात् तेन रूपेण वह्निजन्यत्वं न त्वप्रामाणिकेनेति भावः। अत्र दृष्टान्तार्थमन्यदप्याह—**तेज** इति। जन्यते[ज]स्त्वावच्छिन्न इत्यर्थः। **पवन** इति। [1]आगमश्चात्र प्रमाणम्। **अवयवे**ति। कार्यैकार्थप्रत्यासत्त्या कारणत्वस्[च]नाय। अतएव पूर्वदीपनाशे दीपान्तरानुत्पत्तिः। 'तेजोऽवयवाः' 25

---

[1] तथा च "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः, आकाशाद्वायुः, वायोरग्निः"। अत्र अग्निपदं तेजोमात्रवाचकं पृथिव्यादिसहचारात्। "अग्नेरापः, अद्भ्यः पृथिवी, पृथिव्या ओषधयः, ओषधीभ्योऽन्नम्, अन्नात् प्रजाः प्रजायन्त," etc. 30

इयमेव सामग्री गुरुत्ववद्द्रव्यसहिता पिण्डितस्य। इयमेव तेजोगतमुद्भूतस्पर्शमपेक्ष्य दहनं, तत्राऽपि जलं प्राप्य दिव्यं, पार्थिवं प्राप्य भौमम्, उभयं प्राप्योदर्यमारभत इति स्वयमूहनीयम्। तथाप्येकमेकजातीयमेव वा किञ्चित्कारणमस्तु, कृतं विचित्रेण। दृश्यते ह्यविलक्षणमपि विलक्षणाऽनेककार्यकारि। यथा प्रदीप एक एव तिमिरापहारी,
5 वर्तिविकारकारी, रूपान्तरव्यवहारकारीति चेन्न, वैचित्र्यात्कार्यस्य।

गृहीतैव, निर्वाते दीपनिर्वाणदर्शनात् 'यद्विशेषयो'रिति न्यायात् सर्वत्रैव जन्यतेजसि पवनः कारणमिति भावः। गुरुत्ववद्द्रव्यमुपष्टम्भकपार्थिवपिण्डितसुवर्णं, दिव्यं विद्युदादि, 'भौमं' भौमेन्धनप्रभवम्, 'उभयं' जलं पार्थिवञ्चेति। **एकमिति**। वेदान्तिमतं, तेषां ब्रह्मैवैकं प्रपञ्चस्य कारणं किमीश्वरेण। **एकजातीयमिति**। एका प्रकृतिर्नाना-
10 पुरुषोपरागाद्भिन्ना, प्रकृतेरैक्याच्चैकजातीया, सकलभूतभौतिककारणं, किमीश्वरेणेति **सांख्याः**। विशिष्टभेदेऽप्यविशिष्टैक्यादेकजातीयत्वमित्यर्थः। तेषां नानापुरुषोपरक्तप्रकृतेरेव कारणत्वमिति भावः। अत्र दृष्टान्तमाह—**यथेति**। तिमिरमत्र तेजःप्रागभावः, तदपहारी तन्नाशकः। दीपेन तेजःप्रागभावविनाशरूपतेजोऽन्त[न्त?]-रजननात्। वर्तिविकारो भस्मीभावो रूपपरावृत्तिर्वा, रूपान्तरं घटादिस्वरूपं,
15 तद्व्यवहारी तत्साक्षात्कारजनक इत्यर्थः। **वैचित्र्यात् कार्यस्येति**। विचित्रं कार्यं विचित्रकारणनियम्यं, न त्वेकस्मादेकजातीयाद्वा कारणान्निर्वहतीति भावः ॥६॥

स्यावयवाः, तेज इति विजातीयारम्भकत्वनिरासाय। 'इयमेव' तेजःसामान्यसामग्र्येव 'द्रव्यसहिता' पार्थिवसुवर्णसहकारेण पिण्डस्य तैजससुवर्णस्य, 'उद्भूतस्पर्शं' दाहकस्पर्शं, 'दिव्यं' विद्युदादि, 'उभयं' जलं पार्थिवञ्च। एतावता प्रबन्धेन कार्यमात्रं सहेतुकं
20 व्युत्पाद्य हेतुत्वे परलोकीयत्वाभावनिबन्धनाश्रयासिद्धिरुद्धृता।

अदृष्टे परलोकसाधनत्वाभावनिबन्धनामाश्रयासिद्धिमभिप्रेत्य वैचित्र्यादिपूर्वकारिकांशं व्याकर्तु **तथापीति**। **एकमिति**। **एकदण्डिनां** मतं, ये ब्रह्मैककारणं प्रपञ्चजातमामनन्ति। **एकजातीयमिति**। **सांख्यानां** मतम्। तेषां कार्याणां कारणाभिन्नतया, सर्वाण्येव प्रकृतिजातीयानि प्रकृत्यधिष्ठानञ्चासदादिनापि शक्यमिति तदर्थं
25 नेश्वरसिद्धिः। न वा क्षित्यादिकर्तृतया आत्ममात्रस्यैवाकर्तृत्वादिति 'विचित्रेण' परलोकसाधनेनादृष्टेन। तथा च किं केनाविधेयमिति भावः। ननु एकस्मादेकजातीयाद्वा न विलक्षणकार्यं दृश्यते तत् कथमेतदित्यत्राह—**दृश्यते हीति**। 'अविलक्षणं विलक्षणकार्यकारि' एकमनेककार्यकारि। यथाश्रुते 'विलक्षणानेके'त्यत्रानेकपदवैयर्थ्यं, बहुत्वं वानेकत्वम्, अतएव दीपस्य वि[14a]लक्षणकार्यकारित्वं दर्शयिष्यति। 'तिमिरापहार'
30 आलोकस्तत्'कारी' समवेतालोककारीत्यर्थः। 'वर्त्तिविकारः' पूर्वरूपादिनाशः रूपाद्यन्तरोत्पादो वा; रूपाद्यन्तरं घटादिरूपं तद्व्यवह्रियतेऽनेनेति व्युत्पत्त्या साक्षात्कारविशेषलाभस्तत्'कारी'त्यर्थः। वस्तुतस्तु साक्षात्कारीत्येतावतैव मुख्यतायां 'रूपान्तरे'त्यस्य वैयर्थ्यात् 'रूपान्तरं' 'व्यवहार'श्च करणव्युत्पत्त्या चाक्षुषसाक्षात्कारस्तत्'कारी'त्यर्थो ज्यायान् ॥६॥

एकस्य न क्रमः क्वापि वैचित्र्यञ्च समस्य न ।
शक्तिभेदो न चाभिन्नः स्वभावो दुरतिक्रमः ॥७॥

न तावदेकस्मादनपेक्षादनेकम् । अक्रमात् क्रमवत्कार्यानुपपत्तेः । क्रमवत्तावत्कार्य-

---

तदुपपादयति—**एकस्येति** । न क्रमो न क्रमकारित्वमित्यर्थः । **वैचित्र्यञ्चेति** ।
विचित्रकार्यजनकत्वमित्यर्थः । **समस्य** एकस्य एकजातीयस्य वा **शक्तिभेदो**ऽपि 5
कार्यवैचित्र्यनियामकेनोपपद्यते । हेत्वर्थो स यतो धर्म-धर्मभेदादभिन्न एव, एकस्य
एकजातीयस्य वा स्वभावादेव कार्यवैचित्र्यं स्यादित्यपि न दहनजनकस्वभावश्चेत्,
कथमदहनं जनयेत्, 'स्वभाव'स्य 'दुरतिक्रम'त्वादित्यर्थः ।

अनपेक्षत्व[?]ात् स्वभावनिरपेक्षत्वात् । **अक्रमात्** अक्रमकारिणः ।
क्रमवदिति । एकस्यैव क्रमवत्कार्यजननस्वभावत्वात् तत्कार्यं तथा क्रमवदित्यर्थः । 10

क्रमिकत्वमपि वैचित्र्यं वैजात्यञ्चेत्याविष्कर्तुमाह—

एकस्येति । एकस्याः सामग्र्या यत् कार्यं तस्य 'न क्रमः', तथा चानन्तरोत्पत्तिको
घटो यदि पूर्वोत्पन्नघटकारणमात्रजन्यः स्यात्, तद्घटोत्पत्त्यनन्तरोत्पत्तिको न स्यात्,
तद्घटवदिति । एवं पूर्वोत्पत्तिकं घटं पक्षयित्वा प्रागुत्पत्तिकत्वाभाव आपाद्यः । 'समस्य'
अविलक्षणायाः सामग्र्या यानि कार्याणि तत्र 'वैचित्र्यं' वैलक्षण्यं 'न', तथा च घटो यदि 15
पटसामग्र्यविलक्षणसामग्रीकः स्यात्, पटविलक्षणो न स्यात्, पटवदिति भावः ।
नन्वेकस्या एकजातीयायाश्च सामग्र्या एव शक्तिभेदोऽङ्गीकार्यो यदधीनं कार्ये क्रमिकत्वं
वैचित्र्यञ्चेत्यत्राह—**शक्तिभेदो न चाभिन्न** इति । 'शक्तिभेदः' कार्यस्य क्रमे
वैचित्र्ये वा 'न' नियामकः, 'चो' हेतौ, यतः स आश्रयाभिन्नः, तथा च स्वाभिन्नतया
स्वमिव न कार्यस्य क्रमे वैचित्र्ये वा स नियामक इति भावः । तस्य ततो भिन्नत्वे तु 20
तस्यापि कारणतया नैकहेतुत्वं नैकजातीयहेतुकत्वं वेति भावः । नन्वेकस्या
एकजातीयाया वा अयमेव स्वभावो यत् क्रमिकं विजातीयञ्च कार्यं जनयति, अतएव
त्वयैवाभिहितमीदृशस्य 'स्वभाववादस्येष्टत्वादि'ति तत्राह—**स्वभावो दुरतिक्रम**
इति । तथा चैक एव घटो यदि स्वोत्पत्त्यपेक्षया क्रमिकोत्पत्तिकः स्यात्, तदा
स्वापेक्षया विलक्षणः स्यात्, तादृशस्वभावकसामग्रीकत्वादिति भावः । 25

अनेकत्वपरतयापि वैचित्र्यपदं व्याचष्टे—**न तावदिति** । तथा चैतद्भिन्नं कार्यं
यद्येतत्कारणमात्रजन्यं स्यादेतद्भिन्नं न स्यादिति भावः । अनेकपदस्य क्रमिकपरत्वे
यथाश्रुतमेव । 'अक्रमात्' तत्तत्कार्यानुकूलक्रमिकसहकारिविधुरात् 'क्रमवत्कार्यानुपपत्तेः'
क्रमिककार्योत्पत्त्यसम्भवात् शङ्कते—**क्रमवदिति** । क्रमवत्तावतां कार्याणां यथाऽयौग-

कारणस्वभावत्वात्तस्य तत्तथा यौगपद्यवदिति चेत्, अयमपि क्षणभङ्गे परिहारो, न तु सहकारिवादे। पूर्वपूर्वानपेक्षायां क्रमस्यैव व्याहतेः। क्रमनियमे त्वनपेक्षानुपपत्तेः। नाप्यनेकमविचित्रम्। यदि ह्यन्यूनमनतिरिक्तं वा दहनकारणमदहनस्यापि हेतुर्नासाव-

---

यौगपद्यवदिति सप्तम्यन्ताद्वतिः। यथा यौगपद्ये युगपत् कार्यजनने सामर्थ्यं तथेत्यर्थः।
5 **क्षणभङ्ग** इति। तन्मते समर्थस्य चेपायोगेन एकदैव तावत्कार्यकारित्वं सम्भवति ब्रह्मवत्, क्षणिकं त्वया [?] नाभ्युपगम्यते किन्तु स्थिरं, तस्य च क्रमवत्कार्यजननं क्रम[व]त्सहकारिसापेक्षमित्यर्थः। **केचित्तु** 'अयं परीहारः' क्षणभङ्गवादे वै क्रमते, स्वभाववाद इति यावत्, 'न तु सहकारिवादे'; स्थिरपक्षे स्वभावस्य धर्म्यभिन्नत्वे क्रमवत्कार्यानुपपत्तिः। धर्म्यभिन्नत्वे तस्यैवापेक्षायां नैकमेव ब्रह्मस्वरूपं कारणनिरपेक्ष-
10 मित्यर्थ इत्याहुः। स्वभाववादस्य निरस्तत्वे सहकार्यनपेक्षायां दोषमाह—**पूर्वपूर्वे**ति। आगन्तुक इत्यर्थः। यदि कार्याणि स्वपूर्ववर्त्यागन्तुककारणानपेक्षाणि स्युः, क्रमवन्ति न स्युः। क्रमवन्ति च तस्मादागन्तुककारणानपेक्षाणीत्यर्थः। **क्रमस्यैवे**ति। त्वयाभ्युप-गन्तुं न शक्यते क्रम इत्यर्थः। ननु मया क्रमोऽभ्युपगम्यते, सापेक्षत्वं तु कारणस्य वाभ्युपगम्यत इत्यत आह—**क्रमनियमे त्वि**ति। अनपेक्ष्यानुक्तत्वादिति[?] भावः।
15 ज्ञानकारणादन्यूनकारणं सुखं[?]न तु ज्ञानजाती[?]मत उक्तम्—**अनतिरिक्त**मिति। अदहनो दहनान्योन्याभाववान् घटादिः, तथा च घटो यदि यावद्दहनजनकजन्यः स्याद्,

---

पद्यमित्यर्थः। **अयमपी**ति। यदि कु[14b]शूलस्थबीजमङ्कुरसमर्थं स्यात् स्वोत्पत्त्यनन्तर-मेव कुर्यात्, न करोति च तं तदा तस्मान्न तत्समर्थमिति विरुद्धधर्माध्यासलक्षणभङ्गसाधने अयं कारणस्य क्रमवत्तावत्कार्यकरणस्वभावत्वरूपः 'परीहारः' शोभते सहकारिसमवधान-
20 क्रमस्यैव तादृशस्वभावनिर्वाहकत्वात्, 'न तु सहकारिवादे' यः पूर्वपक्षस्तद्वादिनस्तु 'नायं परीहारः', तत्स्वभावनिर्वाहकसहकारिसमवधानक्रमानुपगमात् इति अक्षरतात्पर्ययोरर्थः। 'पूर्वपूर्वानपेक्षायां' सहकारिसमवधानक्रमानुपगमे 'क्रमस्यैव व्याहतेः', क्रमपदार्थस्यैवानुपपत्तेः क्रमघटकानां तावतां क्षणानां युगपदुत्पादे कमाश्रित्य क्रमो निर्वक्तव्य इति भावः। 'क्रमनियमे' तावतां क्षणानां क्रमेणैवोत्पादे 'अनपेक्षानुपपत्तेः' अनपेक्षार्थानुपपत्तेः।
25 'अनेकमि'त्यस्य क्रमिकमिति शेषः, तस्यैव वा सोऽर्थः, तेन न प्रागुक्तदोषः। 'अनेक-मि'त्यत्र 'कारणमस्त्वि'ति प्राक्तनमनुषञ्जनीयम्। अदहनः यदि दहनकारणताव्यापक-स्वनिष्ठकार्यतानिरूपितकारणताकः स्यात्, दहनकारणताव्याप्यस्वनिष्ठकार्यतानिरूपित-

दहनो ऽदहनो वा स्यादुभयात्मको वा स्यात्। न चैवम्। शक्तिभेदादयमदोष इति चेन्न। धर्मिभेदाभेदाभ्यां तस्यानुपपत्तेः। असङ्कीर्णोभयजननस्वभावत्वादयमदोष

दहनान्योन्याभावत्वा[पा?]न्न स्यात्। दहनो वा स्यादिति। दहनत्वजातिमान् स्यादिति प्रकारभेदेनापादनत्रयम्। ननु दहनजनकस्वभावं यत् तत् कथमदहनं जनयेदित्यत आह— उभयात्मक इति। यथा तद् दहनजनकस्वभावं तथाऽपि नैवादहनजननस्वभावमपीत्युभयात्मकत्वमेव तज्जन्यं स्यादित्यर्थः। तथा च दहनो यदद्दहनजननस्वभावजन्यः स्याददहनः स्यादित्युभयात्मकत्वापादनम्। त्रयाणामपि तर्काणां विपर्ययपर्यवसानमाह—न चैवमिति। अयमदोष इति। कार्यवैचित्र्यप्रसङ्गरूप इत्यर्थः। धर्मीति। धर्मी यद्यभिन्नस्तदा तदधीना शक्तिरप्यभिन्नैव। यदि भिन्नस्तदा तद्भेदादेव कार्यभेदोपपत्तेः, किं शक्तिभेदकल्पनयेत्यर्थः। असङ्कीर्णेति।

कारणाद् दहनो वा स्यात्, अदहनो न स्यात्। तत्रापादनमाह—दहनो वा स्यादिति। एवं दहनं पक्षीकृत्यापादककोटौ दहनस्थानेऽदहननिक्षेपे दहनो न स्यादित्यापाद्यम्। एकत्रैव त्वर्थे पक्षीकृतेऽप्यापादकद्वयेन क्रमाद् युगपद्वा उभयापादनमेव उभयात्मकत्वापादनं तेन नाशक्यप्रसिद्धिः। एतच्चापाद्यव्यतिरेकनिश्चयस्य तर्काङ्गत्वनय एव सम्भवि, प्रमाणसिद्धविरोधिविषयत्वनयस्तु विरुद्धापादनसामग्रीविशिष्टे तद्विरुद्धविषयत्वस्यापि अनिष्टरूपत्वेन विशेषाविच्छेदकत्वादिति। त्रयाणामेव तर्काणां पक्षे विपर्ययं दर्शयन् इष्टापत्तिं निरस्यति— न चैवमिति। शङ्कते—शक्तीति। एकस्मिन् कारणे कार्यानुकूलात् तद्वैचित्र्यानुकूलाच्च शक्तिभेदात् अयं कार्याकस्माद्वैचित्र्यापादनरूपो यो दोषः स नेत्यर्थः। धर्मीति। तस्य शक्तिः। क्रमाभेदस्य धर्मिणः कारणत्वाभिमतात् स्वरूपभेदे धर्म्यभेदे च त्वदुक्तस्यानुपपत्तेः, भेदे एकानेकजातीयत्वं वा न कारणं तद्भिन्नशक्तिभेदस्यैव तत्त्वोपगमात्। अभेदे च न कार्यक्रमवैचित्र्ययोरुपपत्तिरिति। नन्वेकजातीयस्यापि कारणस्यायमेव स्वभावो यदसङ्कीर्णमेव दहनमदहनञ्च जनयति, अतएव दहनेऽदहनत्वापादनमदहने वा दहनत्वापादनञ्चोपपन्नमित्याह—असङ्कीर्णोभयेति। 'अयमु'क्तापादनत्रयम्, 'अदोषो' दोषो न, असं[15 a]कीर्णोभयजनकस्वभावोऽपि यो दहनः सोऽदहनकारणाविलक्षणजन्यत्वेनादहनः, एवमदहनश्च दहनकारणाविलक्षणजन्यत्वेन दहन एव स्यात्, तावताप्यसङ्कीर्णजननस्वभावतोपपत्तेः। दहनादहनसामग्रीप्रसूतत्वेन तयोस्तत्त्वं व्यवस्थितं दहनत्वमदहनत्वञ्च केन वारणीयमिति चेददहनदहनसामग्रीप्रसूतत्वेन तयोरदहनदहनत्वमपि केन वारणीयमित्यक्षरतात्-

इति चेन्न। न हि स्वाधीनमस्यादहनत्वम्, अपि तु तज्जनकस्वभावाधीनम्। तथा च तदायत्तत्वाद्दहनस्यापि तत्त्वं केन वारणीयम्? न हि तस्मिञ्जनयितव्ये नासौ तत्स्वभावः। तस्माद्विचित्रत्वात्कार्यस्य, कारणेनापि विचित्रेण भवितव्यम्। न च तत्स्वभावतस्तथा। ततः सहकारिवैचित्र्यानुप्रवेशः। न तु क्षणोऽपि तदनपेक्षस्तथा भवितुमर्हतीति।

---

5 एकस्य एकजातीयस्य वा कारणस्यायमेव स्वभावो यदनेन दहनमदहनञ्च जननीयमित्यर्थः। **न हीति।** दहनजननस्वभावस्याप्यदहनस्वाभाव्यानिवृत्तेर्न कार्यभेदः। न चैकस्य कारणस्य विरुद्धोभयथा[स्वा?]भाव्यमित्यर्थः। उपसंहरति—**तस्मादिति।** ननु कार्यं कारणं वा स्वभावादेव विचित्रमस्तु, किं सहकारिवैचित्र्येणेत्यत आह—**न चेति। तदिति।** कार्यकारणं चेत्यर्थः। सहकारिभेदं विना

10 तदुभयमप्यनुपपन्नमित्यर्थः। ननु विचित्रकार्यकुर्वद्रूप एव क्षणः स्वलक्षणा[नि?]विचित्राणि कार्याणि कुर्यादित्याह—**नन्वि[न त्वि ?]ति।** **बौद्ध**मतेऽपि तथोत्पन्नसहकारिवैचित्र्याधीनमेव कार्यवैचित्र्यमित्यर्थः। एतेन **सांख्यवेदान्तबौद्ध**मतं निरस्तमिति भावः ॥७॥

पर्यायेणाह—**न हीति।** 'अस्या'दहनस्य न स्वाधीनमदहनत्व'मपि तु तज्जनकस्वभावाधीनं',

15 'तदायत्तत्वात्' अदहनसामग्र्यायत्तत्वात् 'दहनस्यापि तत्त्व'मदहनत्वम्। इदमुपलक्षणम्, अदहनस्यापि दहनसामग्र्यधीनं दहनत्वं 'केन वारणीयम्', अदहनस्यादहनत्वे दहनस्य दहनत्वे च तत्सामग्रीप्रभवत्वातिरिक्तस्य नियामकस्य वक्तुमशक्यत्वादिति भावः। 'न हि तस्मिन्न'दहने 'जनयितव्ये' 'असौ' कारणत्वेनाभिमतः 'न' दहनजननस्वभावः, एवं तस्मिन् दहने जनयितव्ये नासावदहनजननस्वभाव इत्यपि बोध्यम्। यस्य यः

20 स्वभावस्तस्य तत्त्यागास्वभावात् त्यागे वा तत्कारणस्यापि निवर्तकत्वापाताच्चेति। उपसंहरति—**तस्मादिति।** न च तत्कार्यं 'स्वभावत' एव एकजातीयसामग्रीजन्यत्वेऽपि नानाऽसङ्कीर्णं नियतरूपं कार्यमात्रवृत्तिजातेः कारणनियम्यत्वोपगमादिति भावः। ततः विचित्रकार्यजनकत्वात् सामग्र्यां 'सहकारिवैचित्र्यानुप्रवेशः' विचित्रसहकारिनिवेशः आवश्यकः। ननु यथोक्तरूपः क्षणविशेष एव विचित्रसहकार्यनुप्रवेशं विनैव

25 विचित्रकार्यजनकोऽस्त्वित्याशङ्क्य निषेधति—**न त्विति।** 'तदनपेक्षः' विचित्रकारणानपेक्षः 'तथा' विचित्रकार्यजनको 'भवितुमर्हति' तथोत्पन्नक्षणस्यैव वैचित्र्योपगमे तु नैकजातीयमेव कारणमिति भावः। एतावता प्रबन्धेन कथञ्चिद्विचित्रञ्च कारणं व्यवस्थापितम् ॥७॥

अस्तु दृष्टमेव सहकारिचक्रं, [2]किमपूर्वकल्पनयेति चेन्न। विश्ववृत्तितः।

विफला विश्ववृत्तिर्नो न दुःखैकफलाऽपि वा।
दृष्टलाभफला नापि विप्रलम्भोऽपि नेदृशः ॥८॥

अस्त्वति। विचित्रकार्यजनकमिति शेषः। **किं** [2]**पुनरि**ति। तथा च 'तदधिष्ठातृत्वेन नेश्वरसिद्धि'रिति रहस्यम्। विश्वेषां 'वृत्तितो' यागदानस्नानादौ प्रवृत्तेरवश्यं कल्पनीयमित्यर्थः। यागादिप्रवृत्तेरन्यथासिद्धिं निरस्यति—**विफले**ति। 5

नैतावतापि भगवत्सिद्धिरित्यभिप्रायेणाह---**अस्त्व**ति। दृष्टमेवास्मदाद्यधिष्ठानयोग्यमेव क्रमिकं विचित्रञ्च सहकारिचक्रं सामग्री अस्तु, किमपूर्वकल्पनयेति। तथा च किमधिष्ठानार्थं भगवान् सेत्स्यतीति भावः। अत्र यागादिरगम्यागमनादिर्वा स्वजन्यस्वर्गनरकानुकूलव्यापारको न वा? एतज्जन्यं स्वर्गनरकादि एतज्जन्यजन्यं न वा? 10
आत्मा ऐन्द्रियकावृत्तिगुणत्वसाक्षाद्व्याप्यजातिमद्वान्न वा? अतीन्द्रियमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातित्वम् आत्मसमवेतवृत्तिवृत्ति न वा?—इत्याद्या विप्रतिपत्तयो बोद्धव्याः। तथा च यागादिरिष्टसाधनं वक्ष्यमाणहेतुदर्शनशून्यप्रवृत्तिविषयत्वात् भोजनादिवत् इत्यत्रेष्टा[15 b]न्तरबाधात् कालान्तरभावि तत्[1] सिध्यति। तदनुगुणश्च व्यापारोऽदृष्टं तदधिष्ठाता च विश्वदर्शी भगवान् इति भावः। ननु सन्ध्यावन्दनवत्तादृशप्रवृत्तिविषयोऽपि 15
निष्फलं एव भविष्यति, तथा च त्वदुक्तस्य हेतोः सन्ध्यावन्दनादौ व्यभिचारः। तत्तदन्यत्वादिविशेषितस्य चाप्रयोजकत्वमित्यत आह—

विफलेति। 'विश्ववृत्ति'र्हेतुदर्शनशून्यप्रवृत्तिः तादृशप्रवृत्तिविषयो वा 'विफला' न प्रवृत्तिसामान्ये इष्टसाधनताज्ञानस्य कारणत्वेन सन्ध्यावन्दनादेरपि सफलत्वस्य व्यवस्थापयिष्यमाणत्वात् इति भावः। प्रकृतपक्षे साध्याभावो विशेष्याभावायत्तः, 20
किं वा स्वनिष्ठसाधनतासामान्ये इष्टीयत्वलक्षणविशेषणाभावायत्तो वा? आद्ये सत्त्वानुपपत्तेस्तन्नयेऽर्थक्रियाकारित्वस्यैव तत्त्वात्। द्वितीये त्वाह—**न दुःखैकफले**ति। नानिष्टैकफलेत्यर्थः। अन्यतरनिरूपितत्वनियतस्य साधनत्वस्य इष्टनिरूपितत्वबाधेऽनिष्टनिरूपितत्व एव पर्यवसानादिति। विशेषदर्शिप्रवृत्तिविषयत्वात् तादृशप्रवृत्तित्वाद्वेति च हेतुः। ननु सफलत्वमात्रे साध्ये दृष्टेनैव फलेनार्थान्तरं, तथा च न स्वर्गाद्यनुकूलयागादिव्यापारा- 25
धिष्ठानायेश्वरसिद्धिरित्यत आह—**दृष्टलाभफले**ति। वक्ष्यमाणयुक्तेरिति शेषः। ननु विप्रलम्भादिनिमित्तैव यागादौ प्रवृत्तिरिति स्वरूपासिद्धो हेतुरित्यत्राह—**विप्रलम्भोऽपी**ति। तादृशयागादेः कर्तव्यतानिमित्तवक्ष्यमाणयुक्तेरिति शेषः।

---

1 तत्=स्वर्गादि। 2 शङ्करमिश्र reads किं पुनरपूर्वं-।

यदि हि पूर्वपूर्वभूतपरिणतिपरम्परामात्रमेवोत्तरोत्तरनिबन्धनं, न परलोकार्थी कश्चिदिष्टापूर्तयोः[1] प्रवर्तेत। न हि निष्फले दुःखैकफले वा कश्चिदेकोऽपि प्रेक्षापूर्वकारी घटते, प्रागेव जगत्। लाभपूजाख्यात्यर्थमिति चेत्, लाभादय एव किन्निबन्धनाः? न हीयं प्रवृत्तिः स्वरूपत एव तद्धेतुः। यतो वाऽनेन लब्धव्यं, यो वैनं पूजयिष्यति। स किमर्थम्? ख्यात्यर्थमनुरागार्थञ्च। जनो दातरि मानयितरि च रज्यते। 'जनानुरागप्रभवा हि सम्पदः' इति चेन्न। नीतिनर्मसचिवेष्वेव तदर्थं दानादिव्यवस्थापनात्।

ननु भूतान्येव चेतनान्येव चेतनानि, तान्येव वासनापरिपाकवशात्तथा परिणमति यथा उत्तरोत्तरशरीरनिष्पत्तिर्भोगव्यवस्था च स्यात्, किमपूर्वेणेत्यत आह—**यदि हीति**। 'इष्टं' यागादि, 'पूर्तं' खातादि। **प्रागेवेति** निपातसमुदायोऽसम्भावनावाची। तेन जगत्प्रवृत्तिरसम्भावितेत्यर्थः। यद्वा प्रागेव दूरत इत्यर्थः। **किन्निबन्धना** इति। धार्मिकत्वज्ञानं तत्रापि निबन्धनमिति भावः। एतदेवाह—**न हीयमिति**। तथा च न वापि कृष्यादिप्रवृत्तिवद् यागादिप्रवृत्तिप्रसङ्ग इत्यर्थः। **स किमर्थमिति**। तस्यापि धर्म एवोद्देश्य इत्यर्थः। **ख्यात्यर्थमिति**। असौ दाता विनीतश्चेति ख्यातिः, तन्निबन्धनश्चानुरागः। तस्यापि फलमाह—**जनानुराग** इति। नीतिसचिवो मन्त्री, नर्मसचिवः क्रीडासचिवः। **व्यवस्थापनादिति**। धर्मशास्त्र इत्यर्थः।

ननु भूतचैतन्यवादे तथा तथा परिपाकशालीनि कारणीभूतानि भूतानि जायन्ते यथा तदुत्तरोत्तरशरीरे भोगादिव्यवस्था स्यात्। किमपूर्वेणेत्यत आह—**यदि हीति**। 'परिणतिपरम्परा' वासनापरिपाकः 'उत्तरोत्तरनिबन्धनं' भोगव्यवस्थापकं 'न परलोकार्थी'ति कर्तुः फलासम्बन्धादिति भावः। 'इष्टापूर्ते'[1] यागतडागादौ। ननु कर्तुः स्वजन्येष्टासम्बन्धस्यापि तज्जन्यदुःखमात्रसम्बन्धादेव प्रवृत्तिः स्यादित्यत्राह—**न हीति**। 'निष्फले' स्वनिष्ठेष्टनिरूपितसाधनत्वाभाववत्तया ज्ञाते [2]'प्रेक्षाकारी' विशेषदर्शी 'घटते' प्रवर्तते। 'किमुते'त्यर्थकः 'प्रागेवे'ति निपातः, असम्भावनातिशयो वा, दूर इत्यर्थो वा इत्यपरे। **लाभ** इति। तथाच सफलत्वे साध्ये तैरेवार्थान्तरमिति भावः। 'इयं' यागादिगोचरा, 'स्वरूपतः' साक्षात्, 'तद्धेतु'-र्लाभादिहेतुः। अनुपदमेव तदनुत्पादात्, अन्यथा तदर्थितया नास्तिकैरपि करणप्रसङ्गाच्चेति भावः। ननु तत्तत्कर्मकारिणि धार्मिकत्वबुद्ध्या परे प्रयच्छन्तीति लाभादिप्रयो[16a]-जकत्वमित्यत्राह—**यो वैनमिति**। अदृष्टद्वारा स्वर्गार्थमेव ते प्रयच्छन्तीति तदधिष्ठातेश्वर इति भावः। दानप्रवृत्तिमपि फलान्तरेणान्यथासिद्धयति—**ख्यात्यर्थमिति**। ख्यातेरपि प्रयोजनाकांक्षायामाह—**अनुरागे**ति। स्वनिमित्तकानुरागविषयत्वार्थमित्यर्थः। तस्यापि स्वतः प्रयोजनत्वाभावादाह—**जन** इति। 'मानयितरी'ति दृष्टान्तार्थम्। 'नीतिसचिवो' मन्त्री, 'नर्मसचिवः' क्रीडामित्रं, 'व्यवस्थापनात्' नीतिशास्त्रेषु। प्रतारणार्थं तपश्चर्यादि क्रियत इत्याह—

---

1 गुणानन्द reads इष्टापूर्ते। 2 गुणानन्द reads प्रेक्षाकारी।

त्रैविद्यतपस्विनो धूर्तवका एवेति चेन्न। तेषां दृष्टसम्पदं प्रत्यनुपयोगात्। सुखार्थं तथा करोतीति चेन्न, नास्तिकैरपि तथाकरणप्रसङ्गात्। सम्भोगवत् लोकव्यवहारसिद्धत्वाद-फलमपि क्रियते, वेदव्यवहारसिद्धत्वात् सन्ध्योपासनवदिति चेद्, गुरुमतमेत[1]न्न तु गुरोर्मतम्। ततो नेदमनवसर एव वक्तुमुचितम्। वृद्धैर्विप्रलब्धत्वाद्बालानामिति चेन्न। वृद्धानामपि प्रवृत्तेः। न च विप्रलम्भकाः स्वात्मानमपि विप्रलभन्ते। 5

ननु प्रतारणार्था तपस्यादौ प्रवृत्तिर्न धर्मार्था इत्याशङ्कते—**त्रैविद्ये**ति। त्रिवेदीवेदिन-स्त्रैविद्याः त्रैविद्याश्च ते तपस्विनश्चेति ते तथा। **अनुपयोगादि**ति। धूर्तताया इति शेषः। **सुखार्थमि**ति। धूर्तातायाः सुखमेव किञ्चिदुत्पद्यत इत्यर्थः। एवञ्च भोजनादिवत्तत्रापि तपस्यादौ प्रवृत्तिः स्यादित्याह—**नास्तिकैरि**ति। **सन्ध्यो-पासनवदि**ति। सन्ध्योपासनादावपि फलश्रुतेर्निष्फले प्रेक्षावत्प्रवृत्त्यनुपपत्तेरिति 10 भावः। **गुरुमतमि**ति। **गुरोः प्रभाकरगुरो**र्मतं, न त्वस्मद्गुरोरपीत्यर्थः। तथा चाप्रामाणिकमिति भावः। यद्वा गुरुमतं महन्मतमिति परीहासः। **अनवसर** इति। **पञ्चमस्तवके** तु सर्वमेव विचारणीयमिति भावः। प्राथमिकविप्रलम्भपूर्वकोऽयं व्यवहार इत्याह—**वृद्धैरि**ति। **वृद्धानामपी**ति। अन्यथा ज्ञातमन्यथा बोधयन् विप्रलम्भक उच्यते। स च स्वयं तत्र कथं प्रवर्तत इत्यर्थः। तदेवाह—**न ही[चे?]**ति। 15

त्रैविद्येति। त्रिवेदीविदस्त्रैविद्याः 'तपस्विन'श्च ये ते 'धूर्ता' वञ्चकाः परप्रत[ा]-रणैकपरास्तेषां त्रैविद्यतपस्विनाम्, 'दृष्टसम्पदं' दृष्टग्रामपशुहिरण्यादिकं तत्रा'नुपयोगात्' तन्निःस्पृहत्वात्। 'सुखार्थं' दृष्टसुखार्थं 'तथा' तपश्चर्यादि। **नास्तिकैरपी**ति। तथा च नास्त्येव तद्दृष्टफलमिति भावः। 'लोकव्यवहारसिद्धत्वात्' कार्यताज्ञानमात्रात्; 'वेदव्यवहारसिद्धत्वात्' वैदिककार्यताज्ञानात्। 'गुरुमतं' गुरुनामक**प्रभाकर**स्य मतम्। 20 '[1]इदं' विनापीष्टसाधनताज्ञानं वेदाधीनकार्यताज्ञानात् प्रवृत्तिरिति मतम्, 'न तु' 'गुरो'रिष्टस्य, अस्मद्गुरोरिति **केचित्**। शुचितत्कालजीविन एवाकरणे तस्य प्रत्यवायः, प्रवृत्तौ चेष्टसाधनताज्ञानं कारणं सामान्यत एव क्लृप्तमिति तस्य च न बाधः कल्प्यत इति भावः। नन्विदमेव विचार्यतां न हि वाङ्मात्रेणैव तद् दुष्टमिति तत्राह—**तत** इति। यदि गरिष्ठस्यास्मद्गुरोर्वा मतं स्यात्, तदा'नवसर एव' कदाचिद्वक्तुमर्हं गुरुमतभिन्नत्वान्नेद- 25 मनवसरे 'वक्तुमुचितम्', अवसरे तु **पञ्चमस्तवके** विवेचयिष्यत एव इति भावः। 'विप्रलम्भोऽपि नेदृश' इति व्याकरोति—**वृद्धैरि**ति। 'बालानां' यागादौ प्रवृत्तिरिति शेषः। 'वृद्धानां' विप्रलम्भकत्वेनाभिमतानां यागादौ 'प्रवृत्तेः'। 'विप्रलभन्ते', अन्यथा

---

1 गुणानन्द reads इदं for एतत्.

तेऽपि वृद्धतरैरित्येवमनादिरिति चेत्, न तर्हि विप्रलिप्सुः कश्चिदत्र, यतः प्रतारणशङ्का स्यात्। इदं प्रथम एव कश्चिदनुष्ठायापि धूर्तः पराननुष्ठापयतीति चेत्; किमसौ सर्वलोकोत्तर एव, यः सर्वस्वदक्षिणया सर्वबन्धुपरित्यागेन सर्वसुखविमुखो ब्रह्मचर्येण तपसा श्रद्धया वा केवलपरवञ्चनकुतूहली यावज्जीवमात्मानमवसादयति। 5 कथञ्चैनमेकं प्रेक्षाकारिणोऽप्यनुविदध्युः। केन वा चिह्नेनायमीदृशस्त्वया लोकोत्तर-प्रज्ञेन प्रतारक इति निर्णीतः? न ह्येतावतो दुःखराशेः प्रतारणसुखं गरीयः। यतः पाखण्डाभिमतेष्वप्येवं दृश्यत इति चेन्न। हेतुदर्शनाऽदर्शनाभ्यां विशेषात्। अनादौ

न तर्हीति। अनादौ समाचारो वेदमूलकत्वध्रौव्यादित्यर्थः। अनादित्वं नास्तीत्याह—**इदमि**ति। परध्वंसनार्थं कश्चिदाधुनिक एव तपस्यादौ प्रवर्तत इत्यर्थः। 10 **अनुविदध्युरि**ति। आद्रियेरन्नित्यर्थः। तदनुष्ठितमनुतिष्ठेयुरिति वार्थः। **ईदृश** इति। यावज्जीवमरण्यादौ तपस्यादौ प्रवृत्त इत्यर्थः। **यत** इति। पाषण्डानामपि मण्डलीकरणादौ निष्फले प्रवृत्तिदर्शनादिति भावः। **हेत्वि**ति। तेषामालस्यजीविकादिहेतुभिः प्रवृत्तिदर्शनादित्यर्थः। ननु यागाद्युपदेशो न प्रतारणा मण्डलीकरणोपदेशः। प्रतारणेत्यत्र किं विनिगमकमित्यत आह—**अनादावि**ति।

---

15 ज्ञानवन्तमात्मानमन्यथा ज्ञापयन्ति, सति विशेषदर्शने तदभावादिति भावः। 'तेऽपि' वृद्धा अपि 'वृद्धतरै'र्विप्रलब्धा यागादौ प्रवर्तन्त इति शेषः। वृद्धतरा एव कथं प्रवर्तन्त इत्यपेक्षायामाह—**एवमनादिरि**ति। पूर्वपूर्वविप्रलब्धत्वादुत्तरोत्तरेषां प्रवृत्तिरिति। 'विप्रलिप्सुर'न्यथा ज्ञातमन्यथा बुबोधयिषुः 'यतः प्रतारणशङ्का स्यात्' यत्र शङ्कितं प्रतारकत्वं स्यादित्यर्थः। 'इदं' तपश्चर्यादि, 'प्रथम एव' इतरापेक्षकार्यत्वज्ञानशून्य 20 एव स्ववचसि प्रामाण्यज्ञानाय स्वय'मनुष्ठायापि' पर'मनुष्ठापयति' केवलं 'परवञ्चन-कुतूहली' परव[16b]ञ्चनमविष्टसाधनताज्ञानवान्। भवतु वा उन्मादादिदोषादेवं, तथाप्याह--**कथमि**ति। 'अनुविदध्युः' तदुपदिष्टानि कार्याणि त एव कुर्युः। 'एवं' तथाविधप्रतारणाधीनप्रवृत्तिमान्। **हेतुरि**ति। 'हेतुदर्शनं' भ्रमप्रमादादिपाषण्डप्रवृत्तौ, 'तददर्शनं' यागादिप्रवृत्ताविति 'विशेषात्' वैलक्षण्यात्। ननु हेतुदर्शनशून्यप्रवृत्तिविषयेऽपि यागादौ शङ्का स्यात्। तथाहि घुणाक्षरन्यायेन 'स्वर्गकामो यजेते'ति वाक्यं 25 केनचिदुच्चारितं कश्चित् श्रुत्वा तत्प्रामाण्यमवगत्य स्वयं प्रवृत्तः प्रवर्तयामास च परानिति तत्राह—**अनादावि**ति।

[illegible] प्रमाणत्वे [illegible] प्रमाणविशेषमन्तरेण प्रमाणत्वं स्यात्, न तदनुष्ठानगोचरेण कर्मणा । अन्यथा प्रमाणविशेषमन्तरेण [illegible] न स्यात् ।

[illegible] सिद्धौ [illegible] । [illegible]—

यथा यागाद्यनुष्ठानं महाजनपरिगृहीत[illegible], तथा [illegible] प्रमाणं [illegible] ।
न त्विति । [illegible] कर्मणा [illegible] । [illegible] । अन्यथेति । यदि [illegible] स्यादित्यर्थः, प्रमाणेन- 10
[illegible] ॥८॥

अस्त्विति । तथा च [illegible] न वा [illegible] भावः । [illegible]
[illegible] ।

'[illegible]' [illegible] 'प्रमाणत्वे' [illegible]
[illegible] 15
[illegible] प्रमाणं
स्यात् । [illegible]—अपि पर्युचित्तेति । [illegible]
[illegible] स्यात्, '[illegible]
कर्मणा' । [illegible] कर्मणा [illegible] प्रमाणं स्यात् ।
[illegible] प्रमाणं, तत 20
[illegible] महाजनपरिग्रह [illegible]
प्रमाणत्वाशङ्केति भावः । ननु [illegible] पौण्ड्रा[illegible]
[illegible] प्रमाणं स्यात्, [illegible] पौण्ड्रा[illegible] प्रामाण्यप्रसङ्गः, तत्राप्येवं
[illegible]—अन्यथेति । [illegible]
[illegible] प्रमाणविशेषमन्तरेण प्रमाणत्वाप्रमाणत्वानुपगमेनाप्रामाण्यस्य 25
प्रामाण्यस्यानुपगमेन च [illegible] पापण्डत्वप्रसिद्धिः सा न स्यात् । एतेन
पापण्डत्वप्रसिद्ध्या [illegible] न महाजनपरिग्रह इति [illegible] ॥८॥

दानाध्ययनादिरेवेति । 'एव'कारेण तज्जन्यजनकताव्यवच्छेदः । 'जगद्-
विप्लव' जगतः 'क्षणिकत्वात्' आशुतरविनाशित्वात् । तादृशस्यापि विशेषणज्ञानादे-
र्जनकत्वदर्शनादाह—अपेक्षितस्येति । फलत्वेनाभिमताव्यवहितप्राक्कालवृत्तित्वादिति 30
यावत् । यागदानादि न साक्षात् स्वर्गजनकं तदव्यवहितप्राक्कालावृत्तित्वात्, स्वर्गो वा
न साक्षात् यागादिजन्यः, तदधिकरणक्षणाव्यवहितानुत्तरत्वात् संमतवदित्यादयः प्रयोगाः ।

चिरध्वस्तं फलायालं न कर्मातिशयं विना।
सम्भोगो निर्विशेषाणां न भूतैः संस्कृतैरपि ॥९॥

तस्मादस्त्यतिशयः कश्चित्। ईदृशान्येवैतानि स्वहेतुबलायातानि, येन नियत-भोगसाधनानीति चेत्, तदिदममीषामतीन्द्रियं रूपं सहकारिभेदो वा ?

एतदेव कारिकयोपगृह्णाति—**चिरे**ति। चिरध्वस्तं कर्मफलाय चिरभाविनेन नालं न समर्थं, तर्हि भूतान्येव शरीराण्येव यागादिभिः संस्क्रियन्ताम् अत आह—**सम्भोग** इति। निर्विशेषाणामनाहितापूर्वाणामात्मनां सम्भोगः सम्यग्भोगः प्रतिनियतो भोग इत्यर्थः।

ननु शरीराण्येव संस्कृतानि प्रतिनियतभोगसाधनानि स्युरित्याशङ्क्य—**ईदृशान्येवे**ति। रूपं कुर्वद्रूपत्वं जात्यन्तरं वा स्वरूपं वा, सर्वत्र

अप्रयोजकत्वशङ्कया सामान्यतो व्याप्तिं दर्शयति—

चिरेति। स्वफलप्राक्काल[17a]वृत्तिध्वंसप्रतियोगि 'कर्म न फलाय' तादृशे 'अलम्'। तत्फलोत्पत्तिं स्मृतिजनकज्ञाने व्यभिचारादाह—**अतिशयं विने**ति। 'अतिशय'स्तत्फलानुकूलः स्वजन्यः तं 'विना' तदसहकृतः। ननु भूतनिष्ठ एव कश्चिद् योग्यस्तद्व्यापारत्वेन कल्प्यतां, पदार्थान्तरकल्पने गौरवात्, तदधिष्ठानश्चालदादिरिव शक्यमित्याशङ्क्याह—**सम्भोग** इति। व्यवस्थितो भोगः 'भूतैः संस्कृतैरपि' भूतनिष्ठतद्व्यापारैरपि 'निर्विशेषाणां' तद्व्यापारशून्यानामात्मनां न स्यात्, तत्कृतसंयोगस्य निखिलात्मसाधारण्येन कर्तुरिवाकर्तुरपि भोगः स्यादित्यभिप्रायार्थः।

उपसंहरति—**तस्मादि**ति। कालान्तरभाविजनकत्वात् 'अतिशयो'ऽस्ति जनकतासम्बन्धेन तज्जनकत्वमस्तीति यावत्। फलेनार्थान्तरवारणायाह—**कश्चिदि**ति। फलभिन्न इत्यर्थः। तद्व्यापारवतां भूतानामविशिष्टत्वेऽपि भोगनियममुपपादयति—**ईदृशान्येवे**ति। 'ईदृशानि' विलक्षणानि तानि भूतानि। वैलक्षण्यप्रयोजकाकाङ्क्षायामाह—**स्वहेत्वि**ति। 'तद्' वैलक्षण्यम् 'इदं' नियतभोगप्रयोजकत्वेन स्वेनाभिमतम्। 'अमीषां' भूतानाम् ऐन्द्रियक'मतीन्द्रियं' वा 'रूपं' धर्मः। सोऽपि जातिरूपस्तदन्यो वा। यद्वा 'अमीषां' भूतानां नियतभोगजननानुकूलः 'सहकारिभेदो'ऽन्यनिष्ठः। आद्यं योग्यानुपलब्ध्यैव निषिद्धम्।

न तावदैन्द्रियकस्यातीन्द्रियं रूपम्, व्याघातात्। द्वितीये त्वपूर्वसिद्धिः। सिध्यतु भूतधर्म एव गुरुत्वादिवदतीन्द्रियः। अवश्यं त्वयाप्येतदङ्गीकरणीयम्। कथमन्यथा

दोषमाह--व्याघातादिति। ऐन्द्रियकस्यातीन्द्रियजातिमत्त्वस्यातीन्द्रियत्वस्य च व्याघातादित्यर्थः। मीमांसकाभिमतशक्तिदृष्टान्तेन बौद्ध एवातीन्द्रियभूतधर्ममाह—सिध्यत्विति। त्वयापि नैयायिकेनापि। बौद्धस्तु मीमांसकमतमाश्रित्य 5
दृष्टान्तमुपपादयति-तथा हीति। विप्रतिपत्तिकारणतावच्छेदकत्वमतीन्द्रियमात्रवृत्ति

द्वितीये त्वाह—न तावदिति। 'अतीन्द्रियं रूपं' जातिः 'व्याघाताद्' ऐन्द्रियकवृत्तिजातित्वव्याघातात्। चतुर्थमाह—द्वितीये त्विति। तृतीयं शङ्कते—सिध्यत्विति। गुरुत्वादिति। 'आदि'पदात् स्थितिस्थापकोपग्रहः। ननु तादृशस्य गुरुत्वादेः स्वोत्पत्त्युत्तरक्षण एवोत्पत्तेर्न यागाद्यधीनत्वं, तथाच व्यापारो यः कल्प्यः स एवा- 10
दृष्टमित्यत आह—अवश्यमिति। यथा उत्तेजकसमवधाने समयान्तरेऽपि दाहानुकूलोऽतीन्द्रियो धर्म उत्पद्यते तथैव यागाधीनोऽपि स्यादिति भावः। तत्र वह्निर्दाहानुकूलातीन्द्रियधर्म्यसमवायी न वेति विप्रतिपत्तिः। धर्मश्च वह्न्यवह्निसमवेतान्यत्वेन संयोगाद्यन्यत्वेन वा विशेष्यः। तेनादृष्टवदात्मसंयोगेन नार्थान्तरम्। स्थितिस्थापकेनार्थान्तरवारणाय 'दाहानुकूले'ति, उष्णस्पर्शे तद्वारणाय'तीन्द्रिये'ति। अनुकूलत्वं जनकता- 15
वच्छेदकत्वं, धर्मत्वादि तथा प्रसिद्धं कारणतावच्छेदकव्यावृत्तौपयिकानन्यथासिद्धत्वाघटितकारणत्वस्यैवानुकूलत्वे धर्माद्यपि तथा, तादृशादेरपि कालिकसम्बन्धेन वह्नौ वृत्तेरर्थान्तरादाह—'समवाये'ति। समवायसम्बन्धेन साध्यताबोधनाय वह्निसंयोगस्य पक्षत्वे तु दाहानुकूलाती[17b]न्द्रियधर्मवत्त्वम्, अतीन्द्रियधर्मवत्त्वं वा विधिकोटिः, पाकविशेषप्रयोजकपरमाणुवह्निसंयोगनिष्ठतादृशजात्युपगमेनार्थान्तरवारणाय पक्षे 'करतले'ति। वह्निनिष्ठ- 20
शक्तेर्वह्निमत्त्वाजन्यत्वे तु वह्निः स्वोत्पत्तिकालीनजन्यसमवायी न वा, नित्यायान्तु कर्मानुकूलनित्यधर्मसमवायी न वा, धर्माधर्मौ तथा प्रसिद्धौ; कारणतावच्छेदकत्वमैन्द्रियकवृत्ति न वेति केचित्। अत्र निषेधकोटिः परेषाम्। अत्रानुकूलतर्कमाह—कथमिति। मण्यादिसमवहितो वह्निर्यदीदानीं वह्नित्वे सति दाहप्रयोजकयत्किञ्चिद-

मन्त्रादिभिः प्रतिबन्धः। तथा हि, करतलानलसंयोगाद् यादृशादेव दाहो दृष्टस्तादृशादेव [1]मन्त्रादिप्रतिबन्धे सति दाहो न जायते। असति तु जायते। [2]तत्र न दृष्टवैगुण्यमुपलभामहे। नापि दृष्टसाद्गुण्येऽदृष्टवैगुण्यं सम्भावनीयम्, [3]तस्यैतावन्मात्रार्थत्वात्।

न वा? दाहकारणतावच्छेदकत्वं वह्नित्वभिन्नं न वा? दाहकारणतावच्छेदकमन्यासव्यवृत्ति न वा? दाहकारणतावच्छेदको धर्मोऽतीन्द्रियो न वा? प्रतिव्यक्तिमात्रविश्रान्तो न वा? दाहकारणत्वं वह्नित्वावच्छिन्नं न वा? दाहकारणतावच्छेदकत्वमनित्यत्वसमानाधिकरणं न वा? कारणानि स्वजन्यानुकूलातीन्द्रियभावभूतधर्मवन्ति न वा? वह्निर्दाहानुकूलाधिष्ठातीन्द्रियधर्मसमवायी न वा? गुणनिष्ठा कारणताजन्यधर्मावच्छेद्या न वेति शङ्कावर्थापत्तिं प्रमाणयति—**यादृशे**ति। तथा च सति प्रतिबन्धके दाहाभावो यद्व्यतिरेकप्रयुक्तः स धर्मोऽवश्यं वह्नौ स्वीकार्यः, स च शक्तिरेवेति भावः। [1]**मन्त्रादिने**ति। मणिमन्त्रौषधादिनेत्यर्थः। अन्यथोपपत्तिं निरस्यति—**न च** [2]**तत्रे**ति। अदृष्टवैगुण्यं दाहकादृष्टनाशो, दाहप्रतिबन्धकादृष्टोत्पादो वा, तद्दाहजनकादृष्टा[त्य ?]न्ताभाव एव वा। **तस्य** [3]**तावन्मात्रे**ति। अदृष्टस्य यावद्दृष्टसमवधानफलकत्वादित्यर्थः। दृष्टानि च प्रकृते समवहितान्येवेति भावः। दृष्टसमवधानेऽप्यदृष्टापेक्षायां दण्डमाह—

समवहितो न स्यात्, इदानीं दाहजनको न स्यात्, दाहोपहितो वा स्यात्। कारणान्तरासमवधानमादाय विपर्यये सिद्धसाधनस्यार्थान्तरस्य वारणाय उपात्तपक्षविशेषणस्य प्रामाणिकत्वबोधनायाह—**यादृशादेवे**ति। इष्टापत्तिं निरस्यति—**मन्त्रादिप्रतिबन्धे सति दाहो न जायत** इति। स वह्निसंयोगः स्वरूपयोग्य एव न भवतीत्यत्राह—**असति जायत** इति। न च स्वरूपायोग्यत्वे तत्सम्भव इति तादृशत्वमेवासिद्धमित्याशङ्कायामाह—**न चे**ति। नन्वदृष्टवैगुण्यात् पक्षविशेषणमसिद्धमित्यत्राह—**नापी**ति। दृष्टोपहारद्वारा यत्रादृष्टं प्रयोजकं तत्र 'दृष्टसाद्गुण्ये'ऽदृष्टेतरनिखिलकारणसमवधाने 'ऽदृष्टवैगुण्यम्' अदृष्टव्यतिरेकेण कार्याजननं 'तस्य' दाहादिजनकादृष्टस्य, तावन्मात्रार्थत्वाद् दृष्टसमवधानमात्रप्रयोजकत्वात्, तच्च प्रकृते अस्त्येवेति भावः। वह्निसंयोगे स्वदृष्टमन्वयव्यतिरेकात् साक्षादेव फलप्रयोजकमिति भावः। अन्यथा यत्र दृष्टोपहारद्वारा अदृष्टं प्रयोजकं तत्र सत्यपि दृष्टेऽदृष्टाभावात् कार्याजननकर्मणि

---

1 'धर्मोऽ' क्वचित् पाठः। 2 गुणानन्दमहर्षिमिश्रसम्मतः पाठः। 3 गुणानन्दमहर्षिमिश्रसम्मतः पाठः।

अन्यथा, कर्मण्यपि विभागः कदाचिन्न जायेत । न च प्रतिबन्धकाभावविशिष्टा सामग्री कारणम् । अभावस्याकारणत्वात् । तुच्छो ह्यसौ । प्रतिबन्धकोत्तम्भकप्रयोगकाले च तेन विनापि कार्योत्पत्तेः । प्राक्प्रध्वंसादिविकल्पेन चाऽनियतहेतुकत्वापातात् । अकिञ्चित्करस्य प्रतिबन्धकत्वायोगात् । किञ्चित्करत्वे चाऽतीन्द्रियशक्तेः स्वीकारात् ।

अन्यथेति । **कर्मणी**ति । अविनश्यदवस्थकर्मणीत्यर्थः । न च तत्र तत्रादृष्टं नियमतः समवहि[त ?]मेवेति वाच्यं, नियामकाभावात् । ननु दृष्टसमवधाने यद्यदृष्टस्य प्रयोजकत्वं तदा कश्चिददृष्टं कारणं न भवेत् । दृष्टसमवधानं हि दृष्टोत्पादनं वा, तत्सन्निधानं वा, तदुभयमपि कार्यमेव । तत्रापि दृष्टसमवधानेनैव कारणं वाच्यम् । एवं तत्र तत्रापीति चेत्—न । अदृष्टस्य सर्वत्र कार्ये साक्षादेव कारणत्वम् । न ह्यत्र कारणान्वयव्यतिरेकगम्या कारणता, किन्तु श्रुतिगम्या । श्रुतिश्चास्मात् कार्यं भवत्येवेति प्रतिपादयति । न त्वेतद्व्यतिरेकेण कार्यं न भवतीति व्यतिरेकांशमपीति गौरवात्, तावतैव प्रवृत्तेश्च । तथा च यत्र यावन्ति दृष्टानि समवहितानि तत्रादृष्ट-विलम्बेन विलम्बः । वन्ध्यासम्प्रयोगादौ च लोहितरेतसो रेतोपघातकल्पनात् पुत्रजन्मानुकूलमदृष्टं विद्यमानमपि जन्मान्तरे फलजनकं स्यादेवेति भावः । प्रतिबन्धकाभावेनान्यथासिद्धिमाशङ्क्य निराकरोति—**न चे**ति । अभावस्याकारणत्वे हेतुमाह—**तुच्छो ही**ति । तुच्छत्वमप्रामाणिकत्वमजनकत्वं वा । अभावस्य दाह-हेतुत्वे व्यभिचारमप्याह –**प्रतिबन्धके**ति । **तेन विनापी**ति । प्रतिबन्धकाभावेन विनापीत्यर्थः । **प्रागि**ति । प्रतिबन्धककाले प्रागभावप्रध्वंसौ न सम्भवतः, प्रतियोगिमति चात्यन्ताभावात् । अन्योन्याभावस्तु प्रतिबन्धके सत्यपि तत्रास्तीति दाहप्रसङ्गः । **अनियते**ति । संसर्गाभावत्वस्य चैकस्याभावात् । प्रागभावत्वादिना च हेतुत्वेऽननुगम इतिभावः । **अकिञ्चिदि**ति । प्रतिबन्धकतापि मण्यादेः शक्ति-विघटकत्वेनैव वाच्या । तथा च शक्तिसिद्धिरिति भावः । एतदेवाह—**किञ्चिदि**ति ।

अविनश्यदवस्थे सति पुनरपि पक्षविशेषणासिद्धिं शङ्कते—**न च प्रतिबन्धके**ति । प्रतिबन्धकाभावः कारणमिति वक्तव्ये विशिष्टपदोपादानं सम्बन्धविशेषेण तत्समवधानस्य प्रयोजकतालाभाय । तथा च 'प्रतिबन्धकाभावविशिष्टा' प्रतिबन्धकाभावघटिता 'सामग्री' 'कारणं' फलोपहिता, तथा च तदभावादेव कार्याभावः । अभावस्याहेतुत्वे युक्ति-माह—**तुच्छो ही**ति । कारणत्वस्य भावत्वव्याप्तत्वात् तदभावात्तदभाव इति भावः । उक्तव्याप्तेरनुपगमे त्वाह –**प्रतिबन्धकोत्तम्भके**ति । प्रतिबन्धकमण्यादौ 'उत्तम्भकप्रयोगकाले' उत्तेजकसमवधानकाले 'तेन' प्रतिबन्धकाभावेन । तथा च व्यभिचारेण न तस्य हेतुत्वमिति भावः । उत्तेजकाभा[18a]वविशिष्टप्रतिबन्धकाभाव-हेतुत्वोपगमे न तथेति मनसिकृत्य निरुत्तेजकप्रतिबन्धकमभिप्रेत्याह—**प्राक्प्रध्वंसे**ति । संसर्गाभावत्वस्यानुगतस्य सम्भवे त्वाह—**किञ्चिदि**ति । 'किञ्चित्करत्वे' शक्तेर्नाशस्य

[illegible] । [illegible] । अत्रोच्यते—

भावो यथा तथाऽभावः कारणं कार्यवन्मतः ।
प्रतिबन्धो विसामग्री तद्धेतुः प्रतिबन्धकः ॥१०॥

[illegible] आह—**मन्त्रादीति** ।

ननु [illegible] । [illegible]—मत इति ।

[illegible] ।

[illegible] ।

[illegible] । **अपकुर्वतामिति** । [illegible] ।

[illegible] वा । **यस्येति** । [illegible] इत्यर्थः । [illegible]

कार्यवदिति । यथा कार्योऽभावस्तथा [illegible] इत्यर्थः । [illegible] भावः । **विसामग्रीति** ।

[illegible] ।

[illegible] विसामग्री, न तु [illegible] इत्यर्थः ।

[illegible] ।

तद्धेतुरिति । [illegible] इत्यर्थः । [illegible] ।

[illegible]

15 [illegible] ।

[illegible]—**मन्त्रादी**ति । [illegible]

[illegible] ।

[illegible] इति ॥१९॥

[illegible]—**भाव** इति । [illegible]

20 [illegible] ।

कारणमि[illegible] । [illegible] ।

[illegible]—**प्रतिबन्धक** इति । [illegible]

[illegible] ।

[illegible] ।

[illegible]

न ह्यभावस्याकारणत्वे प्रमाणमस्ति। न हि विधिरूपेणासौ तुच्छ इति स्वरूपेणापि तथा, निषेधरूपाऽभावे विधेरपि तुच्छत्वप्रसङ्गात्। कारणत्वस्य भावत्वेन व्याप्तत्वात्तन्निवृत्तौ तदपि निवर्तत इति चेन्न, परिवर्तप्रसङ्गात्। अन्वयव्यतिरेकानुविधानस्य च कारणत्वनिश्चयहेतोर्भाववदभावेऽपि तुल्यत्वात्। अभावस्यावर्जनीयतया सन्निधिर्न

न हीति। विधिमुखप्रत्ययवेद्यत्वाभावेऽपि निषेधमुखप्रत्ययवेद्यत्वेनाभावस्यापि प्रामाणिकत्वादित्यर्थः। **स्वरूपेणापीति**। अभावत्वस्वरूपेणेत्यर्थः। अभावत्वस्य प्रमाणसिद्धत्वादिति भावः। ननु कारणत्वं भावत्वव्याप्यं कथमभावेऽपि स्यादिति शङ्कते—**कारणत्वस्येति**। कारणत्वमभावत्वव्याप्यं कथं भावेऽपि स्यादित्यपि सुवचं स्यादिति परिहारान्तरमाह—**'परिवर्तनेति**। आपाततः प्रौढिवादेन परिवर्तनप्रसङ्ग उक्तः। वस्तुतस्तु ग्राहकतौल्यात् कारणत्वमुभयत्रेत्याह—**अन्वयेति**। यद्यपि परिवृत्तिप्रसङ्गमुक्त्वा तुल्यत्वाभिधानमयुक्तं तथापि सिद्धान्तो वक्तव्य एवेति भावः। सति शक्ते दहने प्रतिबन्धकाभावस्याकाशादेरिवान्यथासिद्धत्वमिति शङ्कते—**अभावस्येति**। सति प्रतिबन्धकाभावे शक्तिरप्यतन्त्रमिति परिहरति—

तुच्छत्वमलीकत्वं वा विधिभिन्नत्वं वा? नाद्योऽनभ्युपगमात्। द्वितीये त्वाह—**न हीति**। 'विधिरूपेण' विधित्वेन 'असौ' अभावः 'तुच्छः' प्रमाणाविषयः इति हेतोः 'स्वरूपेणापि' स्ववृत्तिधर्मेणापि अभावत्वादिना 'तथा' तुच्छः प्रमाणाविषयः। **निषेधरूपाभाव** इत्यादिः। एकरूपेणाप्रामाणिकत्वेनैवापररूपेण यदि तथात्वं तदा निषेधरूपस्याभावत्वस्य भावधर्मिण्यप्र[ा]माणिकत्वात् भावत्वमपि व्यावर्तेतेत्यर्थः। अन्वयव्यतिरेकाननुविधायित्वेन गगनादिवदन्यथासिद्धिरभावस्येत्याह—**अभावस्येति**। 'अवर्जनीयतया' अकुण्ठशक्तिवह्न्यादिनान्तरीयकतया 'सन्निधिः' समवधानं

---

1 "आमोद"सम्मतः पाठः।

तु हेतुत्वेनेति चेत्, तुल्यम्। प्रतियोगिनमुत्सारयतस्तस्यान्यप्रयुक्तः सन्निधिरिति चेत्, तुल्यम्। भावस्याभावोत्सारणं स्वरूपमेवेति चेद्भावस्यापि भावोत्सारणं स्वरूपान्नातिरिच्यते। तस्माद् यथा भावस्यैव भावो जनक इति नियमोऽनुपपन्नस्तथा भाव एव जनक इत्यपि। को ह्यनयोर्विशेषः ?

---

5 **तुल्यमि**ति। प्रतियोगी शक्तिपदार्थस्तदपनयनद्वारैणैव तस्य मण्यादेः सन्निधिर्न तु स्वाभावोत्सारणद्वारा, येन तदभावो हेतुः स्यादित्याह—**प्रतियोगिनमि**ति। प्रतियोगी शक्तिविरोधी मण्यादिस्तदुत्सारणद्वारा तस्य शक्तिरक्षायामुपक्षीणत्वम्, न तु दाहहेतुत्वमिति प्रतिबन्धस्य स्वाभावोत्सारणमेव द्वारं किं न स्यादिति परिहरति—**तुल्यमि**ति। नतु [ननु ?] प्रतिबन्धकेन स्वाभावोत्सारणं न

10 क्रियते स्वाभावोत्सारणस्वरूपत्वात्तस्येति शङ्कते—**भावस्ये**ति। एवं प्रतिबन्धकाभावोऽपि प्रतिबन्धकोत्सारणद्वारा नान्यथासिद्धः, किन्तु प्रतिबन्धकाभावरूपतया दाहं प्रति कारणमेवेति पर्यवसितमित्याह—**अभावस्यापी**ति। **केचित्तु** भावाभावयोरन्वयव्यतिरेकतुल्यतया भाव एव कारणं न त्वभाव इति विनिगमनाविरहपरतयैव समस्तं व्याचक्षते—**कार्यवदि**ति। व्याकुर्वन्नेवोप-

15 संहरति—**तस्मादि**ति। **को ही**ति। प्रामाणिकत्वाविशेष इति शेषः। नतु[ननु ?]क्तं प्रतिबन्धके सत्यपि दाहो दृश्यत इति तदभावो न कारणमत

कारणेऽपेक्षणीय इति शेषः। **तुल्यमि**ति—भावस्यापि अकुण्ठशक्तिकाभावनान्तरीयकतयैव 'सन्निधि'रपेक्षितो 'न हेतुत्वेने'त्यपि स्यादित्यर्थः। ननु प्रतियोग्युत्सारणं कार्यप्रयोजकं तज्जननेनैवाभावोऽन्यथासिद्ध इत्याह—**प्रतियोगिनमि**ति। 'तस्य' अभावस्य

20 'अन्यप्रयुक्तः' प्रतियोग्युत्सारणार्थः 'सन्निधि'रपेक्षणीय इति शेषः। **तुल्यमि**ति। अभावमुत्सारयत एव तत्प्रयुक्तः सन्निधिरित्यपि स्यादित्यर्थः। **भावस्ये**ति। तथा चाभावमुत्सारयत इत्येव नास्तीति भावः। **अभावस्ये**ति। तथा च प्रतियोगिनमुत्सारयत इत्यपि सिद्धमिति भावः। **भाव** इति। तन्मतसिद्धानामनुवादोऽनुपपन्नः प्रमाणाभावात् नाभ्युपगतः। 'अनयो'र्नियमयोः 'को विशेषः' शक्तिग्राहकानुकूलतर्कसत्त्वासत्त्वाभ्यां वैलक्षण्यम्।

25 वस्तुतस्तु प्रतियोग्यनुपलम्भादेरभावोपलम्भादिकं प्रति कारणत्वस्य तैरभ्युपगमात् भावत्वव्याप्तं कारणत्वं तैरपि नोपेयत इति ध्येयम्। उत्तेजकप्रतिबन्धकस्थले विशिष्टाभावस्य हेतुत्व-

प्रतिबन्धकोत्तम्भकप्रयोगकाले तु व्यभिचारस्तदा स्यात्, यदि यादृशे सति कार्यानुदयस्तादृश एव सत्युत्पादः स्यात्। न त्वेवं, तदापि प्रतिपक्षस्याभावात्। असत्प्रतिपक्षो हि प्रतिबन्धकाभिमतो मन्त्रः प्रतिपक्षः। स च तादृशो नास्त्येव। यस्त्वस्ति, नासौ प्रतिपक्षः। तथापि विशेष्ये सत्येव विशेषणमात्राभावस्तत्र, स चोत्तम्भकमन्त्र एवेत्यन्यैव सामग्रीति चेन्न, विशिष्टस्याप्यभावात्। न हि दण्डिनि 5 सत्यदण्डानामन्येषां नाभावः, किन्तु दण्डाभावस्यैव केवलस्येति युक्तम्।

आह—**प्रतिबन्धके**ति। **यादृशे सती**ति। उत्तेजकाभावविशिष्टस्य प्रतिबन्धकस्याभावः कारणम्। सत्युत्तेजके विशेषणाभावघटितः सोऽस्त्येवेत्यर्थः। एतदेवाह—**तद[ा]पी**ति। उत्तेजककालेऽपीत्यर्थः। कथमेतदत आह—**असदि**ति। उत्तेजकाभावविशिष्ट इत्यर्थः। **यस्त्वस्ती**ति। उत्तेजकाभावविशिष्ट इत्यर्थः। 10 अननुगमं शङ्कते—**तथापी**ति। विशेषणमुत्तेजकाभावस्तदभाव उत्तेजकं तथा च विशेषणाभावो विशेष्यस्य मण्यादेरभाव उभयाभावश्चेति दाहं प्रति हेतुत्रयम्। दाहे च वैजात्यं नास्त्येवेति भावः। विशिष्टाभाव एक एव तत्र कारणमिति नाननुगम इति परिहरति—**विशिष्टस्यापी**ति। दार्ष्टान्तिकं स्फुटयितुं दृष्टान्तं स्फुटयति—**न ही**ति। अदण्डानामन्येषां दण्डिपुरुषभिन्नानां पुरुषाणां 15 दण्डरहितपुरुषाणामित्यर्थः। **न[ा]भाव** इति। अपित्वभाव इत्यर्थः।

मभ्युपेत्य व्यभिचारमुद्धरति—**प्रतिबन्धके**ति। 'यादृशे' उत्तेजकाभावकूटविशिष्टे मण्यादौ। 'उत्पाद'स्तज्जातीयकार्यस्य। 'तदापि' उत्तेजकवन्मण्यादिकालेऽपि। सति प्रतिपक्षे क[18b]थं तदभाव इत्यत्राह—**असदि**ति। असन् प्रतिपक्ष उत्तेजको यत्र स तथा। एवंभूतो हि 'प्रतिबन्धकाभिमतः' प्रतिबन्धकत्वेनाभिमतो मन्त्रादिः 'प्रतिपक्षः' कारणीभूताभाव- 20 प्रतियोगितावच्छेदकावच्छिन्नः न तु शुद्धो मन्त्रादिः। 'स च' मन्त्रादि'स्तादृश' उत्तेजकाभाववान् इदानीन्तन 'नास्त्येव'। 'यस्तु' शुद्धो मन्त्रस्तत्रा'स्ति' 'नासौ प्रतिपक्षः' नोत्तेजकाभावविशिष्टः। विशिष्टाभावस्यानतिरिक्तत्वमभिप्रेत्य शङ्कते—**तथापी**ति। 'विशेष्ये' प्रतिबन्धकत्वेनाभिमते मन्त्रादौ 'विशेषणमु'त्तेजकाभावः। मात्रपदेन विशिष्टप्रतियोगिकत्व- निरासः। 'तत्र' सोत्तेजकप्रतिबन्धकवति। 'सः' विशेषणमात्राभावः। **अन्यैवे**ति। 25 तथाच व्यतिरेकव्यभिचारो दुष्परिहरः। स्वीकुरु वा एकशक्तिमत्त्वेन तयोः कारणत्वमिति भावः। अतिरिक्तं विशिष्टाभावमाश्रित्याह—**ने**ति। विशिष्टस्य प्रतियोगितामवगाहमानेनानुभवेन व्यवस्थितं विशिष्टाभावं दृष्टान्तेन द्रढयति—**न ही**ति। 'अदण्डानां' दण्डाभाववता'मन्येषां' दण्डाभाववतो भिन्नानां पुरुषाणां 'नाभावः,' 'केवलस्य'

यथा हि केवलदण्डसद्भावे [1]उभयसद्भावे [2]द्वयाभावे वा केवलपुरुषाभावः सर्वत्राविशिष्टस्तथा केवलोत्तम्भकसद्भावे प्रतिबन्धकोत्तम्भकसद्भावे द्वयाभावे वा केवलप्रतिबन्धकाभावोऽविशिष्ट इत्यवधार्यताम्। अथैवम्भूतसामग्रीत्रयमेव किं नेष्यते? कार्यस्य तद्व्यभिचारात्।

एतदेव विशदयति—**यथा हीति**। विशेषणविशेष्ययोरुभयाभावे विशिष्टाभावमाह—**केवलदण्डसद्भाव** इति। अत्र हि विशेषणस्य दण्ड[ा]भावस्य विशेष्यस्य पुरुषस्य चाभावः। विशेषणाभावकृतं विशिष्टाभावमाह—'**दण्डपुरुषसद्भाव** इति। अत्र हि दण्डाभावो यद्विशेषणं तन्मात्रं नास्तीति। विशेष्याभावकृतं विशिष्टाभावमाह—'**उभयाभाव** इति। अत्र हि दण्डाभावो विशेषणमस्त्येव विशेष्यं पुरुषः परं नास्तीत्यर्थः। दार्ष्टान्तिकेऽपि विशेषणविशेष्योभयाभावकृतं विशिष्टाभावमाह—**केवलोत्तम्भकेति**। अत्र हि उत्तेजकाभावस्य विशेषणस्य प्रतिबन्धकस्य च विशेष्यस्याभावः। विशेषणाभावकृतं विशिष्टाभावमाह—**प्रतिबन्धकोत्तम्भकसद्भाव** इति। अत्र हि विशेषणस्य उत्तेजकाभावस्यैव परमभावः। विशेष्याभावमात्रकृतं विशिष्टाभावमाह—**द्वयाभाव** इति। अत्र हि विशेषणस्य उत्तेजकाभावस्य सत्त्वेऽपि विशेष्यस्य प्रतिबन्धकस्यैव परमभाव इत्यर्थः। तटस्थः शङ्कते—**अथेति**। यद्यपि विशेषणाभावविशेष्याभावरूपाभ्यां सामग्रीभ्यामेव निर्वाहे न तृतीयकल्पनं तथापि यत्र विशेषणविशेष्योभयाभावस्तत्रोभयकारणतावच्छेदकावच्छिन्नसत्त्वे उभयजन्यतावच्छेदकावच्छिन्नकोत्पत्तौ जातिसङ्करप्रसङ्गभावेन[-भयेन ?] तत्र विलक्षणसामग्रीकल्पनमित्यभिप्रायः। सा च सामग्री प्रत्येकाभावेन कार्यजनने प्रतिबन्धिकेति। **कार्यस्येति**। अनुगतकार्यस्याननुगतकारणानियम्यत्वादित्यर्थः। ननु तृणारणिस्थल इवात्रापि वैजात्यमेव स्यादित्युक्तमित्यत आह—

केवलस्य। विशेषणाद्यभावव्यापकत्वं दृष्टान्तेन विशिष्टाभावस्य दर्शयन् व्यभिचारमुद्धरति—**यथा हीति**। 'केवलदण्डसद्भावे' पुरुषाभाववति पुरुषसद्भावे दण्डवति दण्डाभाववति पुरुषसद्भावे 'द्वयाभावे' पुरुषस्य दण्डस्य चाभावे 'केवलपुरुषाभावः' दण्डाभावविशिष्टपुरुषाभावः 'सर्वत्राविशिष्टः' सर्वत्रैकोऽखण्डः। **तथेत्यादि**। पूर्ववद्विशिष्टाभावस्य विशेषणावच्छिन्नप्रतियोगिताको वा विशेष्याभावो विशेषणविशेष्यसम्बन्धाभावो वा, विशिष्टाभावस्य वा विशेषणविशेष्याभावद्वयवृत्ति। 'एवम्भूतसामग्रीत्रयं' विशेषणाद्यभावघटित सामग्रीत्रयम्। उत्तरं 'कार्यस्येति, दाहसामान्यस्येत्यर्थः, 'तद्व्यभिचारात्' विशेषणाद्यभावव्यभिचारात्। ननु वह्निसंयोगे तृणत्वादिजन्यतावच्छेदकवैजात्यवत् दाहेऽपि

1-2 "उभयेति" इत्यादि पाठः।

जातिभेदकल्पनायाञ्च प्रमाणाभावात्। यथोक्तेनैवोपपत्तेः। भावे वा काममसावस्तु। का नो हानिः। प्राक्प्रध्वंसविकल्पोऽपि नानियतहेतुकत्वापादकः। यस्मिन् सति कार्यं न जायते तस्मिन्नसत्येव जायते इत्यत्र संसर्गाभावमात्रस्यैव प्रयोजकत्वात्।

जातिभेदेति। विशिष्टाभावत्वेनैवानुगतेन कारणत्वे सम्भवति कार्यवैजात्य-कल्पनायां प्रमाणाभावादित्यर्थः। **यथोक्तेने**ति। उक्तविशिष्टाभावत्वेनेत्यर्थः। 5 'अभ्युपेत्या'ह—**भावे वे**ति। तथापि प्रतिबन्धकाभावेनान्यथासिद्धौ न शक्तिसिद्धिरिति भावः। **प्रागि**ति। प्रागभाव इत्यर्थः। **यस्मिन्नि**ति। प्रतिबन्धकसंसर्गाभावत्वेन त्रितयसाधारण्येन कारणत्वमिति नानियतहेतुकत्वमित्यर्थः।

विशेषणाद्यभावजन्यतावच्छेदकं तत् स्यादत एवो(?)भयमित्यत्राह—**जातिभेदे**ति। नन्वन्यथानुपपत्तिरेव मानं स्यात्तत्राह—**यथोक्तेने**ति। अनुभवबलसिद्धेनातिरिक्तेन 10 विशिष्टाभावेनेत्यर्थः। 'उपपत्ते'र्दाहसामान्यस्य। अभ्युपेत्याह—**भाव** इति। तत्तजन्य-ताव[19a]च्छेदकवैजात्यस्य दाहे 'भावे वे'त्य[स्या ?]र्थः। 'असौ' त्वदुक्तः पक्षः। शक्तिश्च दूरप्रतिक्षिप्तैवेति भावः। यादृशप्रतिबन्धके येन येन सम्बन्धेन यदुत्तेजकं तेन तेन सम्बन्धेन तादृशोत्तेजकाभावकूटवत्तादृशप्रतिबन्धकस्य येन सम्बन्धेन प्रतिबन्धकत्वं तेन सम्बन्धेनाभावस्य हेतुत्वं व्यवस्थाप्य निरुत्तेजकप्रतिबन्धकस्थले 15 व्यभिचारमुद्धरति—**प्रागि**ति। तत्र तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावानामेव हेतुत्वं, ध्वंसप्रागभावयोः प्रतियोग्यत्यन्ताभावाविरोधित्वे तु तत्तत्सामान्याभाव एव तथेति ध्येयम्। इतरेतराभावं सत्यपि प्रतिबन्धके सम्बन्ध[ा]न्तरावच्छिन्नप्रति-योगिताकतदभावञ्चादायान्वयव्यभिचारमुद्धरति—**यस्मिन् सती**ति। 'यस्मिन्' येन सम्बन्धेन। **संसर्गे**ति। तादृशसम्बन्धावच्छिन्नप्रतियोगिताकत्वस्य संसर्गाभाव एव 20 विश्रामादित्यर्थः।

ननु संसर्गावच्छिन्नप्रतियोगिताकत्वमेव संसर्गाभावत्वं तच्च भेदसाधारणन्तादात्म्यस्यापि संसर्गत्वात्, संसर्गस्यापि तादात्म्यतया च भेदत्वमपि संसर्गाभावत्वाभिमतसाधारणमत

यत्तु संसर्गाभावत्वादन्योन्याभावविशेषणताकल्पनाद्विति प्रत्यवतिष्ठते, स प्रतिबोधनीयः। तदन्यथाभावे तु जातिभावात् कथं प्रागभावादेः स्यात्, अनुगमहीनानाञ्च कथं कारणत्वावधारणमिति चेत्, मा भूज्जातिः। न हि तदनुगमहीनानामेव व्यवहारानुगमः। सर्वथैव तथैव व्यवहारविरोधप्रसङ्गात्। एतेन प्रतिबन्धके सत्यपि तत्कालीयान्योन्याभावसत्त्वात् कार्योत्पादप्रसङ्गः, अनुत्पादे वा ततोऽप्यधिकं किञ्चिद्वक्तव्यमस्तीति निरस्तम्।

विशेषणताकल्पनाद्विति। तथा च प्रतिबन्धके सत्येव तदन्योन्याभावसत्त्वेन दाहाद्युत्पत्तिरिति भावः। **प्रतिबोधनीय** इति। प्रतिबन्द्या बोधनीय इत्यर्थः। **मीमांसकम्मन्यं** प्रति यत्र कारणाभावात् कार्याभावानुमानं तत्रापि कारणान्योन्याभावमादाय कार्याभावः सिध्येदिति प्रतिबन्दिरित्यर्थः। ननु संसर्गाभावत्वं न जातिः, तथा च प्रागभावादीनां दाहकारणत्वं कथं तेनावच्छिन्नेन इत्यत आह—**तथापीति।** **मा भूदिति।** संसर्गावच्छिन्नप्रतियोगिकाभावत्वस्योपाधेरेव कारणतावच्छेदकत्वात् अनन्यथासिद्धकारणतावच्छेदकमूलत्वादिति भावः। ननु मणौ सत्यपि मण्यभावाद्दाहः स्यात्। न हि स न प्रतिबन्धकाभाव इत्यत आह—**एतेनेति।** **ततोऽप्यधिकमिति।** एकप्रतिबन्धके सति प्रतिबन्धकान्तराभावात् यद्दाहो न जायते तत्र यदीयः शक्तिविरह-

---

आह—**यत्त्विति।** [illegible] संसर्गाभावत्वादन्ये [illegible] प्रतिबन्धके [illegible] 'प्रत्यवतिष्ठते' [illegible], 'स प्रतिबोधनीयः' [illegible]। [illegible] ममात्र [illegible] **मिथ्यास्तु** [illegible] संसर्गाभावत्वं, [illegible](?)। [illegible] 'अनुगमहीनानाम्' [illegible]। **व्यवहारेति।** [illegible]। **सर्वथेति।** [illegible]। **एतेनेति।** [illegible] [95] [illegible]— **अनुत्पादे**ति। **ततोऽपी**ति। [illegible]

यथा हि 'तज्जातीये सति कार्यं जायते, अर्थादसति न जायते' इति स्थिते तद्भावेऽपि तज्जातीयान्तराभावान्न भवितव्यं कार्येणेति न, तथैतदपि, अनुकूलवत् प्रतिकूलेऽपि सति तज्जातीयान्तराभावानामकिञ्चित्करत्वादिति। यत्त्वकिञ्चित्करस्येति, तदप्यसत्। सामग्रीवैकल्यं प्रतिबन्धपदार्थो मुख्यः। स चात्र मन्त्रादिरेव। न त्वसौ प्रतिबन्धकः। ततः किं तस्याकिञ्चित्करत्वेन? तत्प्रयोक्तारस्तु प्रतिबन्धारः। ते च [1]किञ्चित्करा एवेति किमसमञ्जसम्? 5

स्तत्र निमित्तमित्यर्थः। **तज्जातीय** इति। दण्डजातीये सति कार्यं भवति तदभावे सति न भवति इत्यन्वयव्यतिरेकगम्यं तावत् कारणत्वम्। तत्रैकसत्त्वे दण्डान्तरविरहात् कार्येण भवितव्यमिति यथा न भवतीति तथा प्रकृतेऽपीत्यर्थ इत्यधिकनञ्प्रवेशेन व्याख्येयम्। यद्वा शिरश्चालने नञ्, तथा च कार्येण न भाव्यमिति न, अपितु भाव्यमेवेत्यर्थः। व्यतिरेकव्यभिचारवदन्वयव्यभिचारस्याप्यदोषत्वादुभयसमाधेयत्वाद्वा। 10 वस्तुतोऽत्र प्रतिबन्धकत्वावच्छिन्नप्रतियोगिक एक एव सामान्याभावः कारणमिति न व्यभिचारोऽपि। यदि च प्रतिबन्धकाभावत्वेन कारणतायां कारणीभूताभावप्रतियोगित्वं प्रतिबन्धकत्वमित्यन्योन्याश्रयः, तदा मण्याद्यभावकूटत्वेनैव कारणत्वं वाच्यमिति नोक्तदोषः। **तज्जातीये**ति। एकप्रतिबन्धकत्वे प्रतिबन्धकान्तराभावानाम- 15 किञ्चित्करत्वादित्यर्थः। मण्याद्यभावकूटत्वेनैव कारणत्वादिति भावः। प्रतिबन्धकान्यथानुपपत्त्या शक्तिकल्पनमिति यदुक्तं तद् दूषयति—**यत्त्वि**ति। मण्यादिर्न प्रतिबन्धकः, किन्तु प्रतिबन्धः, तत्र प्रतिबन्धकपदं स्वार्थिक-कन्प्रत्ययेन द्रष्टव्यम्। **किं[1] किञ्चित्करा एवे**ति। मन्त्रादिरूपप्रतिबन्धकरा एवेत्यर्थः।

भावः। 'तज्जातीये' दण्डजातीययत्किञ्चिद्व्यक्तौ, 'असति' तज्जातीये 'तद्भावेऽपि' 20 यत्किञ्चित्कारणजातीयसत्त्वेऽपि 'तज्जातीयान्तराभावाद्'ण्डाद्यन्तरस्याभावात्, 'तथैव' तदपि मानत्वाद्यवच्छिन्नसामान्याभाववत् यावद्विशेषाभावे कार्यं न तु व्यक्त्यन्तराभावसत्त्वादेवेत्यर्थः। **अनुकूले**ति। यथानुकूले कारणजातीये सति तज्जातीयान्तराभावो न कार्यप्रतिकूलः, तथा प्रतिकूले प्रतिबन्धकयत्किञ्चिद्व्यक्तौ सत्यां तज्जातीयान्तराभावो नानुकूल इत्यर्थः। **मुख्य** इति। कार्यानुत्पादहेतुतया मन्त्रादिरेव 25 प्रतिबन्धकः। गौणं मतम्(?)।

---

1 'आमोद'सम्मतः पाठः for किञ्चित्करा एवेति किम्।

[illegible]

[illegible] **प्रागभावावच्छेदकेति** [illegible] **तस्मादिति** [illegible] **सामग्र्यनन्तकार्ययोरिति** । **तुल्यकालत्वमेवेति** । **तद्भावयोः** [illegible] **नायं पन्था:** [illegible]

[illegible] **प्रागभावे** [illegible] **तस्मादिति** [illegible]

न चेदेवं शक्तिस्वीकारेऽपि कः प्रतीकारः ? तथा हि—प्रतिबन्धकेन शक्तिर्वा विनाश्यते, तद्धर्मो वा, धर्मान्तरं वा जन्यते, न जन्यते वा किमपि ? इति पक्षाः। तत्राकिञ्चित्करस्य प्रतिबन्धकत्वानुपपत्तेः, विपरीतधर्मान्तरजनने, तदभावे सत्येव कार्यमित्यभावस्य कारणत्वस्वीकारः, प्रागभावादिविकल्पावकाशश्च। तद्विनाशे

न चेदेवमिति। यदि प्रतिबन्धकाभावो न दाहकारणमित्यर्थः। **तद्धर्मो वेति**। 5
विनाश्यत इत्यनुषङ्गः। सन्निधानाच्चरमविकल्पमारभ्य दूषयति—**तत्रेति**।

व्यभिचारात्। न च यावन्त उत्तेजकाभावास्तया विशेषणीकृतास्तावतां यावत्तावच्छिन्नप्रतियोगिताकाभावस्तथा तस्य चातिरिक्तत्वेऽनतिरिक्तत्वे च न व्यभिचार इति वाच्यम्। एवमपि स्वर्गसाधनत्वेन ये श्रुतास्तदभावकूटत्वावच्छिन्नाभावत्वेन स्वर्गसामान्यकारणत्वोपपत्तौ तद्वैजात्यानुपगमप्रसङ्गात्। किञ्च सति प्रति[20a]बन्धके उत्तेजकाभावात् प्रतिबन्धकविशिष्टं कार्यं मा जनिष्ट, तदविशिष्टकार्यन्तु अन्यत्र 10
क्लृप्तसामान्यसामग्रीतः स्यादेव ; तथा प्रतिबन्धकापसरणानन्तरं या कार्यव्यक्तिर्जायते तद्व्यक्तिनिखिलकारणस्य तदानीमपि भावात् विना कारणाभावं कार्यानुत्पादस्य ब्रह्मणापि दुरुपपादत्वात्। क्षणविशेषेण तदुत्पादोपगमे तु तावन्मात्रकारणपरिशेषापत्तेरिति। यत्तु प्रतिबन्धकाभावः कारणतावच्छेदको न तु कारणमिति तन्न, विनिगमनाविरहात् अन्वयव्यतिरेकानुविधानस्य चाविशेषात्। न चासत्यपि भावभूते कारणे सति च 15
तदुपलक्षिते प्रतिबन्धकाभावे (प्रसङ्गः) कार्योत्पत्तेरिति वाच्यं, प्रतिबन्धकाभावोपलक्षितादपि कार्योत्पादापत्तेः। अन्यत्र कारणतावच्छेदकपूर्ववर्तिताया अनपेक्षत्वेऽपि प्रतिबन्धकाभावे तस्मिन् साप्यपेक्षणीयेति चेत्तुल्यं भावभूतकारणतावच्छेदकविशेषेऽपीति। ननु कारणतावच्छेदकस्य तदानीं सत्त्वेऽपि विशिष्टाभावस्य तदव्यवहितप्राक्क्षणवृत्तितया तत्प्रतियोगितावच्छेदकत्वेन कारणतावच्छेदकस्य कथन्तेन रूपेण कारणतावच्छेदकत्वमिति 20
चेन्न ; द्विविधो हि विशिष्टाभावः, एको दैशिकः, सम्बन्धमात्रेण विशेषणीभूतं यत्तदवच्छिन्नप्रतियोगिताकश्च। तत्र तत्काले सति विशेषणे यद्यप्यन्त्यः सम्भवति तथापि नाद्य इति न तथा कारणताविरोध इति दिक्। तादृशाभावस्य प्रतियोगिसमानाधिकरणतया कारणताघटकाभावस्य च तदसमानाधिकरणत्वेनावश्यं विशेषणीयतया न क्षतिरित्याहुः। [1]असत्पक्षे त्वदुक्तदोषाणां त्वत्पक्षेऽपि सम्भव इत्याह—**न चेदिति**। 25
तद्धर्मो वा विनाश्यते। तद्धर्मान्तरं वह्निनिष्ठं शक्तिनिष्ठं वा। सन्निधिक्रमेण दूषयति—**तत्रेति**। अन्त्यं दूषयित्वा तृतीयं दूषयति—**विपरीतेति**। दाहप्रतिकूलेत्यर्थः। प्रथमद्वितीयौ दूषयति—**तद्विनाश** इत्यादिना।

---

1. Vide दिनकरी and रामरुद्री—on शक्तिविचार।

तद्धर्मविनाशे वा पुनरुत्तम्भकेन तज्जननेऽनियतहेतुकत्वं, पूर्वं स्वरूपोत्पादकादिन्धनी-मुत्तम्भकादुत्पत्तेः। न च समानशक्तिकतया तुल्यजातीयत्वान्नैवमिति साम्प्रतम्। विजातीयेषु समानशक्तिनिषेधात्। न च प्रतिबन्धकशक्तिमेवोत्तम्भको विरुणद्धि, न तु भावशक्तिमुत्पादयतीति साम्प्रतम्। तदनुत्पादप्रसङ्गात्। कालविशेषात्तदुत्पादे तदेवानियतहेतुकत्वमिति।

तज्जनन इति। शक्तिजनने तद्धर्मजनने वेत्यर्थः। अनियतहेतुकत्वमेवोपपादयति—**पूर्वमि**ति। **तदुत्पादकात्** वह्न्याद्युत्पादकात्। 'नित्ये नित्यैव सा शक्तिरनित्ये भावहेतुजे'ति तवाभ्युपगमादित्यर्थः। ननूत्तेजके 'स्वरूपोत्पादके शक्त्यनुकूलाऽपरा शक्तिरि'त्येकशक्तिमत्त्वेन नानियतहेतुकत्वमित्यत आह—**न चे**ति। **निषेधादि**ति। न **विजात्येकशक्तिमानि**त्यनेनेति भावः। **तदनुत्पादे**ति। वह्नौ पुनः शक्त्यनुत्पादाददाहकत्वप्रसङ्गादित्यर्थः। ननु कालविशेषादेव वह्नौ शक्तिरुत्पत्स्यत इत्यत आह—**काले**ति। ननु विशिष्टाभावः कारणं, स च विशेषणाभावविशेष्या-भावोभयाभावानुगत इति यदुक्तं तत्र विशिष्टस्यातिरिक्तस्याभ्युपगमे त्वपसिद्धान्तः।

पुनरुत्तम्भकेन पुनरुत्तम्भकेनैवेति यावत्। व्यवच्छेद्या आश्रयसामग्री। तज्जनने दाहानुकूलशक्तितद्धर्मयोर्जनने। स्वरूपं स्वाश्रयः स्वं रूपं यस्येति व्युत्पत्तेः। तदु(त्)-त्पत्तेः शक्तिधर्मयोः। समानशक्तिकतया स्वाश्रयसामग्र्युत्तम्भकयोर्नैवं नानियतहेतुकत्वम्। **विजातीयेष्वि**ति। इदमुपलक्षणमुत्तेजकाधीनाया अपि शक्तेः प्रतिबन्धकान्नाशः स्यादित्यपि बोध्यम्। उत्तेजकविशिष्टमेव प्रतिबन्धकं यदा समवहितं तदभिप्रायेणाह— **न चे**ति। प्रतिबन्धकशक्ति [20b] मन्त्रादिनिष्ठां दाहानुकू[ल]शक्तिनाशप्रयोजकशक्तिं विरुणद्धि नाशयति। प्रतिबन्धकोत्तेजकयोः कालिकसन्निधानस्थलमभिप्रेत्याह— **तदनुत्पादे**ति। दाहानुकूलशक्त्यनुत्पादेत्यर्थः। **कालविशेषात्** उत्तेजकसमवधान-कालात्। **तदुत्पादे** दाहशक्त्युत्पादे। एतेन वह्निः कस्वह्निसंयोगो वा दाहानुकूलादृष्टातीन्द्रियवान् अतीन्द्रियवान् वा दाहजनकत्वाद् भावत्वाद्वा स्थितिस्थापका-दृष्टवदात्मसंयोगोष्णस्पर्शानादायार्थान्तरवारणाय प्रथमसाध्ये विशेषणत्रयं, समवाय-सम्बन्धस्य साध्यतावच्छेदकत्वाच्च जन्यमात्रस्य कालोपाधितया अदृष्टादेरपि तेन सम्बन्धेन वृत्त्या नार्थान्तरम्। अतएवाभावस्य तन्मते अनुपलब्ध्यत्वेनाती-न्द्रियतया तेनापि नार्थान्तरं, समवायोऽतिरिक्तोऽनतिरिक्तो वेत्यन्यदेतदित्यवधेयम्। अप्रयोजकत्वात् प्रथमे साधनावच्छिन्नसाध्यव्यापकस्य बहिरिन्द्रियाप्रत्यक्षस्यो-पाधित्वात्, द्वितीये ऐन्द्रियकत्वावच्छिन्नसाध्यव्यापकस्य द्रव्यत्वस्य तथात्वाच्च।

---

1 कादिविशेषणः।

न च मन्त्रादीनिव सहकारिणः प्राप्य ते कार्यकारिण इति साम्प्रतम् । तेषु चिरध्वस्तेष्वपि कार्योत्पादात् । नापि प्रध्वंससहायास्ते तथा । एवं हि यागादिप्रध्वंसा एव स्वर्गादीनुत्पादयन्तु, कृतमपूर्वकल्पनया । तेषामनन्तत्वादनन्तफलप्रवाहः प्रसज्यत इति चेत्, अपूर्वेऽपि कल्पिते तावानेव फलप्रवाह इति कुतः ? अपूर्वस्वाभाव्यादिति

---

5 'प्रोक्षिता एव व्रीहयोऽवघाताद् ऊर्ध्वं' इति वाक्येष्वन्वयं प्रमाणयन्ति । अर्थापत्त्यन्यथोपपत्तिं निरस्यति—न चेति । **मन्त्रादीन्** प्रोक्षणादिकारण-मन्त्रादीन्, **ते** प्रोक्षणादयः, **तेषु** मन्त्रादिषु । ननु मन्त्रादिध्वंससहकृता प्रोक्षणादयोऽवघातहेतवः स्युरित्याह—**नापीति** । यागादीनामपूर्वव्यापारकल्पना न स्यात् । प्रत्युत कारणीभूताभावप्रतियोगित्वेन यागादीनां स्वर्गादिप्रतिव्यापकत्वमेव
10 पर्यवस्येत् । ध्वंसव्यापारत्वे यागादीनां फलप्रवाहानन्त्यमनन्तत्वापूर्वमेव व्यापार इति शङ्कते—**तेषामिति** । यद्यपि ध्वंसव्यापारत्ववादिनामनन्तफलप्रवाहजनक[त्वा]-पादकं नास्ति ; न हि यावद्व्यापारसत्त्वं फलमिति नियमः ; संस्कारे व्यभिचारात्, तथापि विवादाध्यासितः कालो यदि चैत्रस्वर्गानन्तरे सति तत्स्वर्गजनकयागध्वंसवान् स्यात्, तत्स्वर्गाधारः स्यात् इति विवक्षितत्वात् ।
15 **अपूर्वेऽपीति** । तत्रापि नियामकं किञ्चिन्नास्तीत्यर्थः । **अपूर्वेति** । **अपूर्वेति** । यदुक्तकालावच्छिन्नफलजनकस्वाभाव्यादित्यर्थः ।

[illegible] तथा तत्र इति नातिप्रसङ्ग इत्याह—**न चेति** । प्रोक्षणोच्चरिता [illegible] कार्यकारिणः [illegible], तेषु मन्त्रादिषु, कार्यस्य [illegible] कारणस्येत्यादात्, तथा च मन्त्रादिध्वंसस्येनापि संस्कारोऽस्त्वेव इति भावः । **नद्**[1]-
20 **ध्वंसेति** । [illegible] । [illegible] प्रोक्षणीति [illegible]
[21a][illegible] । न [illegible] [2][illegible] [3][illegible] [illegible] । [illegible] **एवमिति** ।
प्रध्वंसा एवेति । [illegible] । अपूर्वेऽपि अपूर्वोत्पत्तेन, शङ्कते—
तेषामिति । यागादिध्वंसानामित्यर्थः । **तावानिति** । तावत्कालकालावच्छिन्नेत्यर्थः ।
25 [illegible] न स्यात् [illegible] भावः ।
अपूर्वेति । [illegible]

---

1 [illegible] 2 [illegible] 3 [illegible]

4 [illegible]

चेत्, तुल्यमिदमिहाऽपि। तावतापि तत्प्रध्वंसो न विनश्यतीति विशेषः।

स्यादेतत्। उपलक्षणं प्रोक्षणादयो, न तु विशेषणम्। तथा चाविद्यमानैरपि तैरुपलक्षिता व्रीह्यादयस्तत्र तत्रोपयोक्ष्यन्ते। यथा गुरुणा टीका, कुरुणा क्षेत्रमिति

तुल्यमिति। तावत्कालफलजनकस्वभावत्वमेवेत्यर्थः।

अवघातादावुपयोगः प्रोक्षणादीनामुपलक्ष[ण ?]तयैव स्यादिति तदनुरो[रो?]धेन नाधेयशक्तिकल्पनमिति शङ्कते—**स्यादेतदि**ति। 5

दित्यर्थः। **तुल्यमि**ति। यथापि तद्ध्वंसजन्यस्वर्गे चरमत्वेनाभिमतफलप्रागभावो हेतुर्वाच्य इत्यर्थः। यथाश्रुते तस्यां शाखायां स्वभावमात्रेण कार्याभावस्य दुरुपपादत्वादिति ध्येयम्। तावतापि चरमकल्पेऽपि विशेषो वैलक्षण्यमपूर्वात् ननु[न तु ?] स्वध्वंसजन्ये स्वस्य स्वजन्ये च स्वध्वंसस्य कारणत्वाव्यवहारात् स्वेन स्वध्वंसस्य स्वध्वंसेन च 10 स्वस्यान्यथासिद्धत्वम्, अन्यथा दाहं प्रति स्वध्वंसद्वारा गणारम्भकसंयोगस्य द्रव्यनाशं प्रति च हेतुतापत्तिः। एवं प्रतियोगिजन्यकार्यसामान्यं प्रत्येव तत्प्रागभावस्य तथात्वं स्यात्, ग्रहणस्मरणाकारकैकं नोपेयते ज्ञानं तेन संस्कारजनकज्ञानध्वंससाक्षात्कारस्य संस्कारद्वारा तादृशज्ञानजन्यस्मरणानात्मकतया नोक्तव्याप्तेर्व्यभिचारः, यागादिध्वंसस्य कालोपाधितया तज्जन्यस्वर्गादिकं प्रति हेतुत्वानुपगमेऽपि न क्षतिरिति चेत्तुल्यमिहापि। 15 यत्त्वेवमन्यथासिद्ध्यनुपगमे स्मृतिजनकसंस्कारोऽपि न सिध्येदिति, तन्न, ज्ञानोत्पत्ति-तृतीयक्षणेऽपि स्मृतेरुदयेन तत्र तद्ध्वंसव्यापारकत्वासम्भवादिति।

अव्यवहितप्राक्कालवृत्तित्वं न कारणत्वमपि तु प्राक्कालवृत्तित्वमात्रं, तथाच विनापि व्यापारं चिरविनष्टस्यापि प्रोक्षणस्यावघातहेतुत्वमस्तु, किं संस्कारेणेत्यभिप्रेत्याह—**स्यादेतदि**ति। उपलक्षणमिति कार्याव्यवहितप्राक्कालान्वयिव्रीहौ उपलक्षणं तदव्यय- 20 व्यवहिततत्प्राक्कालानन्वयि, न तु विशेषणं न तदन्वयि अविद्यमानेन यत्किञ्चित्-पूर्वक्षणवृत्तिना प्रोक्षणेन तत्र तत्रावघातादौ असतापि तेन व्यावृत्तिप्रत्ययमुदाहरति—**यथे**ति। तत्प्राक्कालवृत्तित्वमात्रमपि न कार्यत्वाभिमतप्राक्कालवृत्त्य[त्य ?]न्ताभावा-प्रतियोगित्वं जन्ये सम्भवति इ[21b]त्यव्यवधानमवश्यं निवेश्यं, तच्चाव्यवधानं सामान्यतो यद्यप्यसम्भवं तथापि तत्तन्निरूपिताव्यवधानानां संसर्गमर्यादया निवेशनीयतया 25 नाननुगमस्तथाच स्वस्वव्यापारान्यतरयोस्तदव्यवहितप्राक्क्षणनिष्ठात्यन्ताभावाप्रतियोगित्व-मेव तस्य कारणत्वं कालिकव्यापारान्यतरसम्बन्धेन तदव्यवहि[त]प्राक्कालवृत्त्यत्यन्ताभावा-

चेन् ; तदसन् । न हि स्वरूपव्यापारयोरभावेऽप्युपलक्षणस्य कारणत्वं कश्चिदिच्छति, अतिप्रसङ्गात् । व्यवहारमात्रं तु तज्ज्ञानसाध्यं, न तु तत्साध्यम् । तज्ज्ञानमपि स्वकारणाधीनं, न तु तेन निरन्वयध्वस्तेन जन्यते । अस्तु वा तत्राप्यतिशयकल्पना, किमच्छिन्नम् ? यद्वा, यागादेरप्युपलक्षणत्वमस्तु । तदुपलक्षितः कालो यज्वा वा
5 स्वर्गादि साधयिष्यति, कृतमपूर्वेण । न च देवदत्तस्य स्वगुणाकृष्टाः शरीरादयो भोगाय,

एतद्दूषयति—**स्वरूपे**ति । नन्वेवं गुरुकुरुभ्यामपि टीकाक्षेत्रयोरुपलक्षणं न स्यात् । न हि ताभ्यां तत्र व्यापारः कश्चिदाहित इत्यत आह—**व्यवहारमात्रन्त्वि**ति । **तज्ज्ञानं** साध्यम् । न तु तत्साध्यं कुरुगुरुज्ञानसाध्यम् । न तु कुरुगुरुसाध्यमित्यर्थः । ननु तर्हि तज्जनितव्यापारं विना ज्ञानमपि कथं स्यादित्यत आह—
10 **तज्ज्ञानमपी**ति । कुरुणा गुरुणा चेत्यर्थः । कुरुणा क्षेत्रं कृतमिति शाब्दज्ञानजनितसंस्कारप्रभवस्मृत्यधीनो व्यवहार इति भावः । ननु कुरुगुरुभ्यां तज्ज्ञानमपि चेन्न जनितं तदा कथमुपलक्षणत्वमपीत्यत आह—**अस्त्वि**ति । टीकायां वाक्यसमूहे क्षेत्रे च ताभ्यां काचिच्छक्तिराहितेत्यर्थः । यद्वा अभ्युपेत्याह—**अस्त्वि**ति । प्रोक्षणादीनामुपलक्षणत्वे दोषान्तरमाह—**यद्वे**ति । नन्वपूर्वे मानान्तरमस्ति न
15 त्वावेवशक्तौ इत्यत आह—**न चे**ति । स्वगुणसहकारिणः **स्वगुणे**त्यादिना इति वा ।

प्रतियोगित्वं वा तद्वाच्यमिति व्यापारस्य जनकत्वमित्यभिप्रायेणाह—**तदसदि**ति । स्वरूपं कारणत्वेनाभिमतमभावेऽपि अव्यवहितप्राक्कालावृत्तित्वेऽपि उपलक्षणस्य यत्किञ्चित्प्राक्कालवृत्तिमात्रस्य अतिप्रसङ्गात् व्यभिचारिसाधारणत्वात्, तथाच नियमांशप्रवेशेऽव्ययमव्यवधाननिवेश इति भावः । नन्वेवं निरन्वयध्वस्तस्य गुरोः कुरोर्वा कथं
20 व्यावर्तकत्वमित्यत आह—**व्यवहारमात्रन्त्वि**ति । करणव्युत्पत्त्या व्यावृत्तिप्रत्यय इत्यर्थः । तज्ज्ञानसाध्यं विशेषणज्ञानसाध्यं, तज्ज्ञानमपि विशेषणज्ञानमपि, तेन विशेषणेन कुरुणा गुरुणा वा कुरुगुरोस्तत्कारणत्वव्यवहारः । सत्त्वे त्वाह—**तत्रापी**ति । तत्रापि कुरुगुरुस्थलेऽपि । उक्तमेवार्थं प्रतिबन्द्या द्रढयति—**यद्वे**ति । ब्रीहौ प्रोक्षणमुपलक्षणं सत् सहकारीति दृष्टान्तस्य साम्यार्थमाह—**यज्वा वे**ति । **न चे**ति । देवदत्तस्य
25 शरीरादय इति पक्षः आदिपदात्तदवयवपरिग्रहः, आदिविशेषणाच्च 'सिद्धसाधनं देवदत्तीयत्वावच्छेदेन वा भागसिद्धेरुद्देश्यत्वात् तदनुपादानेऽपि न क्षतिः । गुणाकृष्टा भोगायेति साध्यं गुणो विशेषगुणः । तेन संयोगेन नार्थान्तरं, तथाच तदात्मसमवेतविशेषगुणसहकारेण भोगजनका इत्यर्थः पर्यवस्यति ।

1 [illegible]

तद्भोगसाधनत्वात्, स्वर्गादिवदित्यन्वयित्वादपूर्वसिद्धेर्नाविशेष इति साम्प्रतम्। इच्छाप्रयत्नज्ञानैर्यथायोगं सिद्धसाधनात्। न च तद्रहितानामपि भोग इति युक्तिमत्, येन ततोऽप्यधिकं सिध्येत्। नापि स्वगुणोत्पादिता इति साध्यार्थः। मनसाऽनैकान्तिकत्वात्। नापि कार्यत्वे सतीति विशेषणीयो हेतुः। तथाप्युपलक्षणैरेव सिद्धसाधनात्। असतां तेषां कथमुत्पादकत्वमिति चेत्, तदेतदभिमन्त्रणादिष्वपि तुल्यम्। तस्माद्भावभूतमतिशयं जनयन्त एव प्रोक्षणादयः कालान्तरभाविने फलाय कल्पन्ते। प्रमाणतस्तदर्थमुपादीयमानत्वात्, यागकृषिचिकित्सावदिति। अन्यथा कृष्यादयो दुर्घटाः

आद्ये तावदाह—**इच्छेति**। **यथायथ[योग?]मिति**। सूपकारसाधितान्नो[न्ने?]रा ह इच्छामात्रं सहकारि। परदेशभोगे प्रयत्नोऽपि ज्ञानं सर्वत्रेत्यर्थः। **तद्रहितानामिति**। इच्छादिरहितानामित्यर्थः। अन्त्यमाशङ्क्य निराचष्टे—**नापीति**। उपलक्षणैर्जन्मान्तरज्ञानादिभिः सिद्धसाधनमर्थान्तरमित्यर्थः। **अतिशयमिति**। व्रीहिनिष्ठमिति शेषः। (ननु.......?) आत्मनिष्ठ एव किं न स्यादिति वाच्यम्, यो यत्र यदुद्देशेनोपादीयते स तत्र फलजनक इति व्याप्तेः। यद्वा यत्रावघातरूपं फलं चिरभावि तदनुगुणो व्यापारस्तु समानाधिकरण[ः?] कल्पयितुमुचित इति भावः। न च विहितत्वेन पुरुषनिष्ठातिशयजनकत्वमनुमेयम्, अ[अ?]प्रयोजकत्वाच्चिकित्सादिना व्यभिचाराच्चेति। **तदर्थमिति**। कालान्तरभाव्यवघातफलार्थमित्यर्थः। यद्‌ यत्कालान्तरभाविफलार्थमुपादीयते तत्तदनुगुणमतिशयं जनयतीति सामान्यव्याप्तौ दृष्टान्तमाह—**यागेति**। यागेऽपूर्वमुभयसिद्धमिति तदुल्लङ्घ्याह—**अन्यथेति**। आधेयशक्तिं विनेत्यर्थः। कृषिकर्मणा

स्वर्गादिवत् तदात्मभोगसाधनस्वर्गादिवत्। स्वगुणोत्पादिता इति तथाच भोगायेत्यनुपादेयमेवेति भावः। उपलक्षणैर्ज्ञानादिभिः असतां कार्याव्यवहितप्राक्काले तेषां ज्ञानादीनामेतत्तदानीमसतामनुपपादकत्वं भावभूतमिति यथोक्त्या ध्वंसव्यापारतानिराकरणाय अतिशयं तत्फलानुकूलम्। उपजनयन्त इत्यस्य व्रीह्यादावित्यादिः, तेन नादृष्टेन सिद्धसाधनं, प्रमाणमिति भ्रमेण तद्गतफलार्थितया क्रियमाणे व्यभिचारवारणाय, तथाचाभ्रान्तेन यत्र कालान्तरभाविफलार्थित्वेन यत् क्रियते तत्तन्निष्ठव्यापारजनकमिति सामान्यमुखी व्याप्तिरवसेया। [22a]कृषेर्दृष्टान्तासिद्धिमपाकरोति—**अन्यथेति**। कृष्यादेस्तादृशातिशयजनकत्व इत्यर्थः। कृष्यादय इत्यत्रादिपदात् लाक्षासेकादिपरिग्रहः। दुर्घटश्च नियतजातीयकार्यम्। ननु

प्रसज्येरन्। बीजादीनामापरमाण्वन्तभङ्गात्, तेषु चावान्तरजातेरभावान्नियतजातीयकार्यारम्भाऽनुपपत्तेः। अत्रोच्यते—

संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिभिः।
स्वगुणाः परमाणूनां विशेषाः पाकजादयः ॥११॥

कालान्तरभाविशस्यावगमाय बीजभूम्यादेरतिशयाधानं, चिकित्साकर्मणा कालान्तरभाव्यारोग्यफलहेतुः शरीरेऽतिशयाधानमित्यर्थः। ननु स्वरूपत एव बीजमनुवर्तते; किं तदतिशयेनेत्यत आह—**बीजा[दी?]नामिति**। ननु कलमत्वयवत्वादिजात्यवच्छिन्नाः परमाणव एव कलमयवाङ्कुरकारिण इति किं तदतिशयकल्पनयेत्यत आह—**तेषु चेति**। पृथ्वीत्वावान्तरजातेः परमाणावनभ्युपगमादिति भावः ॥१०॥

प्रोक्षणादिनाऽतिशयो जन्यत एव, न तु व्रीह्यादौ इत्यत आह—**संस्कार** इति। **पुंस** इति पुंसीत्यर्थः, आत्मनीति यावत्। प्रोक्षणावान्तरभेदोऽभ्युक्षणम्। आदिपदान्मन्त्रादीनामुपग्रहः। न च व्रीहिनिष्ठ एव किं न कल्प्यत इति वाच्यम्, व्रीहिषु प्रत्येक एव संस्कारो व्यासज्यवृत्तिस्तदा कस्यचिद् व्रीहेर्नाशान्नाशप्रसङ्ग आश्रयनाशाविशेषात्, वृत्तादयः [........?] किञ्चिदाश्रयनाशादेव नश्यन्ति प्रत्यभिज्ञा तु खण्डवृत्तनिबन्धना, वृत्तनाशेनानुपपत्त्या। प्रतिव्रीहि नानाशक्तिकल्पने गौरवम्। पुरुषनिष्ठसंस्कारेण व्रीहीणां स्वरूपसम्बन्ध एव। अतस्तत्फलभागितयैव छिन्नायोपपत्तिरिति भावः। परानुमाने कृष्यादिदृष्टान्तासिद्धिः स्वानुमाने व्यभिचाराभावश्चाह—**स्वगुणा** इति। **विशेषा** इति विशेषका इत्यर्थः। तत्रातिशयो दृष्टकारणत्वादिति

विजातीयबीजादिसहकारेणैव नियतजातीयकार्यजनकत्वं स्यादित्यत आह—**बीजादीनामापरमाण्वन्तभङ्गादि**ति। ननु तदारम्भकविजातीयपरमाणुसहकारेणैव तथात्वं स्यादित्यत आह—**तेष्वि**ति। परमाणुष्वित्यर्थः। अवान्तरजातिः द्रव्यविभाजकन्यूनवृत्तिजातिः ॥१०॥

'चिरध्वस्त'मित्यादियुक्त्या सिद्धस्य प्रोक्षणजन्यातिशयस्य व्रीहिनिष्ठत्वमपाकरोति—**संस्कार** इत्यादि। संस्कारः प्रोक्षणाभ्युक्षणादिकरणक-कालान्तरभाविफलानुगुणोऽतिशयः पुंस एव पुंवृत्तिरेव न तु व्रीहिवृत्तिः, पुरुषातिरिक्तवृत्तित्वे बाधकप्रमाणविषयत्वात्, व्रीहिनिष्ठत्वे तथात्वाद्वा संस्कार इत्येकवचनेन च बाधकमानं ध्वनितम्। कालान्तरभाविफलानुगुणो व्यापारः सिध्यन् लाघवादेक एव, तस्य व्रीहिनिष्ठत्वे यत्किञ्चिद्व्रीहिनाशात्तन्नाशेऽवदानानुपपत्तिः। अतोऽनायत्या व्यधिकरणोऽपि एक एवादृष्टभेदस्तथा कल्प्यत इति ध्वनितम्। प्रोक्षणाभ्युक्षणे अधऊर्ध्वमुखपाणिकरणकजलक्षेपौ। विनातिशयं कृष्यादितो नियतजातीयकार्योत्पत्तिमुपपादयति—**स्वगुणा** इति। स्ववृत्तयः परमाणुवृत्तयः विशेषा विलक्षणा नियतजातीयकार्यनियामका विशेषपदादुक्तया व्यावर्तितम्। वैलक्षण्ये हेतुमाह—**पाकजादय** इति। आदिपदाददृष्टभेदनिमित्तकोत्कर्षादेः

यथा हि देवताविशेषोद्देशेन हुताशने हविराहुतयः समन्त्राः प्रयुक्ताः पुरुषमभिसंस्कुर्वते न वह्निं, नापि देवताः, तथा व्रीह्याद्युद्देशेन प्रयुज्यमानः प्रोक्षणादिः पुरुषमेव संस्कुरुते, न तम्। यथा च कारीरीजनितसंस्काराधारपुरुषसंयोगाज्जलमुचां सञ्चरणजलक्षरणरूपा

साध्यवैकल्यमिति भावः। न च परमाणोराश्रयशक्तिः पाकगुणा वा सन्तु, न कश्चिद्विशेष इति वाच्यम्, तदावद्धानपविनि [तदारब्धावयविनि ?] तज्जातीयगुणो- 5 पलम्भात्तत्र कल्पनाया आवश्यकत्वात्। आदिपदात् संयोगविशेषा गृह्यन्ते।

यो यदुद्देश्येन क्रियते स तद्गतातिशयाधायक इति परव्याप्तौ व्यभिचारमाह— **यथा हीत्यादि**। देवतायाः प्रीतिहेतुतया व्रीह्यादीनां च व्यापारभागितया उद्देश्यत्वमविशिष्टमिति भावः। न च यद्गतफलार्थितया यत् क्रियते तत् तद्गतातिशयजनकमिति व्याप्तेरनुमानं श्येनेन व्यभिचारात्। न च तत्रापि शत्रावेव 10 दुरदृष्टं श्येनेन जन्यत इति वाच्यम्—

"शास्त्रदेशितं फलमनुष्ठातरी"-

त्युत्सर्गस्य बाधकं विना या[त्या ?]गायोगादिति भावः। तर्हि अवघातादौ कथं व्रीहेरुप- योग इत्यत आह—**यथा चेति**। प्रोक्षणादिजन्यादृष्टवदात्मसंयोगाद् व्रीह्यादीनामुत्तर- क्रिया अवघातादिरित्यर्थः। ननु प्रोक्षणादीनामपूर्वजनकत्वे कदाचित् फलाभावः कथं 15

संस्थानविशेषपरिग्रहः। **केचित्तु** आदिपदात् सुवर्णाद्यारम्भप्रयोजकगुरुद्रव्यसंयोगपरिग्रह इत्याहुः।

कालान्तरभाविफलाय यदुद्देशेनाभ्रान्तेन यत्र यत् क्रियते तत्तन्निष्ठातिशयजनकमित्यत्र व्यभिचारमाह—**यथा हीति**। हुताः होमविधिविषयाः तेन भ्रमाधीनत्वनिरासः, यथाश्रुतेऽनन्वयात्। न वह[ह्नि ?]मिति दृष्टान्तार्थं, वस्तुतस्तु व्रीहेरुद्देश्यत्वं कर्म्मता 20 देवतानाञ्चानिराकर्तृ[क]सम्प्रदानत्वमिति न हविरित्येव वक्तुमर्हति। संस्कुर्वते अभिमतसंस्कारवन्तं कुर्वन्ति, न तु व्रीह्यादि। न च यद्गतफलार्थितया- यत् क्रियते तत्तन्निष्ठातिशयजनकमिति वाच्यम्, अप्रयोजकत्वात्। नानाव्या[22b]पारकल्पने गौरवाच्च। शत्रुवधोद्देशेन क्रियमाणे श्येने व्यभिचारादिति **केचित्**, तन्नापि गयाश्राद्धादिजन्यादृष्टस्य पितरीव शत्रावेव तददृष्टमिति तु **मिश्राः**। वस्तुतस्तु 25 यद्गतफलार्थितयेतिव्याप्तौ व्यभिचारन्दर्शयन् परम्परया प्रत्यासन्नस्यादृष्टस्य जनकतां दर्शयति—**यथा चेति**। संस्काराधारत्वं पुरुषस्येत्यनेन यथोक्तव्यभिचारो दर्शितः, तदाधारपुरुषसंयोगादित्यनेन च परम्परासम्बन्धः, क्रियाविशेषा अवघातादयः। ननु तददृष्टं व्रीहाववश्यमवघातं जनयेत्, अजनने फलैकनाश्यस्य तस्यानाशप्रसङ्ग

क्रिया, तथा व्रीह्यादीनां तत्तदुत्तरक्रियाविशेषाः। यथा चैकत्र कर्तृकर्मसाधनवैगुण्यात् फलाभावस्तथा परत्रापि। आगमिकत्वस्योभयत्रापि तुल्यत्वात्। न तर्हि बर्हिष इव व्रीह्यादेः पुनरुपयोगान्तरं स्यात्। उपयोगे वा तज्जातीयान्तरमप्युपादीयेत, अवि-

---

स्यादपूर्वस्य समस्तदृष्टोपपादकत्वादित्यत आह—**यथा** चेत्यादि। कारीर्यां यथा कर्मादिवैगुण्यात् फलाभावस्तथा प्रकृतेऽपि स्यादित्यर्थः। नन्वागमसिद्धत्वेनावश्यमेव फलेन भाव्यमित्यत आह—**आगमिकत्वस्ये**ति। एवं सति कारीर्यामपि फलाभावः कदाचिन्न स्यादित्यर्थः। ननु व्रीहिर्ध्येन संस्क्रियते तदावघातादौ कथं तस्यैव पुनरुपादानं विनियुक्तविनियोगविरोधात्? अत्र **बर्हिष** इति व्यतिरेके दृष्टान्तः। यथा बर्हिषः पुनरुपादानप्रापकं वचनमस्ति—

'दर्भाः कृष्णाजिनम्' इति,

न तथात्रास्तीत्याह—**न तर्ही**ति। 'बर्हिस्तृणाति,' 'बर्हिषि हविरासादयति' इतिवद् यथा बर्हिषः पुनरुपादानं न तथा प्रकृते स्यादिति व्यतिरेकदृष्टान्त **इत्येके**। 'इडो यजति', 'बर्हिर्यजति', बर्हिर्जयतीति विहितस्य बर्हिर्या[ग]स्य यथा न पुनरुपादानं, तथा व्रीहेरपि न स्या**दित्यपरे**। ननु 'व्रीहीन् प्रोक्षति', 'व्रीहीनवहन्ति', 'व्रीहीन् पिनष्टी'त्यवश्य[म्ना ?]तादावपि व्रीहिकर्म नैव प्रतीयत इति पुनरुपयोगः कथं न स्यादित्यत आह—**उपयोगे वे**ति।

इत्याशङ्कायामाह—**यथा चे**ति। कर्म्म त्यागसेकादि तद्वैगुण्यम् अन्यायोपादानादिना। कर्तृवैगुण्यम् आशुच्यादिना। साधनं हस्तादि। तद्वैगुण्यं विहितपरिमाणयथामन्त्रि-वेशाद्यभावादिना। एकत्र कारीर्यां फलाभावः अदृष्टानुत्पत्तिः, परत्र प्रोक्षणे आगमिकत्वस्यागमप्रामाण्यानुपपत्तिरु[न !]पकल्पकस्य, उभयत्र कारीरीप्रोक्षणयोः साङ्गत्वेऽपि अजनितपरमापूर्वाङ्गापूर्वस्यैव तन्नाशः कल्पनीय इति च ध्येयम्।

ननूत्पादिताङ्गापूर्वस्य पिण्डास्तरणबर्हिषो विनियुक्तविनियोगविरोधाद् यथा कर्मान्तरे नोपयोगस्तथा प्रोक्षितव्रीहेरप्यवघातादौ विनियोगो न स्यात्, जनिताङ्गापूर्वतया विनियुक्तत्वस्योभयत्राप्यविशेषः स्यादित्याह—**न तर्ही**ति। तर्हि अङ्गापूर्वजनकत्वे बर्हिष इव बर्हिर्यागस्येवेति **केचित्। परे** तु व्यतिरेके दृष्टान्तः। बर्हिस्तृणाति, बर्हिषि हविरासादयति इत्यत्र यथा विशेषवचनात् पुनरुपयोगस्तथा प्रकृते न स्यात्, तथा वचनाभावादित्यर्थ इत्याहुः। ननु बर्हिर्नापूर्वजनकत्वं किन्तु तत्कर्मकप्रोक्षणस्येति नोपकारिता विनियोगान्तरबाध इत्यत आह—**उपयोगे वे**ति। तज्जातीयान्तरम् अप्रोक्षितानपि

शेपात्। न विचित्रा ह्यभिसंस्कारा: केचिद् व्याप्रियमाणोद्देश्यसहकारिण एव कार्ये उपयुज्यन्ते। किमत्र क्रियतां, विधेर्दुर्लङ्घ्यत्वात्। यथा चाभिचारसंस्कारो यं देहमुद्दिश्य प्रयुक्तस्तदपेक्ष एव तत्सम्बद्धस्यैव दुःखमुपजनयति, नान्यस्य। न वा तदनपेक्षः। एवमभिमन्त्रणादिसंस्कारा अपि भवन्तो न मनागपि नोपयुज्यन्ते।

विचित्रा हीति। संस्कारवैचित्र्यादेवं स्यादित्यर्थः। वैचित्र्यमेव दर्शयति—**केचिदि**ति। यस्योद्देशस्याग्रे व्याप्रियमाणता व्यापारानुवृत्ति-स्तत्सहकारिण इत्यर्थः। न चैतत् सांदृष्टिकमित्याह—**यथा चे**ति। श्येनयागेन कर्तरि यददृष्टं जनितं तस्य वैरिदुःखोत्पादनमुद्देश्यमतो व्यधिकरणमपि तद्वैरिदेहावच्छिन्न एवात्मनि- दुःखं जनयतीत्यर्थः। **विधेरि**ति। 'श्येनेनाभिचरन् यजेते'त्यत्रान्यथानुपपत्तेरिव 'व्रीहीन् प्रोक्षती'त्यत्रापि लाघवाद्व्यक्तिवचनन्यायेन, प्रोक्षिता एव व्रीहयोऽवघाताय कल्पन्त इति वाक्यशेषबलेन वा प्रोक्षितस्यैवाग्रे व्याप्रियमाणत्वमित्यर्थः। **दुर्लङ्घ्यत्वम**नतिक्रमणीयत्वम्। **भवन्त** इति जायमाना इत्यर्थः। **न मनागपि नोपयुज्यन्त** इति अपि तु प्रोक्षिताम् व्रीहीन् सहकारिण

व्रीहीनुपादीयेत अवघातयागादौ विनियुज्येत, अविशेषात्। विधिविषयतावच्छेदकव्रीहित्वस्य प्रोक्षिताप्रोक्षितसाधारणत्वात् स्वजनकीभूतप्रोक्षणकर्म्मव्रीहित्वस्य नियामकत्वान्नातिप्रसङ्ग इत्यभिप्रेत्याह—**न विचित्रा** इति। **केचित्** केचिदेव अभिसंस्कारा अदृष्टरूपा विचित्रा न तु सर्वे। वैलक्षण्यमेवाह—**व्याप्रियमाणोद्देश्यसहकारिण** इति। स्वजनकीभूतव्यापारोद्देश्यसहकारिण इत्यर्थः। कार्य उपयुज्यन्ते तत्तत् कार्यञ्जनयन्ति। विधेरिति व्यक्तिवचनन्यायेनाकांक्षाबलात्त[23a]त्रैव गृहीततात्पर्यकत्वाद्विधेरित्यर्थः। दृष्टान्तेनातिप्रसङ्गमाह—**यथे**ति। प्रयुक्त उत्पादितः तदपेक्षएव तज्जातीयशरीरावच्छेदेनैव तदवच्छेदेनापि नान्यस्यात्मन इत्याह—**तत्सम्बद्धस्यैवे**ति। तदात्मन एवेत्यर्थः। नियमव्यवच्छेद्यं स्पष्टयति—**नान्यस्ये**ति। **एवमि**त्यादि। अभिमन्त्रादिसंस्कारा एवं भवन्तः नियतसहकारेणैव नियतकार्यकारितामासादयन्तः न मनागपि नोपयुज्यन्ते अल्पामप्यनुपपत्तिं नाप्नुवन्ति। तर्हि प्रोक्षणस्य व्रीहिनिष्ठसंस्काराजनकत्वे संस्कार्यकर्म्मतेत्यत्र प्रोक्षणेत्यादिक्रिया[जन्यफलशालितायास्तत्त्वादिति भावः। क्रियाजन्यफलशालित्वमात्रं न तथा पूर्वोत्तरदेशयोर्गमित्यजिकर्मतापत्तेः, किन्तु धात्वर्थतावच्छेदकफलशालित्वम्। प्रकृते जलसंयोगस्य तथात्वान्नानुपपत्तिरित्याह—**ने**ति। अतएव "शक्तून् प्रोक्षती"-त्यत्राधेयशक्त्यभावेऽपि कर्म्मतेति भावः।

कथं तर्हि व्रीह्यादीनां संस्कार्यकर्मतेति चेत्, प्रोक्षणादिफलसम्बन्धादेव। ननु यदुद्देशेन यत् क्रियते तत्तत्र किञ्चित्करम्। यथा पुत्रेष्टिपितृयज्ञौ। तथा चाभिमन्त्रणादयो व्रीह्याद्युद्देशेन प्रवृत्ता इत्यनुमानमिति चेत्। न। हविस्त्यागादिभिरनैकान्तिकत्वात्। न हि ते कालान्तरभाविफलानुगुणं किञ्चिद्धुताशनादौ जनयन्ति। किं[1] वा

5 आम्नायोपयुज्यन्त एवेत्यर्थः। ननु व्रीहीणां न निर्वर्त्यत्वं, न च विकार्यत्वं, तथाच संस्कार्यत्वमेव वाच्यम्। तदपि संस्काराानाश्रयत्वेन न स्यादिति द्वितीया न सम्भवतीत्याशङ्कते—**कथमिति**। यदि संस्कारे कर्मता व्रीहीणां तदा पुण्यनिष्ठसंस्कारेण स्वरूपसम्बन्धेनैव तन्निर्वाहः, यदि च परसमवेतक्रियाफलशालित्वं ब्रूषे तदा प्रोक्षणस्य द्रवद्रव्यक्रियाया यत् फलं संयोगः तदाश्रयत्वेनैव तत्सिद्धिरिति परिहरति—

10 **प्रोक्षणादीति**। प्रोक्षणफलं संयोगस्तद्द्वारा संस्कारो वा, उभयथापि नानुपपत्तिरिति भावः। यद्यपि जलसंयोगो न सर्वव्रीहिषु तथाप्युद्देश्यतयैव सर्वविनियोगः। अन्यथा सक्त्वाधानेऽपि न प्रतीकारः। 'व्रीहीनिति' 'कपिञ्जलानि'तिवद्बहुवचनं त्रि[त्वपरमि]ति भावः। पराभिमतमनुमानं शङ्कते—**पुत्रेष्टिरिति**।

'वैश्वानरं द्वादशकपालं चरुं निर्वपेत् पुत्रे जाते'

15 इति विधिप्राप्तेरित्यर्थः।

"यस्मिन् जाते एतामिष्टिं निर्वपति सोऽन्नादस्तेजस्वी"

इत्यार्थवादिकं फलमित्यर्थः। **पितृयज्ञः** पितृश्राद्धम्। तत्र व्यभिचारमाह—**हविरिति**। एतदेव स्फुटयति—**न हीति**। अत्रापि हुताशनादौ शक्तिराधीयत इति वादिनं प्रति व्यभिचारान्तरमाह—[1] **किञ्चेति**। यदि च ज्ञानं स्वरूपसम्बन्धेन

20 प्रमेयेऽपि वर्तत इति ब्रूषे, तदा प्रकृतेऽपि तुल्यमिति भावः। **भट्टानां** प्रमेये ज्ञानेनैव ज्ञातता जन्यते न त्विन्द्रियव्यापारेणेत्यत्रैयम्।

[illegible] सामान्यतो दूषितं पराभिमतं मानं प्रयोगारूढं कृत्वा दूषयति—**नन्विति**। यथा व्रीहिः प्रोक्षणजन्यातिशयवान् कालान्तरभाविफलानुगुण-प्रोक्षणोद्देश्यत्वात्। यत् कालान्तरभाविफलानुगुणयदुद्देश्यं तत्तज्जन्यातिशयवदिति प्रागुक्त-

25 मिदानीं प्रोक्षण व्रीहिनिष्ठातिशयजनकं कालान्तरभाविफलानुगुणव्रीह्युद्देश्यकक्रियात्वादिति शङ्कते—**नन्विति**। अभिमन्त्रणादयः प्रोक्षणादयः। ते हविस्त्यागादयः। ते [illegible] [illegible] आह—**हुताशनादाविति**। [illegible]। ननु [illegible]—**किं वेति**।

1 [illegible] reads किञ्च for किं वा.

न दृष्टमिन्द्रियलिङ्गशब्दव्यापाराः प्रमेयोद्देशेन प्रवृत्ताः प्रमानर्थेव किञ्चिज्जनयन्ति, न प्रमेये इति। कृषिनिष्पत्ति अप्यंदमेव स्यातामिति चेन्न। दृष्टेनेव पाकजरूपादिभेदे-नोपपत्तावदृष्टकल्पनायां प्रमाणाभावात्। तथा न लाक्षारसावसेको व्याख्यातः। अत एव बीजविशेषत्वाऽऽपरमाण्वन्तभङ्गेऽपि परमाणूनामवान्तरजात्यभावेऽपि प्राचीनपाकज-विशेषादेव विशिष्टाः परमाणवस्तं तं कार्यविशेषमारभन्ते। यथा हि कलमबीजं यवादेः, 5
नरबीजं वानरादेः गोक्षीरं माहिषादेर्जात्या व्यावर्तते, तथा तत्परमाणवोऽपि मूलभूताः पाकजैरेव व्यावर्तन्ते। न ह्यस्ति सम्भवो गोक्षीरं सुरभि मधुरं शीतं, तत्परमाणवश्च विपरीताः। तस्मात्तथाभूताः पाकजा एव परमाणवो यथाभूतैरेव आद्यातिशयो-

---

एवमिति। शक्तिजननेनेत्यर्थः। अदृष्टेति। यद्यपि परमाणौ पाकजगुणोऽप्यदृष्ट एव, तथापि कार्यानयत्वात्तस्य दृष्टत्वमिति भावः। लाक्षेति। बीजपूरबीजे लाक्षार- 10
सावसेकात् तत्तत्कुसुमेषु यल्लौहित्यं तदपि पाकजगुणाधीनमित्यर्थः। व्याख्यात इति पाकजगुणाधीनत्वेनैवेति शेषः। तत्त्वाधेयशक्तिं विना कलमबीजात् कलमाङ्कुर एवेति कथं नियम इत्यत आह—अतएवेति। प्राचीनत्वमावश्यकत्वम्। विशिष्टा इति। व्यावृत्ता इत्यर्थः। परमाणुपाकजसत्त्वे मानमाह—न ह्यस्तीति। शीतमिति। उपष्टम्भकजलाभिप्रायेण। आद्यातिशयो द्व्यणुकम्। अन्त्यातिशयो- 15
ऽङ्कुरादिरित्यर्थः। मध्येऽपि यदि वाकारस्तदा आद्यातिशयोऽणुद्वयसंयोगः।

इन्द्रियेत्यादि। तज्जन्यज्ञानानीत्यर्थः। तदुद्देशेन प्रवृत्तास्तत्कर्मकाः किञ्चित् संस्कारादिकं व्यवच्छेत्तुं स्पष्टमित्या व्यभिचारमुपपादयति। संस्कारस्य च विषयतया प्रमेयनिष्ठत्वे मानाभाव इति भावः। उपेक्षाज्ञानाभिप्रायेण वा। एवमदृष्टद्वारा कालान्तरभाविफलानुगुणे परिणतिर्धातुसाम्यं लाक्षारसावसेकः कालान्तरभाविरक्तपुष्पोद्गम- 20
हेतुर्बीजपूरे लाक्षारसावसेकः व्याख्यातः परमाणुनिष्ठपाकजरूपादिद्वारा तादृशकार्य्यजनक-तया। तथाच न तदर्थमाधेयशक्तिस्वीकार इति भावः। स्वगुणा इति कारिकांशं व्याचष्टे—अतएवेत्यादि। विशिष्टा विलक्षणाः जातिवदुपाधेरपि [23b] व्यावर्त्तकत्वम-विशेषादित्याह—यथेत्यादि। तत्र विलक्षणपाकजादिमत्त्वे युक्तिमाह—न ह्यस्तीति। शीतमिति। उपष्टम्भकस्पर्शमभिप्रेत्य—आद्येति। आद्यातिशयो द्व्यणुकम्, 25

अन्त्यातिशयोऽङ्कुरादिर्भवति किमत्र शक्तिकल्पनया ?। कल्पादावप्येवमेव। इदानीं 'बीजादिसन्निविष्टानामदृष्टादिभिरुपसम्पादनं, तदानीं तु विभक्तानामदृष्टादेव केवलात्तथा संसर्ग इति विशेषः। न च धान्यादीनामपि तथैव किं न स्यात् ? यतः कृष्यादिकर्मोच्छेदे तत्साध्यानां भोगानामुच्छेदप्रसङ्गात्। अव्यवस्थाभयाच्चादृष्टानि कर्माणि

अन्त्यातिशयोऽन्त्यावयवस्यारम्भकः संयोगः। अङ्कुरादिरन्त्यावयवीत्यर्थः। क्वचित् ब्राह्मणादौ पाकजतोऽन्येऽपि ; अदृष्टमेव नियामकमनुसन्धेयम्। सर्वसर्गे [?] तेजःसंयोगजनिता रूपादय एव कल्पादावपि कार्यभेदनियामका इत्याह— **कल्पादावपी**ति। '**बीजसन्निविष्टानामि**ति। परमाणूनामित्यनुषङ्गः। **उपसम्पादनं** सहकारिसमवधानम्। **तथैवे**ति। अदृष्टमात्रादेवेत्यर्थः। **कृष्यादी**ति। कृषिफलभोगार्थं कृषिप्रवृत्तिरित्यर्थः। अदृष्टमात्रं साध्याङ्कुराद्यपेक्षया विजातीयमेदानीन्तनाङ्कुरादि। ननु केवलकृषिधर्मसम्पादनीयमिति भावः। **अव्यवस्थे**ति। कृषिकर्मनिरपेक्षे तृणादाविव धान्यादावपि स्वत्वनियमो न स्यादिति तद्व्यवस्थार्थं कृष्याद्यपेक्षेत्यर्थः। ननु व्यवस्थाभयेऽपि कारणेन कार्यजनने किं बाधकमित्यत आह—**अदृष्टानी**ति। तथाच इदानीन्तनबीजे कृष्यादिकमपि कारणमिति भावः। तत्कालीनबीजे च कालविशेषः कारणं बोध्यम्। उपसंहरति—

अन्त्यातिशयोऽङ्कुरादिर्भवतीति च समानाधिकरणम्। अन्त्यातिशय इत्यनन्तरं क्वचित्पाठः [illegible]। तत्रान्त्योऽतिशयोऽन्त्यावयवी अंकुरादिः यस्मादिति व्युत्पत्त्या तदवयव आद्यानि- [illegible] अंकुर[illegible] [इ ?]त्याहुः। एवमेव [illegible] कार्यवैलक्षण्यम्, अदृष्टादेवेत्युपलक्षणं, भगवत्प्रयत्नादित्यपि बोध्यम्। [illegible] हेतुरित्यत इति। तथा भोक्त्रदृष्टादेव सहकारिसमवधानं, तथा च कृष्यादिषु न प्रवर्तेतेति भावः। **यत** इति। [illegible] कालविशेषे वा [illegible] इति भावः। **अव्यवस्थे**ति। तथा च सत्यपि [illegible] न स्यादिति [illegible] भावः। कृष्यादेः कारणत्वाव्यवस्था [illegible] कृष्यन्वयाद्ये तत्र कालविशेषोऽन्यत्र कृष्यादिरिति [illegible] इति **प्रकाशः**। अदृष्टानि कृष्यादिकारणानि अङ्कुरोत्पत्तानि [illegible]

1 [illegible]

दृष्टकर्मण्यवस्थयैव भोगसाधनानीत्युन्नीयते। तस्मात्, पाकजविशेषैः संस्थानविशेषैश्च विशिष्टाः परमाणवः कार्यविशेषमारभन्ते। ते च तेजोऽनिलतोयसंसर्गविशेषैः, ते च क्रियया, सा च नोदनाभिघातगुरुत्ववेगद्रवत्वादृष्टवदात्मसंयोगेभ्यो यथायथमिति न किञ्चिदनुपपन्नम्।

निमित्तभेदाश्च पाके भवन्ति। तद् यथा—हारीतमांसं हरिद्राजलावसिक्तं हरिद्राग्निप्लुष्टमुपयोगात्क्षणो व्यापादयति। दशरात्रोषितं कांस्ये घृतञ्चापि विषायते। 5

तस्मादिति। कारिकास्थादिपदग्राह्यं स्फुटयति—**संस्थानेति**। संस्थानं संयोगमात्रं तुल्यपाकजानां संस्थानविशेषो नियामकः, चकारो वाकारार्थः। **ते चेति**। पाकजा इत्यर्थः। तथाच तदनुत्पत्तिरपि न शक्तिमपेक्षत इत्यर्थः। **ते चेति**। संसर्गविशेषा इत्यर्थः। तर्हि क्रियार्थमेवाधेयशक्तिः स्यादत आह—**सा चेति**। 10 वेगपदं स्थितिस्थापकमप्युपलक्षयति ॥११॥

यद्यपि परमाणूनां साक्षादीश्वराधिष्ठेयतया प्रयत्नवदात्मसंयोगोऽप्युपग्रहीतुमर्हः, तथाप्यदृष्टापेक्षा तत्रावश्यकीति अदृष्टवदात्मसंयोग एवोक्तः। ननु हारीतमांसादौ हरिद्रानलसान्निध्येऽवश्यं शक्तिराधेया कथमन्यथा तद्भुञ्जानो विपद्यते? पाकजरसाद्युत्पत्तिस्तत्रानलान्तरसान्निध्येऽपीत्यत आह—**निमित्तेति**। पाकजमात्रं न 15 तन्त्रं किन्तु निमित्तविशेषाधीनपाकजत्वमित्यर्थः। निमित्तविशेषानेवोदाहरति—**तद् यथेति**। अग्नेः पाकजत्वमभिधाय उष्मादेः पाकजत्वमाह—**दशरात्रेति**।

कृष्यादिकं जनयित्वैव भोगसाधनानि अङ्कुरादिकारीणि। उपसंहरति—**तस्मादिति**। पाकपदग्राह्यैकदेशमाह—**संस्थानेति**। ते पाकजविशेषाः अदृष्टवदात्मसंयोगाः, प्रयत्नवदात्मसंयोगस्याप्युपलक्षणम्। ननु पाकजविशेषात् कलमादिवैलक्षण्यम् अभिहितं, 20 तच्च न सम्भवति, तेजःसंयोगावैलक्षण्येऽपि तद्वैलक्षण्यात्। तथा च तदर्थमेव शक्तिः स्वीक्रियतामित्यत्रासमवायिकारणतेजःसंयोगावैलक्षण्येऽपि अदृष्टरूपनिमित्तवैलक्षण्यादेव तद्वैलक्षण्यमित्याभिप्रायिकसमाधानं दृष्टान्तेनोपपादयति। वस्तुतः संयोगवैलक्षण्येऽप्यवश्यं मूलमदृष्टवैलक्षण्यमिति हृदयम् ॥११॥

निमित्तभेदा इति। पाके पाकगततद्वैलक्षण्ये निमित्तभेदा निमित्तकारण- 25 वैलक्षण्यानि प्रयोजका भवन्ति। निमित्तञ्च दृष्टमदृष्टं वेति न विशेषः। यद्वा ते पाकेन कार्यविशेषे जननीये सहकारिणो भवन्तीत्यर्थः। अथवैतद्दृष्टान्तप्रदर्शनेनात्रैव कार्यविशेष-नियामकतया ये शक्तिमङ्गीकुर्वन्ति तेऽपि निराकृता इति ध्येयम्। प्लुष्टं दग्धम्। उक्तस्थले ऊक्षणवैलक्षण्याधीनम् अग्निवैलक्षण्यात्तत्संयोगवैलक्षण्यमाशङ्क्य स्थलान्तरमाह—**दशेति**। अत्र कांस्यकालौ निमित्ते, तद्वैलक्षण्याद्वैलक्षण्यम्। अत्र पाके तु वैलक्षण्यस्य 30

ताम्रपात्रे पर्युषितं तोयमपि विक्रियते, इत्यादि। यत्र तर्हि तोये तेजसि वायौ वा न पाकजो विशेषस्तत्र कथमशुच्यशुचिसम्बन्धादयो विशेषाः? कथं वा पार्थिवे प्रतिमादौ प्रतिष्ठादिना संस्कारेऽपि विशेषाभावादपूजादिना धर्मो, व्यतिक्रमे त्वधर्मो- ऽतिशयितो न तु न किञ्चित्? न च तत्र यजमानधर्मेणान्यस्य साहाय्यकमाचरणीयम्, अन्यधर्मस्यान्यं प्रत्यनुपयोगात्; उपयोगे वा साधारण्यप्रसङ्गात्? अत्रोच्यते—

आदिपदात् ... परिग्रहः। एतेन पाकजरसादेः प्रत्यक्षसिद्धत्वं नैयायिकानां ... नन्वि ... किञ्चिद् ... स्पर्शे किञ्चि- ल्लक्षणम्, वायावपि स्पर्शोद्भवः ... तथा तोयत्वाविशेषेऽपि किञ्चिद् द्रवं तत्त्वा[दि ?]नादौ, ... कठिना इति ... गृह्यते—यत्र तर्हीति। यत्र च पार्थिवे पाकजविशेषो नास्ति, तथाप्यत्र ... इत्यत आह—पार्थिवेऽपीत्यादि। पूजादिरित्यादिपदात् ... संग्रहः। यजमानः प्रतिष्ठाकर्ता। साधारण्येति। अदृष्टस्य साधारण्यप्रसङ्गादित्यर्थः।

ननु [24a] ... —ताम्रेति। ... ताम्रेति। ... [illegible]

... [illegible] ... कथं वेति। ... [illegible]

... [illegible] ... उपयोगे वेति। साधारण्येति। ... [illegible]

1. [illegible]

निमित्तभेदसंसर्गादुद्भवानुद्भवादयः ।
देवताः सन्निधानेन प्रत्यभिज्ञानतोऽपि वा ॥१२॥

उपनायकादृष्टविशेषसहाया हि परमाणवो द्रव्यविशेषमारभन्ते, तेषां विशेषादुद्भव-विशेषाः प्रादुर्भवन्ति । तथा स्वभावद्रवा अप्यापो निमित्तभेदप्रतिबद्धद्रवत्वाः कठिनं करकाद्यमारभन्ते. इत्यादि स्वयमूहनीयम् । प्रतिमादयस्तु तेन तेन विधिना सन्निधापितरुद्रोपेन्द्रमहेन्द्राद्यभिमानिदेवताभेदात्तत्र तत्राऽऽराधनीयतामासादयन्ति,

उद्भवश्चान[नु ?]ल्बणत्वम्[2] । मृगमदे गन्धस्योपलब्धत्वं कुङ्कुमे वाव संसर्गाधीनं[?] न त्वतिशयनिमित्तकं, चन्द्र-चामीकरादौ वौष्ण्यानुपलब्धत्वं जलपार्थिव संसर्गाधीनम् ः आदिपदाद् द्रवत्वकठिनत्वादीनां करकातुहिनगतानां संग्रहः । तत्रापि[निमित्तभेदोऽदृष्टसमवधानमेवेत्यर्थः ।
प्रतिमा देवता भवति पूजनीयतामासादयतीत्यर्थः ।
तेन तेनेति । यद्देवताप्रतिमाप्रतिष्ठां प्रति श्रुतौ यो विधिः प्रकार उक्तस्तेनेत्यर्थः । सन्निधानमाहार्यारोप इति विभावनार्थमुक्तम्—**अभिमानी**ति ।

निमित्तेति । अनुद्भूतरूपाद्यारब्धतोयादिरूपादिषु यदुद्भवत्वादि तन्निमित्तभेदादेव निमित्तकारणवैलक्षण्यादेव, तच्च दृष्टमदृष्टं वेति न विशेषः । अतएव [तप्ततैलान्तःपात्य-नुद्भूतरूपादेव तेजसो जलादिसंयोगसहकारेण उद्भूतरूपस्य तेजस आरम्भ इति भावः । **परे** तु नियतारम्भवादमभ्युपगच्छन्तस्तदन्तःपात्युद्भूतरूपपरमाणूनामेव तदारम्भकत्वमाहुः । एतच्च उद्भूतत्वानुद्भूतत्वयोर्द्वयोरेव जातित्वनये । यदि चानुद्भूतत्वमेव जातिस्तदा तदभाव एवोद्भूतत्वं, तदानुद्भूतरूपनिमित्ताभावादेव तदभाव इति ध्येयम् । **देवता** इति । प्रतिमायाः पूज्यताप्रयोजिका इति शेषः । तच्च सन्निधानादि अस्पृश्यस्पर्श-नान्नश्यति इति हृदयम् । तत्र पूज्यतामासादयन्तीति शेषः इति तु **प्रकाश**कृतः ।

उपनायकादृष्टं द्व्यणुकारम्भकसंयोगानुकूलक्रियानिमित्तादृष्टं तत्सहायाः तत्सहकृताः द्रव्यविशेषमुद्भूतानुद्भूतगुणवद्द्व्यणुकं, जात्यैकत्वा[24b]देकवचनं, त्रिभिः परमाणुभिर्द्रव्या-नारम्भात् तदभ्युपगमेनेदमिति तु **केचित्** । तेषामुपनायकादृष्टानां विशेषात् वैलक्षण्यात् उद्भवानुद्भवविशेषाः उद्भूतत्वेनानुद्भूतत्वेन वा विलक्षणा द्व्यणुकरूपादयः प्रादुर्भवन्ति जायन्ते । आदिपदग्राह्यं व्याकरोति—**तथे**ति । स्वभावद्रवाः[1] सांसिद्धिकद्रवाः निमित्तभेदो विलक्षणादृष्टं प्रतिबन्धद्रवत्वा द्रवत्वोत्पत्तिप्रतिबन्धकोपहितद्रवत्वाः प्रतिमादयः

1 गुणानन्द reads प्रतिबन्ध for प्रतिबद्ध- ।

2 अनुल्बणत्वम्='प्रच्छिन्नः' (अतिस्फुटता), Cakravartin on *Kāvyaprakāśa*, Chap. VIII (cf. उल्बण).

दष्टमूर्च्छितं राजशरीरमिव विषापनयनविधिनाऽऽपादितचैतन्यम्। सन्निधानञ्च तत्र तेषामहङ्कार-ममकारौ. चित्रादाविव स्वसादृश्यदर्शिनो राज्ञ इति नो दर्शनम्। अन्येषां तु पूर्वपूर्वपूजितप्रत्यभिज्ञानविषयस्य प्रतिष्ठितप्रत्यभिज्ञानविषयस्य च तथात्वमवसेयम्। एतेनाभिमन्त्रितपयःपङ्कादयो व्याख्याताः।

सन्निधानमिति। अहमेवैतत् ममैवेदं शरीरमित्याहार्यज्ञानं देवतानां जन्यते, प्रतिष्ठा-विधिना तत्रास्थिरमपि संस्कारद्वारा उपकारीत्यर्थः। उपनायकमदृष्टं परमाणुक्रियो-त्पादकम्। **नो दर्शनमिति**। न्यायसिद्धान्त इत्यर्थः। **अन्येषामिति**। देवताचैतन्ये विप्रतिपन्नानामित्यर्थः। आद्यपूजां प्रति भ[जड़?]त्वत्यभिज्ञानं नास्तीत्य-नुशयेनाह—**प्रतिष्ठिते**ति। "प्रतिष्ठितं पूजयेदि"ति विधेश्च तज्ज्ञानमावश्यकम्। चण्डालादिस्पर्शे तु प्रतिष्ठितप्रत्यभिज्ञानस्य पूजितत्वप्रत्यभिज्ञानस्य संस्कार एव नाश्यते। **प्रतिष्ठित**पदं प्रतिष्ठाध्वंसपरं वा। स चास्पृश्यस्पर्शनादिसंसर्गाभावसंस्कृतः पूजकानां धर्महेतुः। **एतेने**ति। तत्रापि मन्त्राधिष्ठातृदेवतासन्निधिरेव क्रियते इत्यर्थः। आदिपदान्मन्त्रादिप्रयोगान्मृदादीनां विषरूपतादिसंग्रहः। कांस्यादीनां मार्जनादिना शक्त्याधानमित्यपि नास्ति तत्र मलाद्यपनयनस्य शक्तिपदार्थत्वात्।

शिवलिङ्गानि वा तत्र शास्त्रे उक्तेन तेन [तेन?] विधिनेति योजना। अहंम[मे?]त्यभिमाने आगन्तुकहेतोः प्रयोजकतां दृष्टान्तेनाह—**दष्टे**त्यादि। भुजगादिना दष्टः, अनन्तरं मूर्च्छितो यो राजा तस्य यच्छरीरं यथागन्तुकेन विषापनयनविधिना आपादितचैतन्यं विनाशित-मूर्च्छं सचिवैराराधनामासादयतीति विभक्तिविपरिणामेनानुषञ्जनीयम्। वृषभादिवाहनवतो रुद्रादेस्तत्र सन्निधाने कुण्डमण्डपादिभङ्गप्रसङ्गादाह—**सन्निधानञ्चे**ति। तेषां देवता-भेदानां तत्र प्रतिमादिलिङ्गादिषु प्रतिमायामहङ्कारः लिङ्गे च ममकारः "स्वसादृश्ये"त्यत्राहङ्कारे स्वस्य ममकारे स्वीयस्य च नः **नैयायिकानां** दर्शनं तदनुयायी सिद्धान्तः। एवञ्च भगवतोऽपि आहार्यसंशयवदाहार्याभिमानमभ्युपेत्य अभिमानस्याशुविनाशित्वेऽपि तदाहितसंस्कारस्यान्वय तथात्वमवसेयम्। अन्येषान्देवताचैतन्ये विप्रतिपन्नानामिति **केचित्**। तन्न। कर्मकर्तृभूतेन्द्रादेर्देवतात्वाभावेऽपि अभिमानस्यैव तत्र प्रयोजकत्वे बाधकाभावात्। तस्मादन्येषां भगवति जन्यज्ञानमनभ्युपगच्छतामि**त्यपरे**। पूजितत्वप्रत्यभि-ज्ञानस्य प्रथमपूजायामसम्भवादाह—**प्रतिष्ठिते**ति। तथात्वं सकलपूजाप्रयोजकत्वं "प्रतिष्ठितं पूजयेदि"ति विधिवत्त्वात् प्रतिष्ठितत्वज्ञानस्य तथाविधपूजाङ्गत्वादिति भावः। स्वस्मिन्नसद्भूतत्वेऽपि नाहङ्कारस्य तत्त्वात्, पूज्यतावच्छिन्नत्वापि तत्प्रतिष्ठाकालीन-तत्संस्कारस्य प्रतिबोधकाभावस्यापि तत्प्रतिष्ठितत्वप्रयुक्तपूजायां तथात्वमवसेयमिति **मणिकृतः**। **एतेने**ति। तथापि तत्तन्मन्त्राधिष्ठातृदेवतासन्निधानस्याभिमन्त्रित-जलनिधानस्य वा दर्शनादिभेदेन पापोपशमनादिहेतुत्वमित्यर्थः।

घटादिषु का वार्ता ?। कुशलैवेति चेन्न। न हि सामग्री दृष्टं विघटयति, नाप्यदृष्टं, ज्ञापकत्वात्। नाप्यदृष्टमुत्पादयति, धर्मजनने सर्वदा विजयप्रसङ्गात्। विपर्यये सर्वदा भङ्गप्रसङ्गात्। अत्रोच्यते—

जयेतरनिमित्तस्य वृत्तिलाभाय केवलम्।
परीक्ष्यसमवेतस्य परीक्षाविषयो मताः ॥१३॥ 5

यद्यपि धर्माद्यभिमानिदेवतासन्निधिरत्रापि क्रियते, ताश्च कर्मविभवानुरूपं लिङ्गम्

घटादिष्विति। **घटस्तुला**, आदिपदात्तप्तमाषकादिसंग्रहः। तत्राधिवासनविधिना हवनमलक[?]वद्दाहादिप्रयोजिका शक्तिरवश्यमङ्गीकर्तव्येति संक्षेपप्रश्नभावः। **सामग्री** परीक्षासामग्री, दृष्टस्य प्रतिमानप्रस्तरादेर्विद्यमानत्वात्। अदृष्टविघटने सर्वदैव हवनमलक[?]वद्दाहादिप्रसङ्गात्, ज्ञापकत्वात्; न तु दृष्टादृष्टविघटकत्वमिति 10
भावः। **विपर्यय** इति। अधर्मजनन इत्यर्थः ॥१२॥

जयस्तदितरः पराजयः, तन्निमित्तस्य सुकृतस्य दुष्कृतस्य वा **वृत्ति**स्तत्कार्यजननं प्रति सहकारिलाभः। **परीक्ष्यः** परीक्षणीयः पुरुषः।

धर्मादीति। तुलायां धर्मस्तम[प्त ?]माषकादौ वह्निराहवनीया देवता। तद्व्यापारमाह—**ताश्चे**ति। [1]**कर्मविभावनानुरूपं** पापाचरणानाचरणोचितं, 15
लिङ्गमिति

घटादिषु तुलादिपरीक्षासु का वार्त्ता ? तत्र जयभङ्गादिव्यवस्थापकत्वेन शक्तिसिद्धेः को निरा[25a]करणप्रकारः ? उत्तरं—**कुशले**ति। परपक्षनिराकरणे दक्षेत्यर्थः। अथवा कुशला क्षेमकारिका। परपक्षनिराकरणमेव क्षेमम्। प्रकारमविद्वान् शङ्कते—**ने**ति। सामग्री परीक्षासामग्री दृष्टं सामान्यहेतुं तदनुपलब्धेरिति 20
हेतुरवसेयः, नाप्यदृष्टं साम्यहेतुमदृष्टं विघटयति। **ज्ञापकत्वादि**ति। तुलासामग्र्या नमनोन्नमनद्वारा परीक्ष्यनिष्ठपापतदभावज्ञापकत्वात् साम्यहेत्वदृष्टनाशे च निष्पापमपि नमयेत् पापिनमप्युन्नमयेत्, तथा च तन्नियामकतया शक्तिरवश्यमुपेयेति भावः। अदृष्टं परीक्ष्यसमवेतं, विपर्ययेऽधर्मजनने ॥१२॥

जयेति। परीक्ष्यसमवेतस्यादृष्टस्य वृत्तिलाभो वक्ष्यमाणसहकारिसमवधानम्, इतरो 25
भङ्गः।

धर्मादीत्यादिपदात् तत्र तत्र विहितावाहनपूजादीनां परिग्रहः। अभिशापविषय-

1 शङ्कर-मिश्र reads-विभावना for विभव.

अभिव्यञ्जयन्तीत्यस्माकं सिद्धान्तः, तथापि परविप्रतिपत्तेरन्यथोच्यते। तेनापि हि विधिना तदेव जयस्य पराजयस्य वा निमित्तमभिव्यक्तं कार्यमुन्मीलयति। कर्मणश्चाऽभिव्यक्तिः सहकारिलाभ एव। तत्र सहकारि, 'सोऽहमनेन विधिना तुलामधिरूढो योऽहं पापकारी, निष्पापो वे'ति प्रत्यभिज्ञानम्। यदाहुः—'तांस्तु देवाः प्रपश्यन्ति स्वस्यैवान्तरपूरुषः'। अथवा—प्रतिज्ञाऽनुरूपां विशुद्धिमपेक्ष्य तेन धर्मो जन्यते। निमित्ततो

नयनमन[?]दाहादिस्वरूपमित्यर्थः। **परो मीमांसका**दिर्देवताचैतन्ये विप्रतिपन्नः। निमित्तमदृष्टम् अभिव्यक्तं सहकारिसमवहितं कृतं कार्यं तु [न?]मनोन्नमनदाहादिरूपम् **उन्मीलयति** प्रकटयति। **कर्मणो**ऽदृष्टस्य। पापकारीति यदि प्रत्यभिजानाति तदा पराजयम्, यदि निष्पाप इति तदा जयं लभते। प्रत्यभिज्ञा च प्रमारूपा विवक्षिता। तदेवाह—**तांस्त्वि**ति। स्वयं जानात्येव यन्मया पापं कृतं न वेत्यर्थः। सभाक्षोभादिना तादृशज्ञानाभावे गत्यन्तरमाह—**मया नेदं पापं कृतमिति प्रतिज्ञा** यत्र तुलादौ प्रवर्तते सेयं यदि शुद्धा भवति तदा जयी नो चेद् भङ्गी। आरोहणादिर्व्यस्ततया व्यापार आवश्यकः। 'तदग्ने जयमाविशे'दिति वचनाज् जयादेस्तदन्तनिर्देश्यत्वादित्याह—**धर्म** इति। ननु तुलारोहणादिविधेर्धर्महेतुत्वम्, निषेधाश्रवणादधर्महेतुत्वं कथं स्यादित्यत आह—**निमित्त[त?]** इति। अभिशाप-

---

कर्मानयं नन्दूत्यो वेति ज्ञानं क्रियते। तेनापि हि विधिना परीक्षाविधिना ताः देवताः कर्मभावानुरूपमभिशापविषयीभूतकर्मसत्त्वासत्त्वानुरूपं लिङ्गं नमनोन्नमनादि अभिव्यञ्जयन्ति जनयन्ति। परविप्रतिपत्तेः परेषां देवताचैतन्ये विप्रतिपत्तेः। अन्यथोच्यते प्रकारान्तरेण समाधीयते। तद्विभावकं जयपराजयव्यञ्जकं कार्यमुन्नमनावनमनादि उन्मीलयति। कर्मणोऽभिव्यक्तिः नमनाद्युत्पत्तिः सहकारिलाभ एव, तल्लाभे सत्येव प्रत्यभिज्ञानं यथार्थं तेन पापविस्मरणादिना निष्पापप्रत्यभिज्ञाने न जयः, न वा पापकारित्वभ्रमे भङ्ग इति। अत एव प्रपश्यन्तीत्यत्र प्रशब्देन प्रामाण्यात्मकः प्रकर्ष उक्तः। तादृशज्ञानं न परीक्षाविधिं विनेति तत्सार्थक्यमपि यत्र क्षोभादिना न तादृशं ज्ञानं तत्र का गतिरित्याह—**अथवे**ति। प्रतिज्ञानुरूपां प्रतिज्ञाविषयां विशुद्धिप्रामाण्यं तेन परीक्षाविधिना। परीक्षाविधेर्धर्मजनकत्वे मानमाह—**निमित्तत** इति। अभिशापरूपनिमित्तवत्कर्तृकत्वेन विहितत्वादित्यर्थः। प्रायश्चित्तादिवत् पापापनोदनफलेन

क्रियानाशित्वप्रसङ्गश्च । अविशुद्धिरनापेक्ष्यागमः । पराजयलक्षणानपेक्षितफलोपदर्शनेन फलतो निषेधात् । अथ शक्तिनिषेधे किं प्रमाणम् ? । न किञ्चित् । तत् किमस्त्येव ? बाढम् । न हि नो दर्शने शक्तिपदार्थ एव नास्ति । कोऽसौ तर्हि ? कारणत्वम् ।

निमित्ततावच्छेदकधर्मावच्छिन्न प्रयोगं विधिनिषेधक पक्षविशेषानः[मि: ?] सत्यप्रतिम-न्तुल्यमार्गेऽत्यन्तप्रतिपन्नत्वं नास्तीति । 5

ननु शक्तौ साधकं मानं न्यरूपितं बाधकं च मानं नोपदर्शितमिति तत्र सन्देह एव ; न तु तदभावनिश्चितिरित्याशयेन पृच्छति—**अथेति** । उत्तरं **नेति** । शक्तिपदार्थो नास्माभिर्निषिध्यत इत्यर्थः । तर्हि सिद्धं नः समीहितमित्याह—**तत् किमिति** । गूढाभिसन्धिराह—**बाढमिति** । एवमभ्युपगमे तवापसिद्धान्त इत्याह—**कोऽसाविति** । अभिसन्धिमुद्घाटयति—**कारणत्वमिति** । ननु 10

निषेधस्य पर्यवसाने मानाभावमाशङ्क्याह—**विजयफलेति** । तथा च फलस्य फलान्तरसमाविष्टता न हारं विना सम्भव इति भावः । अनपेक्षितं छिद्रं यत् न्यूने तद्विधाने यदिष्यते तन्निषिध्यते इति न्यायेनानुमाणविधिनिषेधस्थलेऽपि तत् फलत इति आलङ्कार्थः ।

ननु शक्तिनिषेधः प्रामाणिको न वा ? आद्ये, विधौ पर्यवसानं 15 वैयर्थ्यान्तरमापन्नम्; द्वितीयेऽपि प्रमाणाभावो निरूप्यत इति न्यायेन तत्सिद्धिः[25b]एव इत्यभिप्रायेण पृच्छति—**अथेति** । यदि दाहानुकूलातीन्द्रियवह्निसमवेतधर्मस्य प्रोक्षण-जन्यापूर्वादानुकूलातीन्द्रियसमवेतातीन्द्रियधर्मस्य वा निषेधे किं मानमिति प्रश्नः, तदानुत्तरमेव स्यात् । अत एवोक्तं स्वयमेव परिभाषया अप्रामाणिकेऽर्थे मूकत्ववदूकयोः समता भेद इति । यदि च शक्तिपदस्य वाचकतासम्बन्धेन शक्तिमत्पदपरत्वे षष्ठी वा 20 शक्तिपदार्थस्य निषेधे किं मानमिति प्रश्नः, तत्रोत्तरं—**न किञ्चिदिति** । तत्र तत्-प्रतियोगिन एव प्रामाणिकत्वादिति भावः । तत्पदस्य यदर्थवत्त्वं यदर्थस्य वा तत्पदवत्त्वं तत्पदार्थं यद्वत्त्वं वा सैवास्मदभिमता शक्तिरित्यभिप्रायेणाह—**तत् किमिति** । गूढाभिसन्धिराह—**बाढमिति** । आशयमुद्घाटयितुं शङ्कते—**कोऽसाविति** । उत्तरं—**कारणत्वमिति** । शक्तित्वे नास्मदभिमतातिरिक्तकारणत्वमेव दुर्वच- 25

किं तत् ? पूर्वकालनियतजातीयत्वम्,

शक्तेः किमन्यत् कारणत्वमित्याह—किं तदिति। तदभिमतात् शक्तिपदार्थाद्
भिनत्ति—पूर्वेति। अनन्यथासिद्धनियतपूर्ववर्तिजातीयत्वमित्यर्थः। पूर्वत्वञ्च
प्रागभावावच्छिन्नकालत्वं, प्रागभावत्वं प्रतियोगिध्वंससमानकालीनाभावत्वं गन्धाना-
5 धारकालानाधाराभावत्वम्। एवं दुःखद्वेषादिकमपि प्रक्षिप्य निर्वाच्यम्। गन्धाना-
धारकाल एव सर्वमुक्तिकालः। तत्र च गन्धत्वं स्वाधिकरणानधिकरणवृत्ति,
कार्यमात्रवृत्तिजातित्वात्, घटत्ववदित्यनुमानस्य सत्त्वात्। यद्वा प्रतियोग्यवधिक-
परत्वाश्रयावदाश्रयसमानकालीनकादाचित्काभावत्वम्। तेन गुणकर्मप्रागभावादिसंग्रहः।
तत्रापि परत्वोत्पत्तौ तयोरवधित्वात्। न च परत्वावधेरप्यव[पर ?]त्वाश्रयत्व-
10 नियमः, प्रमाणाभावात्। बहुतरतपनपरिस्पन्दान्तरितबुद्धे[ः] परत्वाश्रये तत्रापि
भावात्, परत्वावधेरपर[त्वा]श्रयत्वनियमाभिधानस्य उत्सर्गरूपत्वात्। तथाच
प्रलयकालीनकर्मप्रागभावस्यापि संग्रहः। यदि च प्रतियोग्यन्यूनावधिककालीना-
वधिकत्वं परत्वे विवक्ष्येत तदा अन्त्यशब्दप्रागभावे अन्ततः शब्दबुद्ध्यादिप्रागभावा-
संग्रह एव। न हि तदन्यूनानतिरिक्तकालीनं मूर्तं भवति। यदि च परत्वावधे-
15 रपरत्वाश्रयत्वनियमस्तदा प्रतियोग्युत्पत्तिसमकालोत्पत्तिकाबाधकपरत्वाश्रयसमान-

नित्यभिप्रेत्य पृच्छति—किन्तदिति। पूर्वकालेति। कार्यतावच्छेदकत्वेनाभिमत-
तद्व्यक्तिप्राक्कालनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वमित्यर्थः। तत्तद्व्यक्ति-
निरूपितान्वयव्यतिरेकाणाञ्च संसर्गतया प्रवेशात् सामान्यतस्तदप्रसिद्ध्यापि न क्षतिः।
ननु दण्डकारणस्य नियतदैशिकसम्बन्धेन प्रत्यासन्नस्यैव हेतुता तत्र तेन सम्बन्धेना-
20 प्रत्यासन्नादपि कार्यवारणाय कालिकव्याप्तौ तेन सम्बन्धेन देशभेदोऽप्यवच्छेदकतया
निवेशनीयः। अतएव रासभजातीयस्य देशान्तरे तद्विजातीयाव्यवहितप्राक्कालवृत्तित्व-
नियमेऽपि नातिप्रसङ्गः। परे तु कारणताशरीरे तेन तेन सम्बन्धेन दैशिकव्याप्तिमपि
व्याप्तत्वेन निवेशयन्ति। तन्मते एकस्य दण्डव्यक्तेर्देशान्तरेऽव्यवहितप्राक्कालवृत्तित्व-
सत्त्वेऽपि तत्काले तत्रातद्देशवृत्तिना तत्र कार्योत्पाद एकव्यक्तेः कारणतानवच्छे-
25 दकप्रत्यासत्तिविरहेण दण्ड एव स्वभावात् कार्योत्पाद इति कल्पनयैव निवारणीयः।
अत्र घटाव्यवहितप्राक्कालवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकदण्डत्वादिकमेव विशिष्य

कालीनत्वं वक्तव्यम्। उत्पत्तिश्चाध्यस्तत्क्षणस्य क्षणसम्बन्धा इति नान्योन्याश्रयः। प्रलयकर्मप्रागभावश्च ब्रह्माण्डान्तरमूर्तोपत्तनिरूपण एवेति नाव्याप्ति[ः]। अवर्जनीय-सिद्धत्वं चान्यथासिद्धत्वम्। ननु कारणेतरत्वेन सिद्धत्वं येनात्माश्रयादिः स्यात्। तच्च दण्डरूपादेर्दण्डत्वाकाशादे रूपप्रागभावस्य प्रागभावस्थलेन साधकं प्रति व्यापार-भिन्नं जनयतश्च कुम्भकारपित्रादेः सिद्धमेव। प्रागभावादिनिर्वचनापेक्षलक्षणमिदं 5.

कारणत्वं, न च दण्डत्वस्य तथात्वनियमेऽव्यावर्तकतया विशेषणवैयर्थ्यमिति वाच्यं; कारणताव्यवहारप्रयोजकीभूतज्ञाने विषयतया तस्य व्यावर्तकत्वात् शुद्धज्ञानात्तदव्यवहारात्। इत्थञ्च तेन तेन रूपेणान्यथासिद्धत्वनिर्वचनमपि तद्रूपस्य कारणतानात्मकत्वबोधनार्थैवेति। यत्तु तथा सति घटाव्यवहितप्राक्कालवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकवत् वेमेति ज्ञाने प्रवृत्तिः स्यात् तस्य कारणतानात्मकत्वात् इष्टसाधनताधियश्च प्रवर्तकत्वात्। न च तत्र 10 तादृशदण्डत्वस्यैव तत्रारोप इति वाच्यं, तदनवच्छेदकत्वस्य वेमत्व एव ग्रहात् दण्डत्वादेः [26a]प्रागग्रहाच्च। न च तादृशप्रतियोगितानवच्छेदकत्वेनैव तदपि गृहीतमिति वाच्यं, तादृशप्रतियोगितानवच्छेदकवेमत्वादिवदिति ज्ञानादप्रवृत्त्यापत्तेरिति तन्न, यद्धर्मावच्छेदेन कारणताघटकतावत्पदार्थानां विलक्षणविषयताशालिज्ञानं तेन रूपेणैव तत्र तत्र प्रवृत्तिः, यथा तथाविधज्ञानविशेषादनुमितिः। अतएव वस्तुतो यन्नित्यं तदर्थितयापि भ्रमात् 15 प्रवृत्तिरानुभविकी। न च तत्र तथाविधविशिष्टं प्रसिद्धमिति प्रागभावत्वञ्चानुयोगिताविशेषो भावाभावसाधारणमत्र निवेशनीयं गन्धानाधारसमयावृत्तित्वं वा तेन ध्वंसनिरूपित-कारणतानिरुक्तौ तदव्यवहितप्राक्कालत्वस्याव्यवधानविशिष्टतत्प्रागभावरूपविशिष्टत्वस्य जनकत्वादिगर्भतया आत्माश्रयादिति निरस्तम्। न च यागादेः स्वर्गाव्यवहितप्राक्काला-सत्त्वादव्याप्तिरव्यवधानाप्रवेशे च प्रकृते दुर्वचं व्यापकत्वमिति वाच्यं, स्वस्वजन्यान्यतरस्य 20 तदव्यवहितप्राक्कालनियमस्यैव तत्कारणतात्वात् कालिकत्वव्यापारान्यतरसम्बन्धेन वा नियमस्य वाच्यत्वात्। अत्र **प्राञ्चो**ऽन्यथासिद्धिपञ्चकं परिभावयन्ति। तथाहि—येन सहैव यस्य यं प्रति पूर्ववर्तित्वज्ञानं तेन कार्यसम्भवे तेन रूपेण तत् तथा, यथा घटं प्रति दण्डरूपत्वेन तद्रूपं दण्डेन कारणतावच्छेदकतयाऽनुप्रवेशनीयेन कार्यस्य घटस्य सम्भवे तेन दण्डेन तद्रूपं तथा। एवं प्रत्यासत्तिघटकतया यदनुप्रवेशनीयं तेन कार्य- 25 सम्भवे अन्यस्य तथात्वं यथा दण्डेन दण्डत्वं रूपत्वेन तद्रूपं वा। न च दण्डरूपत्वेन तथात्वेऽपि प्रत्यासत्तिघटकीभूतदण्डेनैव तथेति वाच्यं, तस्य प्रत्यासत्तित्वघटकत्वाज्ञानेऽपि उक्तरूपेण ज्ञातेऽपि तथाव्यवहारात्, उपधेयसङ्करेऽपि उपाधेरसङ्करात्, एतामादायैव यस्यान्वयव्यतिरेकज्ञानं तेन तत्तथेत्यवसीयते। यद्यपि लघुना गुरोरन्यथासिद्धेर्निर्वक्तव्याया आवश्यकत्वेन दण्डरूपत्वेनापि तस्य तत्रैव प्रवेशस्तथापि कारणतावच्छेदकत्वेन 30

सहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वं वेति ।

दुर्वचमित्यनुशयेनाह—**सहकारीति**। सहकारित्वं कारणगर्भमित्यन्योन्याश्रय इति नाशङ्कनीयम्। सर्वदाऽव्युत्पन्नं प्रति लक्षणप्रणयनात्। लक्ष्यं लक्षणत्वं च जानानं प्रत्यवेऽसम्भवेन तथात्वं वाच्यम्, परिभाषाकर्तुरिच्छाया एव विभागे नियामकत्वादिति। एवमन्यथासिद्धनियतपूर्ववर्तिन एव कार्यसम्भवेऽन्यस्य सहभावमात्रम्, यथा गन्धं प्रति र[26b][पा]दिप्रागभावादेस्तद्व्यक्तिं प्रति च तदन्यप्रागभावादेः। अत्र च गुरुणा गुरोः कारणतावच्छेदकत्वासम्भवेन च तत्त्वस्य सम्भवे अन्यथासिद्धस्यावश्यकत्वेन लघिमाहुः। यथा जन्यमहत्त्वेनानेकद्रव्यवत्त्वस्य महत्त्वत्वन्तु न कारणतावच्छेदकं यथाकाशादिमहत्त्वस्य स्वरूपयोग्यत्वे कदाचित् फलोपधानापत्ते'र्नित्यस्ये'ति न्यायात्, तदनुपगमे तु लाघवेन द्रव्यसाक्षात्कारत्वेन तज्जन्यतावच्छेदकत्वात्। जन्यसमवेतत्वरूपानेकद्रव्यवत्त्वस्य च बहिर्द्रव्यसाक्षात्कार एव कारणत्वस्य प्रसक्तत्वात्। इत्यस्या'न्यथासिद्ध'मिति यथाश्रुतार्थमादाय प्रकृते तन्निर्वचनशक्यतावानपि लघुमनियतपूर्ववर्त्यसंग्रहार्थत्वादेवेति वाच्यम्। अवश्यक्लृप्तपूर्ववर्तिना नावश्यक्लृप्तपूर्ववर्त्येवान्यथासिद्धम्। अनावश्यकक्लृप्तत्र गुरुत्वाद्यवच्छिन्नं प्रति व्यभिचारि च। व्यभिचारश्चान्वयतो व्यतिरेकतश्च, तेन कारणतावच्छेदकत्वाद्येन तत्तद्व्यक्तिं प्रति सामान्यव्यभिचारिजातीयसम्भवादिना च तत्त्वं, तेन नान्यथासिद्धत्वमर्थवत्त्वमिति वदन्ति। वस्तुतस्तु इच्छाया एव परिभाषानियामकत्वात् येन येन रूपेणान्यथासिद्धत्वं तदन्यतमत्वं प्रवेशनीयमिति एतावन्मात्रं न्यायः। एवं कुलालपितुः कुलालत्वेनानन्यथासिद्धत्वेऽपि कुलालपितृत्वे-नान्यथासिद्धत्वं जन्यस्याभिन्नजनकं प्रति पूर्ववर्तित्वे गृहीत एव जनकत्वेनाभिमतस्य पूर्ववर्तित्वं गृह्यते इति तेन तं प्रति तथा। जनकं व्यापारत्वेन विशिष्टमिति **मिश्राः**। एवं शब्दाश्रयत्वेन घटं प्रति तस्यान जनकं प्रति पूर्ववर्तित्वे गृहीत एव तं प्रति यस्य तद्ग्रहणं तेन तथेति वाच्यमिति सम्प्रदायः। वस्तुतस्तु यद्धर्मावच्छिन्नं प्रति येन रूपेण यस्यान्यथासिद्धत्वं तद्धर्मावच्छिन्नं तत्कारणत्वे निवेश्यम्, अनुगमस्य [illegible] न तदभिप्रायेण। अतएव ध्वंसेन प्रतियोगि, प्रतियोगिना च ध्वंसः। अतएव गन्धो घटोत्पत्त्यादिकमो नानुवृत्तः, अन्यथा गन्धो गन्धवत्त्वादि-[illegible]। अनादित्वादेरपि नित्यत्वस्य नानुपपत्तिरन्योऽपि। अन्यथा-[27a][illegible] सह गच्छति। [illegible] न [illegible] तदनुगमश्च न [illegible] विस्तरः। **सहकारीति**।

विवादस्तर्हि ? कुत्र ? अनुग्राहकत्वसाम्यात्, सहकारिष्वपि शक्तिपदप्रयोगात्, सहकारिभेदे। तत्रापि दहनादेरनुग्राहकोऽधिकोऽस्त्येव नः प्रतिबन्धकैरपनीयते इति यदि, तदा न विवदामहे। अस्मदभिप्रेतस्य चाभावादेरनुग्राहकत्वमङ्गीकृत्य निःसाधना मीमांसका अपि न विप्रतिपत्तुमर्हन्ति। ततोऽभावादिरनुग्राहक इत्येके, नेत्यपरे, इति विवादकाष्ठायां व्युत्पादितश्चैतस्यानुग्राहकत्वम्। किमपरमवशिष्यते यत्र प्रमाणमभिधानीयमित्यलमतिविस्तरेण।

रित्याह— **विवाद** इति। कारणत्वमेव शक्तिपदवाच्यं, तथानुग्राहकं सहकार्यनुग्राहकम्, अतः सहकारिण्यादि[ण्यपि ?] शक्तिपदप्रयोगात् किं सहकारि यतो यतो दाह इति धार्यते इत्याह—**अनुग्राहकत्वेति**। यत् सा हि स एव, कार्यं तदनुग्राहकं. तच्च कारणत्वं सहकारि च, तथा च सहकारिभेदे विवाद इत्यर्थः। ननु प्रतिबन्धकापनेयमनुग्राहकं मयाप्यङ्गीक्रियत एव, तत्र कथं विवाद इत्यत आह—**तत्रेति**। **निःसाधना** इति। अर्थापत्तेरन्यथोपपत्तेरनुमानस्य चान्यथासिद्धत्वात् **मीमांसकानां** निःसाधनत्वं विवादाय[प ?][त्तिकां|-रम्भिकां ?] विप्रतिपत्तिमाह—**तत** इति। **एके नैयायिकादयः, अपरे मीमांसकाः**।

विचारगुर्वाविति भावः। शक्तौ विवाद इति व्यवहारमुपपादयन्नाह—**अनुग्राहकत्वेति**। कार्याभावप्रयोजकाभावप्रतियोगित्वमनुग्राहकत्वम्, तच्च भवदभिमतायां शक्तौ अस्मदभिमतेषु सहकारिष्वपि। तथाच सह[27b]कारिषु विवाद एव शक्तिविवाद इति भावः। तत्रापि सहकारित्वेन मन्ये प्रतिबन्धकेऽपक्रियमाणे विवादमुपपादयति—**दहनादेरिति**। अधिको भिन्नः प्रतिबन्धकमन्त्रादिप्रयोक्तृभिरिति यदि सामान्यतस्तदा न विवदामहे। इदं नास्माकमनभिमतम्, अस्मदभिप्रेतस्य प्रतिबन्धकापक्रियमाणस्याभावादेरनुग्राहकत्वं दाहादिकारणत्वं स्वीकृत्य **मीमांसका** अपि निःसाधना निर्युक्तिका विप्रतिपत्तुं **नैयायिक**मतविपरीतप्रतिपत्तिं कर्तुं नार्हन्ति, न समर्था इति विवादविषयं निष्कृष्याह—**अभावादिरित्येति**। प्रतिबन्धकापक्रियमाण इत्यादिः, तेन नाव्याप्त्याभासः। आदिपदात् प्रोत्तेजकाद्युत्तेजकादिपरिग्रहः। **एके नैयायिकाः ; अपरे मीमांसकाः**। तथा च प्रतिबन्धकाभावो दाहजनको न वेति विवादकोटौ व्युत्पादितं [illegible] अनुग्राहकत्वं दाहकारणत्वम्। [illegible] प्रतिबन्धकाभावकारणतावादिभिः [illegible] प्रसक्तिरियमिति यत्र तथा प्रमाणं मानयन्ति।

तथापि चेतन एवायं संस्क्रियते, न भूतानीति कुतो निर्णय इति चेत्? उच्यते। भोक्तॄणां नित्यविभूनां सर्वदेहप्राप्तावविशिष्टायां विशिष्टैरपि भूतैर्नियामकाभावात् प्रतिनियतभोगासिद्धेः। न हि तच्छरीरं तन्मनस्तानीन्द्रियाणि विशिष्टान्यपि तस्यैवेति नियमः, नियामकाभावात्। तथा च साधारणविग्रहवत्त्वप्रसङ्गः। न च भूतधर्म एव कश्चिच्चेतनं प्रत्यसाधारणः, विपर्ययदर्शनात्। द्वित्वादिवदिति चेन्न। तस्यापि शरीरादितुल्यतया पक्षत्वात्। नियतचेतनगुणोपग्रहेणैव तस्यापि नियमो,

भूतानीति। शरीरादीनीत्यर्थः। व्रीहिषु कांस्ता[काण्ड ?]स्यापास्तत्वात्। भोक्तृप्रत्यासत्त्यविशेषे किञ्चिदेव शरीरादि कस्यचिदेव भोगसाधनमिति नियामकाभावो भोक्तृसंस्कारे मानमित्यर्थः। **विशिष्टान्यपी**ति। संस्कृतान्यपीत्यर्थः। **विपर्यये**ति। भूतधर्मादीनां साधारण्यदर्शनादित्यर्थः। व्यभिचारमत्र शङ्कते—**द्वित्वादिवदि**ति। भूतधर्मो द्वित्वादिर्यथा प्रतिनियतभोगजनकस्तथाऽपूर्वमपि स्यादित्यर्थः। तत्राप्यपेक्षाबुद्धिरेव नियतचेतनगुणो निमित्तं येन नियतभोगसाधनत्वमिति कुतो व्यभिचार इत्याह—**तस्यापी**त्यादि।

'प्रत्यात्मनियमाद्भुक्ते'रिति [१।४] कारिकांशं व्याकर्तुं शङ्कते—**तथापी**ति। संस्क्रियते यागादिना भूतानि शरीरादीनि। तथा च भूतनिष्ठं योग्यमेव किञ्चिद् यागादिजन्यं स्वर्गाद्यनुकूलं स्यादिति तदधिष्ठानाय नेश्वरोऽयम् इति भावः। **नित्यविभूनामि**ति। अत्र नित्यत्वं भूतोपरमे तन्निष्ठसंस्कारोपरमात् भोगो न स्यादित्यत्रोपयोक्ष्यते। विभुत्वञ्च सर्वदेहप्राप्त्युपयोगि देहप्राप्तिस्तत्संयोगः विशिष्टैर्यागादिजन्यसंस्कारवद्भिः भूतैर्देहादिभिः नियामकाभावात्। अत्रैव भोगो जनयितव्य इत्यत्र नियामकाभावात् प्रतिनियतभोगासिद्धेस्तत्प्रसङ्गात् कुतो निर्णय इत्यत्र हेतुप्रश्ने उत्तरम्—**इदानीमि**ति। पञ्चम्यर्थान्वयस्तत्रैव। तद्भूतं यदीयं तद्वृत्तिना संस्कारेण तस्य भोग इत्यत्र नियामकमस्त्वित्यत्राह—**न ही**त्यादि। विशिष्टान्यपि यागादिजन्यसंस्का[र]वन्त्यपि। तथा च शरीरादेस्तदीयतानियामकमपि भोक्तृनिष्ठोऽदृष्टविशेषो वाच्य इति भावः। तथाच भोक्तृनिष्ठ तादृशादृष्टानभ्युपगमे साधारणविग्रहवत्त्वप्रसङ्गः; सर्वेषां शरीराणां सर्वीयत्वप्रसङ्गः। कञ्चिच्चेतनं प्रत्यसाधारणः कस्मिंश्चिदेव चेतने भोगजनको, न सर्वत्र। **विपर्यये**ति। नीलादौ भूतधर्मे असाधारण्याभावदर्शनात् भूतधर्मं तत् कल्पयितुं न शक्यत इति भावः। [28a] दर्शनमात्रमप्रयोजकं, नियमश्च नास्ति, द्वित्वादौ व्यभिचारादित्याशयेनाह—**द्वित्वादी**ति। यथा भूतधर्मोऽपि द्वित्वादिः प्रतिनियतात्मनिष्ठं साक्षात्कारं जनयति, यागादिजन्यसंस्कारो भूतनिष्ठोऽपि तथा स्यादित्यर्थः। तस्यापि द्वित्वादेरपि तदीयतानियामकात्मवृत्तिधर्मस्याभावे साधारण्यमेव शरीरवत् स्यात्, नियतचे[त]नगुणोपग्रहेणैव तत्तन्निष्ठापेक्षाबुद्धिजन्यत्वेनैव तस्यापि द्वित्वादेरपि नियमो नियतनिष्ठसाक्षात्कारजनकत्वम्,

न तु तज्जन्यता'मात्रेण । व्यभिचारात् । तथापि तज्जन्यत्वेन नियमोपपत्तौ विपक्षे बाधकं किमिति चेत्, कार्यकारणभावभङ्गप्रसङ्गः । शरीरादीनां चेतनधर्मोपकर्षेणैव तद्धर्मजननोपलब्धेः । तद् यथा इच्छोपकर्षेण प्रयत्नो, ज्ञानोपकर्षेणेच्छादयः, तदुपकर्षेण सुखादय इत्यादि । प्रकृतेऽपि चेतनगता एव बुद्ध्यादयो नियामकाः स्युरिति चेन्न । शरीरादेः प्राक् तेषामसत्त्वात् । तथा च निरतिशयाश्चेतनाः, साधारणानि भूतानीति न भुक्तिनियम उपपद्यते । एतेन **सांख्यमतमपास्तम्** ।

तज्जन्यत्व'मात्रेण भूतजन्यत्वमात्रेण । अत्र नियामकाभावं शङ्कते—**तथापीति** । कार्यकारणभावमेवाह—**शरीरादीनामिति** । **तद्धर्मजननोपलब्धे**श्चेतनधर्मजननोपलब्धेः । चेतनधर्मोपकर्षेणैव चेतनधर्मोत्पत्तिरिति कार्यकारणभाव इत्यर्थः । तदेव दर्शयति—**तद् यथेति** । **प्रकृतेऽपीति** । शरीरादीनां नियतभोगसाधनत्वेऽपीत्यर्थः । **तेषामिति** । बुद्ध्यादीनामित्यर्थः । **निरतिशया इति** । अदृष्टरहिता इत्यर्थः । एतावता 'प्रत्यात्मनियमाद् भुक्ते'रित्यादि[१.४]कारिकाप्रतीकार्थो व्याख्यातः । ननु चेतनश्चितिशक्तिः पुरुषः, तत्र च न भोगो नाप्यपूर्वं, किन्तु बुद्धिरेव भावाष्टकवत्या इत्यत आह—**एतेनेति** । अपूर्वस्य चेतनधर्मत्वप्रतिपादनेनेत्यर्थः ।

न तु तज्जन्यतामात्रेण शरीरजन्यतामात्रेण [illegible] स्वादि-भोगविशेषात् अतिव्याप्तत्वात् तस्य स्वादिभोगकारणत्वेन नियामकत्वाभावादिति भावः । **तथापी**त्यादि । तज्जन्यत्वेन [illegible] । [illegible] तद्धर्म[illegible]जन्यत्वस्य व्यवच्छेदः । नियमोपपत्तौ प्रतिनियतचेतनगुणोपकर्षेण प्रतिनियत-भोगादिजनकत्वनियमे विपक्षे किं बाधकमित्यर्थः । **कार्यकारणे**ति । अन्यथा-[illegible] प्रतिनियतचेतनधर्मेण प्रतिनियतभोगहेतुभावभङ्गप्रसङ्गः इत्यर्थः । एतदेव कार्यकारणभाव[illegible] विवृणोति—**शरीरादीनामि**ति । प्रकृतेऽपीति [illegible] चेतनगता एव बुद्ध्यादयः चेतनगता बुद्ध्यादय एव नियामकाः [illegible] । तथा च [illegible] नानुपपन्न इति भावः । **शरीरादेरि**ति । तथा च तेषां न [illegible] इति भावः । निरतिशया अदृष्टशून्याः । [illegible] **सांख्यम**त[illegible]—**एतेने**ति । [illegible]चेतनधर्मत्वप्रतिपादनेनेत्यर्थः ।

1 [illegible]

सर्वं हि तत्—अकारणमकार्यः कूटस्थचैतन्यरूपः पुरुषः। आदि-
कारणं प्रकृतिरचेतना परिणामिनी। ततो महदादिसर्गः। न हि चितिरिव
विषयसम्बन्धस्वभावा, अनिर्मोक्षप्रसङ्गात्। नापि प्रकृतिरिव सर्वसम्बन्धस्वभावा, तथापि

प्रकाशकत्वं [illegible] एवं हीति। अकारणमिति। प्रकृतिभेदकम्।
अकार्यमिति। [illegible]। कूटस्थं [illegible]।
आदिकारणं [illegible] परिणामिनीति। तत
इति। प्रकृतेरित्यर्थः। महदादीति। "प्रकृतेर्महान्, महतोऽहङ्कारः, अहङ्कारात्
पञ्च तन्मात्राणी"ति तत्त्वनिर्देश इति भावः। ननु विषयाणां घटादीनां चेतनसम्बन्धः
स्वाभाविकत्वात्, तत एव पुरुषात् [illegible]नुपपत्तौ हि महदादिप्रणा[णा]लिकया
इत्यत आह चितिरिति। चितिविषययोः सम्बन्धे नित्ये विषयाणाञ्च नित्यतया मोक्षः
कदापि न स्यादित्यर्थः। सर्वदैव [illegible] भावः। ननु चैतन्यं प्रकृतौ
प्रतिबिम्बितं प्रकृतिविषयोः [illegible]सम्बन्धः स्यात्, किं महदादिना इत्यत आह—
नापीति। [illegible]। तथापीति। तस्या अपि नित्यत्वात्

[illegible] एवमिति। [illegible]—
अकारणमिति। [illegible] अकार्य इति। [illegible]
[illegible] कूटस्थेति। कूटस्थो नित्य इत्यर्थो
न [illegible] चैतन्यरूप इति। [illegible] इत्यर्थः।
[illegible] आदीति। [illegible]
[illegible] महदादिषो [illegible]। [illegible]
[illegible]—अचेतनेति। [illegible]—परिणामिनीति। तथा
न परिणामि [illegible][28b] भावः। [illegible] प्रकृतौ मानमाह—तत
इति। प्रकृतेरित्यर्थः। [illegible] महदादि [illegible] कार्यमेव मानमिति भावः। आदिपदा-
दहङ्कारतन्मात्राणां परिग्रहः। अतएव "प्रकृतेर्महान् महतोऽहङ्का(ऽ)रः तन्मात्राणी"ति
तत्त्वनिर्देश इति भावः। ननु [illegible] चेतनं [illegible]सम्बन्धमस्तु,
किं महदादिप्रणाल्या इत्यत आह—न हीति। चितिः पुरुषात्मकं चैतन्यं
विषयसम्बन्धस्वभावा [illegible]। अनिर्मोक्षेति। चितेः स्वाभाविकत्वेन
सर्वदैव चितेः पुरुषस्य विषयसम्बन्धे मोक्षो न स्यादित्यर्थः। तयोरनित्यसम्बन्धोपगमे तु
आवश्यको महदादिसर्ग इति भावः। नापीति। प्रकृतिरिव साक्षाद्विषयसम्बन्धस्वभावा,
चितिश्च तत्सम्बन्धेनैव तत्सम्बद्धेति न तदपलाप इति भावः। चितितत्सम्बन्धयो-
र्नित्यतया सर्वदैव चितेर्विषयोपधाने तथाप्यनिर्मोक्ष इत्याह—तथापीति।

[illegible]

[illegible] ननु [illegible] [illegible] —**नापीति** । **आहत्य** [illegible] । **दृष्टेति** । [illegible] [illegible] यथा यदि इदं [illegible] न स्यात्, [illegible] ननु विना इन्द्रियद्वारा [illegible] **नातीन्द्रियमात्रेति** । [illegible] —**व्याप्तेति** [illegible] **नातीन्द्रियमनोग्राह्येति** । [illegible] —**स्थानेति** । [illegible]

[illegible] **नापि घटादिवेति** । [illegible] **दृष्टान्तेति** [illegible] **नातीन्द्रिये** [illegible] **व्याप्तेः** [illegible] **नातीन्द्रियमनोग्राह्यं** [illegible] **यत्राहि** [illegible]

व्याघ्राद्यभिमानिनो नरस्यापि नरत्वेनात्मोपधानायोगात्। नाप्यहङ्कारपर्यन्तव्यापारेण, सुषुप्त्यवस्थायां तद्व्यापारविरमेऽपि श्वासप्रयत्नसन्तानावस्थानात्। तद् यदेतास्ववस्थासु सव्यापारमेकमनुवर्तते, यदाश्रया चानुभववासना, तदन्तःकरणमुपारूढोऽर्थः पुरुषस्योपधानीभवति। भेदाग्रहाच्च निष्क्रियेऽपि तस्मिन्पुरुषे कर्तृत्वाभिमानः, तस्मिन्नचेतनेऽपि चेतनाभिमानः. तत्रैव कर्मवासना। 5

च न मानमस्तीत्यत आह—**नाप्यहङ्कारे**ति। सुषुप्तावस्थायां मनोवदहङ्कारोऽपि निवृत्तव्यापार एव, तथा श्वासप्रश्वासप्रयोजकजीवनयोनियत्नः कस्य व्यापारः स्यादिति तदनुरोधेन बुद्धितत्त्वमावश्यकमित्याह—**सुषुप्ते**ति। कारणान्तराद्भेदकान्तरमाह—**यदाश्रये**ति। अनुभवरूपा वासनाऽनुभववासना, न त्वनुभवजन्या वासना संस्कारः. **सांख्यै**स्तदनभ्युपगमात। **तदन्तःकरण**मिति। बुद्धितत्त्वेन सम्बद्धो 10 गोत्वादिः पुरुषेण चैतन्येन सम्बध्यत इत्यर्थः। ननु यदि बुद्धौ न स्वाभाविकं चैतन्यं, तदा कृतिसामानाधिकरण्येन तज्ज्ञानमनुपपन्नमित्यत आह **भेदाग्रहादि**ति। बुद्धितत्त्वेन भेदाग्रहादित्यर्थः। **तस्मिन्नि**ति। बुद्धितत्त्व इत्यर्थः। पुरुषभेदाग्रहाच्च चैतन्याभिमानमित्यर्थः। कर्मजनिता वासना धर्माधर्मादि[वि ?]त्यर्थः। ननु

जनकत्वाच्चाहङ्कार इति नात्मेति भावः। बुद्धितत्त्वं साधयति—**नाप्यहङ्कारे**ति। 15 तद्व्यापारविरामेऽपि उक्तानाम[29a]हङ्कारपर्यन्तानां व्यापारविरामेऽपि। **श्वासे**ति। जीवनयोनियत्नावस्थानादित्यर्थः। न च स मनोव्यापार एवास्त्विति वाच्यं, मनोव्यापारप्रयत्नस्य इच्छाजन्यत्वनियमादिति भावात्। तथा च जीवनयोनियत्नव्यापारकत्वेन तदुपेयमिति सिद्धम्। तस्येतरविलक्षणं तद्धर्मान्तरमपि वर्णयन्नुपसंहरति—**तस्मादि**ति। एतासु जागरस्वप्नसुषुप्तिदशासु सव्यापारं श्वासप्रश्वासजनकप्रयत्नवत् एकं 20 लाघवसहकारेण एकत्वेन सिद्धम् अनुवर्त्तते, अननुवर्त्तने तु निरुक्तव्यापारानुवृत्तिर्न स्यादिति भावः। अनुभववासना अनुभवरूपा वासना सूक्ष्मरूपेणैवावस्थितस्यानुभवस्य स्मृतिजनकत्वमिति तत्सिद्धा[न्ता ?]दिति वैधर्म्यान्तरमाह—**तदि**ति। तत् महत्तत्त्वाख्यमन्तःकरणम् उपारूढः तत्समवेतवृत्तिरूपज्ञाने विषयतया सम्बन्धः पुरुषस्य निर्लेपस्यापि आत्मन उपधानीभवति सम्बन्धो भवति। तथा च तथाविध- 25 परम्परासम्बन्धेनैव यदा पुरुषस्तत्सम्बद्धस्तदा संसारी, तादृशसम्बन्धापगमेन तदसम्बद्धे च मुक्त इति ध्येयम्। ननु कृतिरूपव्यापारवत्त्वात् बुद्धितत्त्वमेव कर्तृ, तथा च पुरुषः कर्त्तेति कथमभिमान इत्यत्राह—**निष्क्रियेऽपी**ति। निर्द्धर्मिकेऽपीत्यर्थः। पुरुषे कर्त्रभिमानमुक्त्वा कर्त्तरि पुरुषाभिमानमाह—**तस्मिन्नि**ति। बुद्धितत्त्व इत्यर्थः। परस्परस्मिन् परस्पराध्यास इति सिद्धम्। ननु धर्माधर्मयोः 30 कृतिसामानाधिकरण्ये तावपि तत्रैव स्यातामित्यत्रेष्टापत्तिमाह—**तत्रैवे**ति। बुद्धितत्त्व

पुरुषस्तु पुष्करपलाशवन्निर्लेपः । आलोचनं व्यापार इन्द्रियाणां, विकल्पस्तु मनसः, अभि-
मानोऽहङ्कारस्य, कृत्याध्यवसायो बुद्धेः । सा हि बुद्धिरंशत्रयवती । पुरुषोपरागो, विषयो-
परागो, व्यापारावेशश्चेत्यंशाः । भवति हि 'मयेदं कर्तव्यमिति' तत्र मयेति चैतन्योपरागो

[illegible] पुरुषस्त्विति [illegible] इत्यत आह—**पुरुषस्त्विति ।** पुरुषस्य निर्लेपत्वं
निर्गुणत्वं निःसङ्गत्वं श्रुतिसिद्धमित्यर्थः । ननु मनोऽपि चैतन्यस्य विषयसम्बन्धोऽस्तु
किमिन्द्रियैरित्यत आह—**आलोचनमिति ।** आलोचनार्थमिन्द्रियाण्युपगमात् ।
[illegible] प्रत्ययो न जात इति ।
आलोचनं निर्विकल्पकं, [illegible] प्रति नियतं व्यापार **आलोचन-**
मित्याह । अभिमान इति । [illegible] अभिमान
इत्यर्थः । **कृत्याध्यवसायः** [illegible] **बुद्धेः** [illegible]
व्यापार इति सर्वत्रानुषङ्गः । ननु 'कृत्य' 'व्यव' 'साय' इति [illegible], तत्र कथम-
[illegible] आह—**सा हीति ।** 'हि' शब्दो हेतौ । पुरुषचैतन्योपरागादिकं तु
दर्शितमित्यर्थः । कृत्याध्यवसायाकारमाह—**भवति हीति ।** अंशं विभजते—
तत्रेति । [illegible] दर्पणनिर्मलायां बुद्धौ प्रतिबिम्ब उपधानं, तथानात्त्विकमेव,

[illegible] । ननु [illegible] विना
[illegible]—**पुरुषस्त्विति ।** [illegible]
[illegible] । **निर्लेप** इति । [illegible], [illegible] इत्यर्थः ।
[illegible]—**आलोचनमिति ।** निर्विकल्पकमित्यर्थः । इन्द्रियाणां
[illegible] साक्षात् [illegible] भावः । [illegible],
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] 29b [illegible]
[illegible]
[illegible]
[illegible]—**सा हि** [illegible]
[illegible]—**अंशत्रयवती** [illegible]
[illegible]
[illegible] **भवति हीति ।** [illegible]

दर्पणस्येव मुखोपरागो भेदाग्रहादतात्त्विकः। इदमिति विषयोपराग इन्द्रियप्रणाडिकया परिणतिभेदो दर्पणस्येव निःश्वासाभिहतस्य मलिनिमा पारमार्थिकः। एतदुभयायत्तो व्यापारावेशोऽपि। तत्र एवंरूपव्यापारलक्षणाया बुद्धेर्विषयोपरागलक्षणं ज्ञानम्। तेन सह यः पुरुषोपरागस्यातात्त्विकस्य सम्बन्धो दर्पणप्रतिबिम्बितस्य मुखस्येव मलिनिमा, सोपलब्धिरिति। तदेवमष्टावपि धर्मादयो भावा बुद्धेरेव, 5

चैतन्येन बुद्धेर्वास्तवसम्बन्धाभावात्, यथा दर्पणे मुखसम्बन्धमन्तरेणापि मुखभ्रम इत्यर्थः। 'विषयोपरागो' विषयोपधानं, तच्च वास्तवमेव, 'इन्द्रियप्रणालिकया' बुद्धौ ज्ञातरूपविषयसम्बन्धत्वात्। **एतदुभयायत्त** इति। पुरुषोपरागविषयोपराग-महिम्ना कृतिमत्तयाऽध्यवसाय इत्यर्थः। ननु ज्ञानमेव चैतन्यं, तत् कथमनयोर्भेद इत्यत आह—**एवंरूपे**ति। कृत्यध्यवसायलक्षणव्यापारविशिष्टयोरित्यर्थः। 10 **विषयोपरागे**ति। इन्द्रियप्रणालिकया बुद्धौ विषयस्य घटादेर्यः सम्बन्धो वृत्तिविशेषस्तदेव ज्ञानमित्यर्थः। **तेन सहे**ति। विषयोपरागेण सहेत्यर्थः। यथा दर्पणनिष्ठो मलिनिमा दर्पणप्रतिबिम्बितमुख्यातो[मुखादौ ?] दृश्यते तथेत्यर्थः। तथा च 'घटं जानामी'त्यनुव्यवसायाख्या 'उपलब्धिरि'त्यर्थः। ननु तथापि मु[सु ?]-खाद्याधारता पुरुषस्य, तथा च कौटस्थ्यविरोध इत्यत आह—**तदेवमि**ति। ज्ञान- 15 सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मरूपा 'अष्टौ' धर्मा इत्यर्थः। संस्कारस्य तैरनङ्गीकारात्

मध्ये दर्पणस्य दर्पणवृत्तिधर्मे मुखोपरागः मुखतादात्म्यं भेदाग्रहात्तादृशभ्रमविषयतामापन्नः, अतएवातात्त्विकः। अत्र च महत्तत्त्वं दर्पणस्थानीयं, तन्निष्ठश्च धर्मो वृत्तिरूपं ज्ञानं, तत्र चैतन्यस्याभेदारोपात् स्वाभेदारोपविषयज्ञानसम्बन्धेन चैतन्यस्य घटप्रकाशकत्वं, चैतन्याभेदा-रोपविषयत्वादिति भावः। प्रकृते च दर्पणस्थानीयं महत्तत्वं, निःश्वासश्चेतना, भेदाग्रहः 20 अभिहननं, तेन सम्बन्धेनारोपः, मलिनिमस्थानीयं वृत्तिरूपज्ञानम्। **एतदुभये**ति। विषयोपरागलक्षणज्ञानयोः स्वाश्रयाभेदारोपविषये पुरुषवैशिष्ट्यं भासते इति तदुभयायत्तता। बुद्धिज्ञानोपलब्धयस्तन्नये भिन्नभिन्ना इति दर्शयति—'एवंरूपव्यापारलक्षणायाः' निरुक्तकृत्य-ध्यवसायरूपो व्यापारो लक्षणं व्यावर्त्तकं यस्यास्तद्रूपायाः। एतेन ज्ञानोपलब्धिभ्यां भेदो दर्शितः। विषयस्य घटादेश्चैतन्येन समं य उपरागः सम्बन्धस्तल्लक्षणं तत्स्वरूपं तेन ज्ञानेन 25 पुरुषोपरागस्य उपरक्तपुरुषस्य बुद्धितत्त्वे अभेदारोपविषयस्य पुरुषस्येति यावत्। **दर्पणे**ति। बुद्धितत्त्वं दर्पणं, मुखमात्मा, दर्पणमलिनिमा च बुद्धितत्त्वनिष्ठं ज्ञानं, तत्र मुखं मलिनमितिवत् तत्र चेतनोऽहं जानामीति। ननूक्तप्रणाल्या ज्ञानं बुद्धेरेवास्तु, अहं सुखी अस्मीति प्रतीतिबलात् सुखादयः पुरुष एव सन्तु? तथा च कूटस्थश्रुतिविरोध इत्याशङ्कायामुपसंहरति—**तदेवमि**ति। एवं ज्ञानस्य बुद्धिनिष्ठत्वव्य- 30 वस्थि[30a]तौ अष्टौ धर्म्मा ज्ञानेच्छाकृतिद्वेषसुखदुःखधर्माधर्मरूपाः, तन्नये संस्काराभावात्

[illegible] ॥ यथाह—

कर्तृधर्मा नियन्तारश्चेतिता च स एव नः ।
अन्यथाऽनपवर्गः स्यादसंसारोऽथवा ध्रुवः ॥१४॥

[illegible] नन्वेवं [illegible] न चेति । **परिणामित्वात्** [illegible] ॥१३॥

कर्तृधर्मा इति [illegible]

[illegible] **चेतिता** [illegible] **स एव** [illegible] **अन्यथेति** [illegible]

[illegible] इति **केचित्** । [illegible] **न चेति** । [illegible] **केचित्** [illegible] ॥१३॥

[illegible] **केचित्** ।

कृतिसामानाधिकरण्यव्यवस्थितास्तावद्धर्मादयो नियामका इति व्यवस्थितम्। चेतनोऽपि कर्त्तैव। कृतिचैतन्ययोः सामानाधिकरण्येनानुभवात्। 'न चायं भ्रमो, वाधकाभावात्। परिणामित्वाद् घटवदिति वाधकमिति चेन्न। कर्तृत्वेऽपि समानत्वात्। तथा च कृतिरपि "स्वाभाविकी महतो न स्यात्। दृष्टत्वाद्यमदोप इति चेत्, तुल्यम्। अचेतनकार्यत्वं वाधकं, कार्यकारणयोस्तादात्म्यादिति चेन्नासिद्धेः। न हि कर्तुः 5

व्यवस्थितमिति। कृतहानाकृताभ्यागमप्रसङ्गभयेन व्यवस्थितमित्यर्थः। **अनुभवादि**ति। चेतनोऽहं करोमीत्यनुभवादित्यर्थः। ननूक्तं चैतन्यं कर्तरि प्रतिविम्बितं गृह्यतेऽतः सामानाधिकरण्यं नानुपपन्नमत आह—'**न चे**ति। द्वेग्रामौत्[भ्रमौत् ?]सर्गिकं प्रामाण्यं 'वाधकं' नैवोपपाद्यते, अत्र च नास्तीति भावः। वुद्धिरचेतना परिणामित्वादिति वाधकं शङ्कते—**परिणामित्वादि**ति। तर्हि 10 वुद्धिर्न कर्ता परिणामित्वादिति कर्तृत्वमपि वुद्धितत्त्वस्य "स्वाभाविकत्वे न स्यादिति परिहरति—**कर्तृत्वेऽपी**ति। न त्वहं जानेऽहं या[य ?]त इत्यनुभवादिदमनुमानं वाधितमित्यत आह—**दृष्टत्वादि**ति। चेतनोऽहङ्करोमीत्यनुभवस्यापि सत्त्वादाह—**तुल्यमि**ति। ननु वुद्धिर्न चेतना द्य[अ ?]चेतनकार्यत्वादिति वुद्धावचैतन्यं साधकं स्यादिति शङ्कते—**अचेतने**ति। अत्र विशेष्यासिद्धिमाह— 15 **ने**ति। तदेवाह—**न ही**ति। जायमानः सराग एव दृश्यते, एवं पूर्वपूर्वमित्यनादितैव

चेतनोऽपि चेतन एव, तेनाचेतने तादात्म्येन कर्तृव्यवच्छेदो लब्धः, कर्त्तैव नाकर्त्ता, तेन विशेषणसङ्गत्या चेतनत्वावच्छेदेन कर्त्रन्यत्वव्यवच्छेदो लभ्यते। **कृती**ति। कर्त्ता चेतनो वा, चेतनः कर्त्ता वा, चैतन्यप्रकारिकायाः कर्तृत्वप्रकारिकाया वा प्रमितेर्विषयत्वात्, चेतनवत् कर्तृवद्वेति प्रयोगः। स्वरूपासिद्धिं शङ्कते—'**न चे**ति। वाधकमाह— 20 **परिणामित्वादि**ति। कर्त्ता न चेतनः परिणामित्वादित्यर्थः। **न कर्त्तृत्वेऽपी**ति। वुद्धितत्त्वत्वेन भवदभिमतं कर्तृपरिणामित्वादि[30 b]स्यपि स्यादित्यर्थः। ततः किमित्यत्राह— **तथा चे**ति। "'स्वाभाविकी' तात्त्विकी। वाधं शङ्कते—**दृष्टत्वादि**ति। कृत्याश्रयत्वेन वुद्धेरनुभवसिद्धत्वादित्यर्थः। अयं प्रतिवन्दितया उक्तो हेतुः, न दोषः नास्मदनुमाने दृष्टान्ततयाऽप्रयोजकत्वशङ्काप्रसञ्जकः। **तुल्यमि**ति। कर्त्तुरपि चेतनत्वेनानुभव- 25 सिद्धत्वात् तत्र तदभावसाधने वाध इत्यर्थः। वाधकं कर्त्तुश्चैतन्याभावसाधकम्। **अचेतने**ति। अत्र कार्यत्वमेव विवक्षितम्। 'अचेतने'ति तर्कस्फोरणाय। अत्रानुकूलतर्कमाह—**कार्यकारणे**ति। अकर्तृकार्यत्वादकर्तृत्वमपि सिद्ध्येदिति प्रतिवन्दिसत्त्वेऽपि मूलदोषमाह—**नासिद्धेरि**ति।

1 The printed editions read नायं for न चायं।
2 The printed editions read भाविकी for स्वाभाविकी. 30

कार्यत्वे प्रमाणमस्ति। प्रत्युत 'वीतरागजन्मादर्शनात्' (न्या० ३-१-२५) इति न्यायादुलादिव सिध्यति। यद् यत्र कार्ये रूपं दृश्यते तस्य तस्य कारणात्मकत्वे रागादयोऽपि प्रकृतौ स्वीकर्तव्याः स्युः। तथा च सैव बुद्धिर्न प्रकृतिः, भावाष्टकसंपन्नत्वात्। स्थूलतामपहाय सूक्ष्मतया ते तत्र सन्तीति चेत्, चैतन्यमपि तथा भविष्यति।
5 स्यादसिद्धो हेतुः। तथा सति घटादीनामपि चैतन्यप्रसङ्गस्तादात्म्यादिति चेत्,

---

कर्तृत्वमित्यत आह—**प्रत्युतेति**। **यद् यच्चेति**। यथा रागादिरहितापि प्रकृतिर्बुद्धौ रागादिकं जनयति, एवं चैतन्यरहितापि चैतन्यं जनयेदिति भावः। बुद्धौ रागादिस्वीकारे दूषणमाह **तथा चेति**। 'सैव' प्रकृतिरेव. 'ते' रागादयः। 'तत्र' प्रकृतौ। **तथेति**। सूक्ष्मरूपमित्यर्थः। **असिद्ध इति**। 'अचेतनकार्य-
10 त्वादि'त्यत्र विशेषणासिद्धिरित्यर्थः। **तथा सतीति**। प्रकृतौ चैतन्ये सति तत्परिणामेषु घटादिषु चैतन्यं स्यादित्यर्थः। 'तादात्म्यात्' कार्यकारणयोः। एवं सति रागादिम[द्दीनां ?] बुद्धिकार्यत्वेन रागादयोऽपि घटादौ स्युरित्याह—

[illegible] बाधकमाह—**प्रत्युतेति**। **वीतराग इति**। वीतरागस्य नीरागस्य जन्म न दृश्यते, अपि तु सरागस्यैव जन्म। स च राग इष्टसाधनताधीसाध्य
15 [illegible]। न च तदानीं स्तनपानादेरिष्टसाधनतानुभावकमस्ति इति स्मरणं वाच्यं, तच्च संस्कारजन्यं, स च जन्मान्तरीय एव वाच्यः, एवं पूर्वपूर्वजन्मपरम्परास्वीकारे अनादित्वात्मनः पर्यवसानमित्यर्थः। तदेवं [illegible] कारणात्मकत्वं कारण[illegible]। [illegible]—**तथा चेति**। सैव प्रकृतिरेव भवदभिमतेन बुद्धिमहत्त्वं, न तु प्रकृतिः, न [illegible]। **भावेति**। [illegible]।
20 [illegible]
[illegible]
[illegible]
[illegible]
[illegible] —**स्थूलतामिति**। [illegible] प्रकृतौ। [illegible]
25 [illegible]
तथापीति। [illegible]
[illegible] —**तथा [3] a] सती**ति।
[illegible]—

[illegible]

रागादिमत्त्वप्रसङ्गोऽपि दुर्वारः। ''सौक्ष्म्यञ्च समानमिति'[1] तस्मात्, यज्जातीयात्कारणाद् यज्जातीयं कार्यं दृश्यते तथाभूतात्तथाभूतमात्रमनुमातव्यं, न तु यावद्धर्मकं कारणं तावद्धर्मकं कार्यं, व्यभिचारादिति किमनेनाप्रस्तुतेन? यदि च बुद्धिर्नित्या, अनिर्मोक्षप्रसङ्गः। पुंसः सर्वदा सोपाधित्वे स्वरूपेणानवस्थानात्। अथ विलीयते, ततो नाऽनादेर्विलय इत्यादिमत्त्वे तदनुत्पत्तिदशायां को नियन्ता? 5

रागादीति। ननु रागादयः सूक्ष्ममात्रया घटादौ सन्तीति यदि, तदा चैतन्यमपि तादृक् स्यादित्यत आह—'**सूक्ष्मता चे**ति। तदेवमचेतनाया अपि प्रकृतेश्चेतना बुद्धिः स्यादित्युपसंहरति—**तस्मादि**ति। अप्रस्तुते चैतन्याश्रयस्य जन्यत्वमेव नास्तीति तज्जनकचिन्तायां क प्रस्ताव इत्यर्थः। द्वितीयं कारिकाप्रतीकं व्याचष्टे—**यदि चे**ति। **स्वरूपेणे**ति। कैवल्यात्मनेत्यर्थः। **तदनुत्पत्तिदशायामि**ति। बुद्ध्यनुत्पत्तिदशायामित्यर्थः। **को नियन्ता** किंनिष्ठेनादृष्टेन पुनर्जन्मादि भवेदित्यर्थः। ननु[नु ?] प्रकृतिनिष्ठधर्मादिर्नियामकः स्यादित्यत आह— 10

रागादीति। घटादीनामित्यनुषज्यते। **सौक्ष्म्यञ्चे**ति। घटादीनां सूक्ष्मं रागादिकमस्ति। तथाच तदापादने इष्टापादनमित्यर्थः। **समानमि**ति। तथा चैतन्यापादनेऽपि तथैव इष्टापादनमित्यर्थः। उक्तापादनेऽप्रयोजकत्वमाह—**तस्मादि**ति। 15
'यज्जातीयात्' यज्जातीयधर्मकात्। 'यज्जातीयं' यज्जातीयधर्मकम्। **व्यभिचारादि**ति। धर्मसामान्यनिरूपितव्याप्तौ कपालजन्ये घटेऽकपालात्मके आगन्तुकधर्मनिरूपितायां तत्र सक्रियारब्धे निष्क्रिये गुणनिरूपितायाञ्च विरुद्धगन्धरसवदारब्धे व्यभिचारादित्यर्थः। वक्ष्यमाणयुक्त्याऽजन्यत्वमेव रागादिमतोऽसिद्धमित्यभिप्रेत्याह—**किमनेने**ति। कारिकाया द्वितीयार्द्धं व्याकरोति—**यदि चे**त्यादिना। 'सोपाधित्वे' बुद्धिसम्बन्धेन विषयोपरक्तत्वे। 20
'स्वरूपेण' विषयानुपरागेण। विलीयते च बुद्धिः, अनादेर्भावस्य, आदिमत्त्वे च बुद्धेः। तस्या बुद्धे**रनुत्पत्तिदशायां को नियन्ते**ति। एतस्यैव पुरुषस्य इयं बुद्धिर्विषयोपरागरूपा नान्यस्येत्यत्र किं नियामकं, पुरुषस्य निर्द्धर्मकत्वात्, प्रकृतेरेकतया ऽनियामकत्वात्, बुद्धेरेव तदानीमसत्त्वेनादृष्टस्य तन्निष्ठस्य नियामकत्वा- 25

---

1 शङ्करमिश्र reads सूक्ष्मता च समानेति।

[illegible]

[illegible]

[illegible]

सैव हि तत्तद्व्यवहारगोचरा तेन तेन शब्देन व्यपदिश्यते, शारीरवायुवदित्यागमोऽपि सङ्गच्छते 'इतोऽपि हेतुरसिद्धः। अधिकारनिवृत्त्या² बुद्धेरप्रवृत्तिरपवर्गः, वासनायोगश्चाधिकारः, ततः संसारः। धर्मधर्मिणोरत्यन्तभेदे च कौटस्थ्याविरोधः। भेदश्च विरुद्धधर्माध्यासलक्षणो घटपटादिवत् ³प्रत्यक्षसिद्धः।

प्रकृत्यादिप्रतिपादकश्रुतिविरोधं परिहरति—**सैवे**ति। **शारीरे**ति। यथा शरीरे एक एव वायुः प्राणापानादिव्यापारवत्तया पञ्चसंज्ञक इत्यर्थः। **हेतुरि**ति। अचेतनकार्यत्वरूपा इत्यर्थः। **असिद्ध** इति। विशेषणविशेष्योभयासिद्धे[रि ?]ति भावः। स्वसिद्धान्तानुसारेण **सांख्यमतं** सङ्गमयति—**अधिकारे**ति। 'अधिकारो' दोषस्त'न्निवृत्त्या' तत्कार्यप्रवृत्तिरपैति। वासना धर्माधर्मरूपा, ज्ञानवासना संस्काररूपा, तदधीनो दोष इत्यभेदात्तथोक्तम्। अत्र कौटस्थ्यं नित्यत्वं, तथा च धर्माधर्मादिनिवृत्तावपि नित्यस्यात्मनः कैवल्यमविरुद्धम्। **प्रत्यक्षे**ति—अहमज्ञासिषमहं जानाम्यहं ज्ञास्या-

'सैव' बुद्धिरेतद्रद्दिति बोद्धव्याकारकत्वाद् बुद्धिः, अहमिति प्रमाविषयत्वात् अहङ्कारः, निखिलप्रपञ्चमूलत्वात् प्रकृतिः, सुखादिकरणत्वाच्च मन इत्यर्थः। **शारीरे**ति। यथा एक एव वायुः प्राणनादियोगात् प्राणादिपञ्चसंज्ञाभागित्यर्थः। 'आगमः' बुद्धिप्रकृत्यहङ्कारमनसां पार्थक्यप्रतिपादकः। पूर्वं प्रमाणाभावादसिद्ध इत्युक्तम्, इदानीं बाधकादपि तथेत्याह—'**इतोऽपी**ति। हेतुरचेतनकार्यत्वरूपः रागादिमति स्वरूपासिद्धः। नित्यतायां बुद्धौ मोक्षबन्धौ व्युत्पादयति—**अधिकारनिवृत्त्या ²चे**ति। मिथ्याज्ञानवासनानिवृत्त्येत्यर्थः। 'अप्रवृत्तिः' तदधीनात्यन्तिकी दुःखनिवृत्तिः, 'वासनायोगः' समवायेन तद्वत्त्वं, तेन विषयतया अन्यसमवेतवासनावत्त्वेऽपि न संसारः, 'ततः' मिथ्याज्ञानवासनायाः 'संसारः' धर्माधर्मयोरुत्पादः। एतेन जीवन्मुक्तस्य भोगार्थं विहितनिषिद्धचरणेऽपि नादृष्टान्तरोत्पत्त्या मुक्तिविरोध इत्युक्तम्। एतावता बुद्धिरेव पुरुषः तस्यैव च भावाष्टकमिति सिद्धम्, कार्य्यरूपेण तस्य नाशे नित्यत्वविरोधात्। कौटस्थ्यश्रुतिविरोधमाशङ्क्याह— **धर्मे**ति। तथा च धर्मस्यैव तत्र नाशो न तु धर्मिण इति न विरोधः। **अत्यन्ते**ति। भेदाभेदनिरासाय विरुद्धधर्माध्यास एव लक्षणं ज्ञापकं यस्य स तथा। **घटपटादिवदि**ति। पञ्चम्यन्ताद्वतिः, ³अध्यक्षेणेच्छेत्याद्यध्यक्षेण इत्यर्थः।

1 गुणानन्द reads इतोऽपि. 2 गुणानन्द adds च. 3 गुणानन्द reads अध्यक्षेण सिद्धः.

[illegible] ।

[illegible]ति धर्मस्वभावस्याविभेदेऽपि धर्मिणोऽभेदेनैव प्रत्यभिज्ञानादित्यर्थः । ननु नीलः पट इत्यादिषु [illegible], यतो इत्यादौ सामानाधिकरण्यमनुभूयते, तथान्यत्वाभिमत[illegible] [illegible] । ? [illegible] [illegible] ?] [illegible] धर्मधर्मिणोः [illegible]—न चेति । [illegible][-त्वं ?] भेदेऽपि [illegible][-त्वं ?] भेद एव [illegible]मपि भेदाभेदे चेति भेदानुरोधेनाभेदोऽन्यथा ॥१४॥

[illegible] —न चेति । ननु नीलः पट [इति ?][illegible] इति [illegible] [illegible]—न चेति । [illegible]ति । [illegible] सामानाधिकरण्यं [illegible]

भेदेऽपीति । [illegible]

[illegible] 32a [illegible] सामानाधिकरण्यं [illegible] ॥१४॥

[illegible]

स्यादेतत्। नित्यविभुभोक्तृसद्भावे सर्वमेतदेवं स्यात्। स एव कुतः? भूतानामेव चेतनत्वात्। कायाकारपरिणतानि भूतानि तथा, अन्वयव्यतिरेकाभ्यां तथोपलब्धेः। कर्मज्ञानवासने तु सर्वत्र प्रतिभूतनियते अनुवर्तिष्येते, यतो भोगप्रतिसन्धाननियम इति चेत्; उच्यते—

इदानीं भूतचैतनिकमुत्थाप्य निराकरोति—**स्यादेतदिति**। **सर्वमिति**। 'प्रत्यात्मनियमाद्भुक्ते'रिति [१।४], 'संस्कारः पुंस एवेष्ट' इति [१।१३], 'कर्तृधर्मा नियन्तार' [१।१४] इत्यादि यत् तत् सर्वमित्यर्थः। घटादिचैतन्यनिराकरणायाह—**कायाकारेति**। सति शरीरे चेतयतेऽसति न चेतयत इत्यन्वयव्यतिरेकाभ्यां शरीर एव तस्योपलब्धेरित्याह—**अन्वयेति**। **कर्मज्ञानवासने**—अदृष्टसंस्कारौ तौ च **प्रतिभूतं** प्रतिकायसन्तानं 'नियते' ततश्चैत्रदृष्टं मैत्रो न स्मरति, न वा कृतहानाकृताभ्यागमावित्याह—**कर्मेति**। एतच्च—**वात्सीपुत्राणां वैभाषिकाणाञ्च** मते। अन्यैरदृष्टानभ्युपगमात्।

ननु भूतातिरिक्तेन चेतनं सम्भवेत् तदा निर्दोषतया भोगशून्यो नित्यविभुभोक्तृजातीयो भगवानदृष्टाधिष्ठातृतया सेत्स्यति, चैतन्यस्य भूतत्वव्याप्यत्वे तु भूतस्यादृष्टाधिष्ठातुर्योग्यानुपलब्ध्या बाधेनाभूतचैतन्याभावेनादृष्टं केनाधिष्ठेयं, तथा च 'सर्वमि'ति न्यायोऽपि बाधकरणाङ्कस्य एवेत्याशयेनाह—**स्यादेतदित्यादि**। विभुर्महान्नित्योंऽशवैधर्म्यात् तादृशस्य भोक्तुः सद्भावे तज्जातीयेन भगवताधिष्ठानेन सर्वमेतत् सर्वमचेतनम् एवं चेतनाधिष्ठितं स्यात्, स एव नित्यविभुभोक्तैव कुतः प्रमाणात् से[त्]स्यति, भूतानामेव चेतनत्वात् भूतस्य निवृत्त्या चैतन्यस्याभूतनिवृत्तत्वात् भूतेनाधिष्ठानं चादृष्टस्य योग्यानुपलम्भबाधितमिति भावः। **प्रकाशकृतस्तु** भूतचैतन्ये प्रकृतसिद्धावपि नित्यविभुभोक्तृनिरासपरेयं शङ्केत्याहुः। भूतचैतन्यवादिनं प्रसङ्गादुत्थाप्य निराकरोतीति **केचित्**। **परे** तु एतदेवमित्यस्य "वीतरागजन्मादर्शनादि"ति न्यायेन रागादिमतोऽनादित्वमित्यर्थं कल्पयित्वा प्रकृतप्रसङ्ग इत्याहुः। मदुक्तयुक्त्यैव **सांख्य**मतनिरासो युक्तः, न तु नास्तिकयुक्त्या, इत्यभिप्रायेणैव तदुत्थानं नित्यविभुर्भूतभिन्न इति **सांख्यम**ामित्यप्याहुः। ननु भूतचैतन्येऽविशेषात् घटादेरपि तत्त्वं स्यादित्यत आह—**कायेति**। तथा चेतनानि। **अन्वयेति**। अन्यथा विभुत्वाविशेषात् तवापि आकाशादेस्तत्त्वं दुर्वारं स्यादिति भावः। **कर्मेति**। कर्मवासना धर्माधर्मौ ज्ञानवासना भावनाख्यः संस्कारः प्रतिभूतनियते स्वकारणीभूतकर्मज्ञानाधिकरणसन्ताननियते तत्त्वानतिप्रसक्ते इति यावदनुवर्त्तिष्येते स्थास्यतः स भूतत्वव्याप्यो यथा रूपं विशेषगुणश्च चैतन्यमिति प्रयोगः। एतत् स्मरणाधिकरणं, यद्येतत् स्मृतिजनकानुभवाधिकरणं न स्यात् एतत्स्मृत्यधिकरणं न स्यात् मतवदित्यत्र तर्के व्याप्तिग्रहमूलमाह—

स्मरणायोगात्। नापि मृगमदवासनेव वस्त्रादिषु संसर्गादन्यवासनाऽन्यत्र सङ्क्रामति। मात्रानुभूतस्य गर्भस्थेन भ्रूणेन स्मरणप्रसङ्गात्। न चोपादानोपादेयभावनियमो गतिः। स्थिरपक्षे परमाणूनां [1]तदभावात्। खण्डावयविनं प्रति च विच्छिन्नानामनुपादानत्वात्। पूर्वसिद्धस्य चावयविनो विनाशात्।

अस्तु तर्हि क्षणभङ्गः। 5

मात्रेति। 'गर्भस्थेनानुभूतस्य' 'स्मरणप्रसङ्गादि'त्यर्थः। यथाश्रुते नु [तु?] इष्टापत्तावपि दोषाभावात्। उपादानवासना उपादेये संक्रामति मातृभ्रूणयोस्तु न तथा, इत्यत आह—**न चेति**। [1]**तदसम्भवादिति**। उपादानोपादेयभावाऽसम्भवादित्यर्थः। **खण्डावयविनमिति**। तथा च कराद्यपाये तदनुभूतस्मरणं न स्यात्। तत्र खण्डशरीरे करादे[?]रेव उपादानत्वात् खण्डावयविस्थलेऽप्यवयवी 10 चेदस्ति, तदा तत एव स्मरणं स्यादित्यत आह—**पूर्वेति**।

अस्तु तर्हीति। तथा च परमाणूनामुपादानोपादेयभावसिद्धौ वासनासंक्रमः स्यादिति नातिप्रसङ्ग इति भावः। क्षणिकत्वे विप्रतिपत्तिः—सत्त्वं क्षणमात्रवृत्त्यनेकवृत्तिधर्मव्यापकताश्रयं न वा? एवं च यत् सत् तत् क्षणिकं यथा घटः संश्च विवादाध्यासितशब्दादिरित्यनुमानं पराभिमतम्। सत् स्वोत्पत्त्यव्यवहितोत्तरक्षण- 15 वृत्तिध्वंसप्रतियोगि न वा? स एव क्षणमात्रवृत्त्याधारताप्रतियोगित्वव्याप्या न वा? उपादानत्वमुपादेयसमानकालीनं न वा? तद्घटध्वंसः तद्घटोत्पत्त्यव्यवहितोत्तरक्षणवर्ती[वृत्तिः?] न वेति। ननु यद्यजनकाज्जनकमतिशयितं स्यात्तदा ताद्रूप्येण गृह्येत, न च गृह्यते, तस्मान्न ततो भिन्नमित्यत आह—

केचित् स्मरणायोगादस्मरणापत्तेः संसर्गात् सन्निधानात् दूषयति—**मात्रेति**। 20 सन्निधानस्य तत्रापि सत्त्वादिति भावः। भ्रूणेन गर्भस्थशरीरेण। **न चेति**। उपादानेनानुभूतम् उपादेयेनैव स्मर्य्यते इति नियमगतिर्म्मम मते तदभावात् परमाणुशरीरयोरुपादानोपादेयभावाभावात्। तथा चोपादानपरमाणुनानुभूतमुपादेयं स्मरतीति कल्पयितुं न शक्यत इति भावः। स्मृतेरपि परमाणुवृत्तित्वोपगमे तु अध्यक्षाभावादिति ध्येयम्। विच्छिन्नानां तदातननाशप्रतियोगिनाम् अवयविनोऽन्त्यावयविनः कार्य्यत्वेन 25 प्रतीयमानस्य पूर्वमवयवावयविसमुदायवृत्तित्वमुक्तम्, इदानीमन्त्यावयविन्येव तदिति न पौनरुक्त्यम्।

अस्तु तर्हीति। तथाच भोगकुर्वद्रूपात् स्मृतिकुर्वद्रूपाच्च परमाणुपुञ्जात् भोगस्मृती स्तां किन्त्वनिष्ठभोक्तृत्वेनेति भावः। तथा पूर्वोत्तरशरीरयोरुपादानोपादेयभावाद्वासनासंक्रमेण

1 शङ्करमिश्र reads तदसम्भवात् for तदभावात्। 30

[illegible]

[illegible]

[illegible] आत्मतत्त्वविवेके, [illegible]

[illegible]

[illegible] आत्मतत्त्वविवेकः [illegible]

अपि च—

न वैजात्यं विना तत्स्यान्न तस्मिन्ननुमा भवेत् ।
[1]विना तेन न तत्सिद्धिर्नाध्यक्षं निश्चयं विना ॥१६॥

अत्रापि लेशतो दूषयति—**न वैजात्यमिति**। 'वैजात्यम'ङ्कुरादिकुर्वद्रूपत्वम-कुर्वतो बीजान्नाङ्गीकर्तव्यं यदि, तदा बीजत्वेनैवाङ्कुरकारणतेति न क्षणिकत्वसिद्धि-रित्यर्थः। अस्तु तर्हि वैजात्यमत आह—**न तस्मिन्निति**। वैजात्ये कारणगते स्वीक्रियमाणे कार्ये धर्मादावपि तच्छङ्कयाऽनुमानं तु [न ?] स्यादित्यर्थः। मा भूदनु-मानं, प्रत्यक्षमेव प्रमाणमस्तु, को दोष इत्यत आह—[1]**तेन विनेति**। अनुमानेन विना क्षणिकतैव न सिध्येदित्यर्थः। तर्हि प्रत्यक्षादेव क्षणभङ्गः सिध्येदित्यत आह—**नाध्यक्षमिति**। **निश्चयः** सविकल्पं तेन हि प्रत्यक्षं['] निर्विकल्पकमनुमीयते। न च क्षणिकत्वगोचरं सविकल्पकमस्तीत्यर्थः।

शिष्याकांक्षामनुसृत्य संक्षेपेण क्षणभङ्गबाधिकां युक्तिमाह—**अपि चेति**।

वैजात्यं फलाव्यवहितप्राक्कालातिरिक्तव्यावृत्तं निखिलफलोपहितवृत्तिकुर्वद्रूपत्वाख्यं विना तत्क्षणिकत्वं न स्यात् न सिद्ध्यति स्थिर एव बीजादौ सहकारिसमव[33b]धानासम-वधानाभ्यां कार्य्योत्पादानुत्पादसम्भवादिति भावः। तस्मिन् वैजात्ये ऐन्द्रियकवृत्तौ अतीन्द्रिये चाभ्युपगम्यमानेऽनुमानुमितिर्न भवेत् धूमादिलक्षणे कार्य्येऽपि धूमत्वव्याप्याया-स्तादृश्या एव जातेर्वह्निकार्य्यतावच्छेदकत्वशङ्कया धूमसामान्ये व्यभिचारसंशयादिति भावः। धूमस्यापि किञ्चित् कार्य्यं प्रति कुर्वद्रूपत्वेन तत्रापि तव मते तस्याः जातेः सम्भवात्, सम्भवति चागुरौ विशेषधर्मे सामान्यधर्म्मस्य कार्य्यतानवच्छेदकत्वादिति हृदयम्। मास्त्वनुमा किन्नश्छिन्नमित्यत आह—**विनेति**। तेनानुमानेन विना तस्य कुर्वद्रूपत्वरूप-वैजात्यस्य क्षणिकत्वस्य वा न सिद्धिः, कार्य्येण सत्त्वेन वा हेतुना तस्य त्वयानुमेयत्वादिति। ननु मास्तु तयोरनुमानम्, अध्यक्षमेव तत्र मानमङ्गीकार्य्यमित्यत आह—**नाध्यक्षमिति**। अध्यक्षं निर्विकल्पकं निश्चयात् सविकल्पकात् विना न सिद्ध्यति, तस्य तदेकोन्नेयत्वात्; अन्यथा तादृशवैजात्यक्षणिकत्वयोरभावगोचरमेवाध्यक्षमस्तीत्यपि वक्तुं सुकरत्वात् तदभाव एव सिद्ध्येत्। अभावस्य तुच्छतया नाध्यक्षगोचरत्वमिति चेत्, अनुगताकार-स्यापि त्वन्मते अलीकत्वात् नाध्यक्षविषयतासम्भव इति भावः।

---

1 शङ्करमिश्र reads तेन विना for विना तेन।

न हि करणाऽकरणयोस्तज्जातीयस्य सतः सहकारिलाभालाभौ तन्त्रमित्यभ्युपगमे
क्षणिकत्वसिद्धिः। तथैकव्यक्तावप्यविरोधात्, 'तत्त्वा तादृग्वे'ति न कश्चिद्विशेष इति
न्यायात्। ततस्तावनादृत्य वैजात्यमप्रामाणिकमेवाभ्युपेयम्। एवञ्च कारणवत्
कार्येऽपि किञ्चिद्वैजात्यं स्याद् यस्य कारणापेक्षा, न तु दृष्टजातीयस्येति शङ्कया न
5 तदुत्पत्तिसिद्धिः[1]। दृष्टजातीयमाकस्मिकं स्यादिति चेन्न।

सहकारिसमवहितं करोति, तदसमवहितं न करोतीत्यभ्युपगमः स्थैर्यमेव
साधयेन्न क्षणिकत्वमित्याह—**न हीति**। कुत एवमत आह—**तथैकेति**। सहकारि-
लाभालाभाभ्यां जनकत्वाजनकत्वे व्यक्त्यैक्येऽप्यविरुद्धे इत्यर्थः। **तत्त्वेति**। सा
च व्यक्तिः सहकारिसमवहिता भवतु, तज्जातीयाऽन्या वेति न कश्चिद्विशेष इत्यर्थः।
10 **तौ** सहकारिलाभालाभौ, **वैजात्यं** कुर्वद्रूपत्वम्। 'एवञ्च कार्येऽपि किञ्चिद्वैजात्यं',
तथा च स एव वह्निजन्यो नान्य इति धूममात्राद्वह्निमात्रं नानुमीयेतेत्यर्थः।
तदुत्पत्तिनिश्चयः[1] कार्यकारणभावनिश्चयः। 'दृष्टजातीयं' धूमत्वावच्छिन्नम्।

वैजात्यं विना न क्षणिकत्वमित्युपपादयति—**न हीत्यादि**। करणाकरणयोः कार्यो-
पधानानुपधानयोः तज्जातीयस्य बीजजातीयस्य सतः कार्याव्यवहितप्राक्क्षणे तदतिरिक्तक्षणे
15 च सतः सहकारिलाभालाभौ तत्समवधानासमवधाने तन्त्रं प्रयोजकम्। **तथेति**। यथा
क्षणिकतापक्षे सहकारिसमवधानासमवधानाभ्यां कार्यकरणाकरणे तथा एकव्यक्तावेव ताभ्यां
तयोरविरोधात्। **तत्त्व[द्वे ?]**ति। यत् सहकारिणा समवधाने कार्योपहितं तदेव तदसम-
वधाने कार्यानुपहितमित्यस्मन्नये। **तादृग्वे**ति। या व्यक्तिः सहकारिसमवधाने कार्यो-
पहिता तादृश्येवावान्तरवैजात्यरहितैतद्भिन्ना व्यक्तिः सहकार्यसमवहिता कार्यानुपहिता त्वन्मते
20 इति हेतोर्न कश्चिद्विशेषः। 'अवान्तरवैजात्यं तत्त्वे'ति न्यायात् इत्यन्यथोपपत्तेः सम्भवात्। तौ
सहकारिलाभालाभौ अनादृत्य कार्योपधानानुपधानप्रयोजकत्वेनानुपगम्य वैजात्यं कुर्वद्रूपम्
अप्रामाणिकमिति वक्ष्यमा[34a]णयुक्त्या अनुमानाभ्यक्षयोरभावद्योतनायैवेति वैजात्यान्वयि।
एवञ्च योग्यत्वेऽयोग्याया जातेरुपगमे तु कारणवत् बीजादाविव कार्येऽपि धूमादौ यस्य
कारणापेक्षा यदवच्छिन्नस्य वह्निकारणत्वं न तु दृष्टजातीयस्य धूमत्वावच्छिन्नस्य न
25 तदुत्पत्तिसिद्धिर्न धूमत्वावच्छेदेन वह्निजन्यत्वनिश्चयः; तथाचाविच्छिन्नमूलादिविशिष्टधूम-
सामान्येनापि वह्न्यनुमानं न स्यादिति भावः। ननु धूमत्वं कार्यमात्रवृत्तितयावश्यं
कार्यतावच्छेदकं वाच्यं, न चान्यत् कारणं तथा दृश्यते इति वह्निनिष्ठकारणता-
निरूपितकार्यतावच्छेदकमेव तद्वाच्यमिति नोक्तशङ्का स्यादित्यभिप्रायेणाह—**दृष्टेति**।

---

1 वर्द्धमान reads निश्चयः for सिद्धिः।

[illegible]

[illegible]

[illegible]

[illegible] उद्योयतां वेति । [illegible] भावः । [illegible] भावः । ननु यथा तत्र [illegible], तथा [illegible]

कार्यैकनियम्यस्य तदनुपलब्ध्यैवानिश्चयोपपत्तेः। कार्यस्य चातीन्द्रियस्यापि संभवात्। अत एवानुपलब्ध्यन्तरमपि निरवकाशमिति। एवं विधिरूपयोर्व्यावृत्तिरूपयोर्वा जात्योर्विरोधे सति न समावेशः। समाविष्टयोश्च परापरभावनियमः। अन्यूनानतिरिक्तवृत्ति जातिद्वयकल्पनायां प्रमाणाभावात्।

कार्येति। ननु कार्यस्यैवातीन्द्रियत्वादत आह—**कार्यस्येति**। **अनुपलब्ध्यन्तरमिति**। व्यापकानुपलब्धिरपीत्यर्थः। अतीन्द्रियस्यैव तद्व्यापकस्यैव सम्भवादिति भावः। इदानीं परापरभावानुपपत्तिं कुर्वद्रूपत्वजातौ बाधकमाह—**एवं विधीति**। **विधिरूपयोरिति** स्वमते, **व्यावृत्तिरूपयोरिति** परमते। **विरोधे सतीति**। परस्परात्यन्ताभावसमानाधिकरणत्वे सतीत्यर्थः। 'न समावेशः' न सामानाधिकरण्यं गोत्वाश्वत्ववत्। 'समाविष्टयोश्च' न्यूनाधिकयोरेव वृत्तित्वनियमः वृक्षत्वशिंशपात्ववत्। तदिह यदि शालित्वं व्यापकं तदा यववीजे कुर्वद्रूपत्वं न स्यात्, यदि कुर्वद्रूपत्वमेव व्यापकं तदा कुशूलस्थेऽपि बीजे शालौ कुर्वद्रूपत्वं स्यादिति भावः। ननु समावि? [ष्ट]योर्न्यूनाधिकदेशवृत्तित्वं नियतम्, अन्यूनानतिरिक्तदेशयोरपि जात्योः सम्भवादित्यत आह—**अन्यूनेति**।

कार्यानुपलब्धिरप्यक्षसिद्धा तावत् कथमनुपलब्ध्यान्यथा स्यादित्यत आह—**कार्यैकेति**। तदनुपलब्ध्या कार्यानुपलब्ध्या निश्चयस्यैवोपपत्तेः; न तु तदनुपलब्धिरपेक्षिता इति भावः। ननु यत् येन सहेन्द्रियेण तत् तेन तदर्थक्रियाकारि, न च धूमो ... तदर्थक्रियाकारीति तेन सह स्यादित्यत आह—**कार्यस्येति**। तथा च तेनार्थक्रियाकारित्वानवधारणमिह इति भावः। अत एवोक्तमनुपलब्ध्यन्तरं व्यापकानुपलब्धिरूपम्।

नन्वेवं शक्तिः कुर्वद्रूपत्वादिविशेषाः स्यादित्यत्र दोषान्तरमाह—**एवमिति**। 'विधिरूपयोः' स्वमते, 'व्यावृत्तिरूपयोः' परमते। जात्योः तद्व्यवहारविषययोर्विरोधे परस्परात्यन्ताभावसमानाधिकरणत्वेन समावेशः नैकाधिकरणवृत्तित्वं, समाविष्टयोश्च न्यूनाधिकवृत्तित्वनियमः। एकत्र तदेकतरसमानाधिकरणात्यन्ताभावप्रतियोगित्वे सति तदभाववद्वृत्तित्वम् अपरत्वं, तदभावसमानाधिकरणत्वे सति तदभाववद्वृत्तित्वं परत्वमित्यर्थः। प्रकृते च शालित्वकुर्वद्रूपत्वयोर्मिथोऽत्यन्ताभावसमानाधिकरणयोः समावेशोऽस्त्येव, न चानुगमः इति भावः। ननु समाविष्टयोर्नियमेन परापरभावनियमः, घटत्वकलशत्वादिवत् एकदेशत्वादौ तदभावादित्यत आह—**अन्यूनेति**। यत्र न न्यूनत्वमधिकत्वं वा तत्र जातिः, कलशत्वाद्यन्यूनानतिरिक्तवृत्ति घटत्वादि, इत्यर्थः। अत एवोक्तमाह—**प्रमाणाभावादिति**। एकत्रैव जातिद्वयव्यवहारे भानाभावादित्यर्थः। प्रमाणाभावश्च व्यापकानुपलब्धिबाधनाद्—

व्यावर्त्यभेदाभावेन विरोधानवकाशे भेदानुपपत्तेः। परस्परपरिहारवत्योश्च समावेशे गोत्वाश्वत्वयोरपि तथाभावप्रसङ्गात्। सामग्रीविरोधान्नैवमिति चेत्, एतत्कुतः? परस्परपरिहारेण सर्वदा व्यवस्थितेरिति चेत्, नेदमप्यध्यक्षम्। एकदेशसमावेशेन तु सामग्रीसमावेशोऽप्युन्नीयते। यावत्कार्ययोः परस्परपरिहृतिस्वभावत्वादिति चेत्; तर्हि कम्पशिंशपयोः परस्परपरिहारवत्योर्न समावेशः स्यात्। दृश्यते तावदिदमिति[1] चेत; गोत्वाश्वत्वयोरपि न द्रक्ष्यते इति का प्रत्याशा? तथा च गतमनुपलब्धि-

---

व्यावर्त्येति। यथा वृक्षत्वव्यावर्त्यमवृक्षरूपं शिंशपात्वव्यावर्त्यं वृक्षरूपमपि पनसादि, तथा वस्तुत्वकलसत्त्वादीनां व्यावर्त्यभेदो नास्ति येन भेदः स्यादित्यर्थः। भिन्नवृत्तिनिमित्तकतया पर्यायशब्दोच्छेदप्रसङ्गश्चेति भावः। ननु परस्परात्यन्ताभावसमानाधिकरणयोश्च समावेशे को दोष इत्यत आह—**परस्परे**ति। सामग्रीतोऽश्वसामग्री भिन्नेति न समावेश इत्याह—**सामग्री**ति। गूढाभिसन्धिराह—**कुत** इति। सामग्र्योरसाङ्कर्यं कुत इत्यर्थः। **परस्परे**ति। सामग्र्योर्मिलनं क्वापि न दृश्यत इत्यर्थः। **नेदमि**ति। सामग्र्योरतीन्द्रियत्वात् परस्परपरीहारेणावस्थानं 'नाध्यक्षमि'त्यर्थः। **यावदि**ति। प्रत्युतेत्यर्थः। **कार्ययोरि**ति। कार्योन्नेया सामग्री 'कार्ययोश्च' गवाश्वयोरसाङ्कर्येण सामग्र्योरसाङ्कर्यमुन्नीयत इत्यर्थः। **कम्पे**ति। कम्पपरीहारेणापि निश्चला शिंशपा, शिंशपापरीहारेण पिप्पले कम्प इति सकम्पा शिंशपा नानुभूयेतेत्यर्थः। [1]**अयमि**ति समावेश इत्यर्थः। आशयमुद्घाटयति—**गोत्वे**ति। **गतमि**ति।

व्यावर्त्येति। व्यावर्त्यमधिकरणं तज्जात्यपेक्षया या जातिर्भिन्ना तदन्यतरावच्छिन्नभेदसामानाधिकरण्यवृत्तित्वन्तदन्यतरत्वे आवश्यकं यथा पृथिवीत्वभिन्नं द्रव्यत्वं द्रव्यत्वपृथिवीत्वान्यतरत्वञ्च तदेकतरपृथिवीत्वावच्छिन्नभेदसमानाधिकरणवृत्ति, न चान्यूनानतिरिक्तवृत्ति, तदुपगमे तथा सम्भव इति विरोधानवकाशः, निरुक्तधर्म्मस्य जातिनिष्ठजातिभेदव्यापकस्याभावे[35a] भेदस्य जातिभेदस्य जातावनुपपत्तेः तथाभावप्रसङ्गात्। तथाच परस्परेण परस्पराभावानुमानं न स्यादिति भावः। गोत्वाश्वत्वाश्रयसामग्र्योर्विरोधात् नैवं तयोः समावेशः। एतत्सामग्र्योर्विरोधस्वरूपं शङ्कते—**परस्परे**ति। परस्परसामग्र्योः परस्परसामग्र्यभावव्याप्यत्वेनैव निश्चयादित्यर्थः। इदं तयोः परस्पराभावव्याप्यत्वं गोत्वाश्वत्वयोरेकदेशसमावेशात्, क्वचिदेकदेशे सामानाधिकरण्यसन्देहात्, तदाश्रयसामग्र्योः क्वचित् समावेशोऽपि उन्नीयते। सन्दिह्यते **यावदि**ति। यत इत्यर्थे पुनः शङ्कते—**कार्य्ययोरि**ति। गोत्वावच्छिन्नाश्रयत्वावच्छिन्नयोः परस्परपरिहृतिस्वभावत्वात् तत्त्वावच्छिन्नभेदवत्त्वात् नैवं न तत्सामग्र्योः समावेशः। **तर्ही**ति। तन्नये कर्म्मणो धर्म्मश्चभिन्नत्वेन कम्पस्य चन्दने अचलशिंशपायाञ्च मिथोविरोधदर्शनाच्च न शिंशपायां सामग्र्योः समावेशः। गोत्वाश्वत्वयोरित्यत्र समावेश इत्यनुषज्यते। अस्तु तयोरपि क्वचित् समावेशः। किमेतावतेत्यत्राह—**तथाचे**ति। **अनुपलब्धी**ति।

---

1 शङ्करमिश्र reads अयम् for इदम्।

लिङ्गेनापि, क्वचिदपि विरोधासिद्धेः । ततो विपक्षे बाधकाभावात् स्वभावहेतुरप्यपास्तः ।

कार्येण कारणानुमानं गतम् । कारणाभावेन कार्याभावानुमानमपि गतम् । कारणाभावकार्ययोरविरोधात् समावेशसम्भवादित्यर्थः । **तत** इति । निर्वह्नित्वधूमत्वयोर्विरोधो यदि स्यात् तदा, यदि निर्वह्निः स्यान्निर्धूमः स्यादिति
5 विपक्षबाधकं प्रवर्तेतेत्यर्थः । **स्वभावहेतुरिति** । प्रसङ्गहेतुविपर्यय इत्यर्थः ।

गोत्वव्यापकाश्वाभावाभावेनाश्वत्वेन गोत्वाभावानुमानं न स्यादित्यर्थः । एवं सास्नावत्त्वेनापि अश्वत्वाभावानुमानं न स्यादित्यर्थः, उक्तप्रणाल्या तत्र विरोधाकल्पनात् । अत्र वदन्ति—गोत्वेन सममश्वत्वादीनां विरोधस्तावत् प्रामाणिकस्तत्र च गोत्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वे सति गोत्वात्यन्ताभावसमानाधिकरणजातित्वावच्छेदे-
10 नैव स कल्प्यते, जातित्वञ्च नित्यसमवेतमात्रमधिकृत्य वैयर्थ्यात् नित्यत्वोपादानात् संयोगादेस्तथात्वेऽपि न क्षतिः । यत्र च द्वयोरेव न जातित्वं यथा भूतत्वविभुत्वयोस्तत्र भूतत्वसमानाधिकरणात्यन्ताभावप्रतियोगिभूतत्वाभाववद्वृत्तेर्यद्भूतत्वनिष्ठं सामानाधिकरण्यं तत्र जातिमात्रनिरूपितत्वाभावः कल्प्यते, मात्रोपादानान्मूर्त्तत्वस्य जातित्वेऽपि न क्षतिः । यद्वा आकाशावृत्तिजातीनां मनोनिष्ठात्यन्ताभावप्रतियोगिजातित्वमेवाकाशावृत्तित्वाव-
15 च्छेदकं सति सम्भवे त्यागायोगादिति । नन्वेवं घटत्वपृथिवीत्वयोरपि समावेशो न स्यात्[35b] तयोरपि मिथोऽत्यन्ताभावसमानाधिकरणत्वादिति चेन्न, तत्र मृत्तिकात्वादिव्याप्यनानाजातिस्वीकारात् । घटपदशक्यतावच्छेदकन्तु संस्थानविशेषवत्त्वं, न च संयोगविशेषस्य तत्त्वेन तत्र च कर्मसंयोगजन्यतावच्छेदकजातिभ्यां साङ्कर्य्यभयेन तस्यापि नानात्वेनाननुगमतादवस्थ्यमिति वाच्यं, कर्म्मादिजन्यतावच्छेदकजातेर्नानात्वोपगमेऽपि
20 क्षतेरभावात्, अत्र चानुगतव्यवहारात् तदैक्यस्यावश्यमुपेयत्वात् । न च शब्दविशेषजनकतावच्छेदकजात्या साङ्कर्य्यमिति वाच्यम्, अनुगतकारणासम्भवेन शब्दवृत्तिजातेरेव नानात्वोपगमेन विलक्षणशब्दं प्रति तादृशसंस्थानविशेषस्यैव तथात्वोपगमात् । भवतु वा यत्किञ्चिद्घटत्वमादाय तत्त्वावच्छिन्नकार्य्यतानिरूपितकारणताशालिसंयोगत्वमेवानुगतो धर्मः । एवं घटत्वान्तरमादायापि । इत्थं यदि नाना तदा अस्तु । वस्तुतस्तु एकस्या
25 एव शक्तेस्तद्धर्म्मावच्छेद्यत्वोपगमात् शक्यतावच्छेदके च शक्तेरनुपगमेऽप्यक्षतेर्नानार्थताशक्तिभेद एवेति दिक् । वस्तुतस्तु यत्र जातौ विरोधः प्रामाणिकः, तत्र तथा कल्प्यते तस्य चाधिकरणतावच्छेदकैककल्पनायाम्मानाभावः । अन्यथा सामानाधिकरण्यावच्छेदकधर्म्मान्तरस्य कल्पनापत्तेः । अतएवोपाधौ तत्त्वावच्छेदकधर्म्मान्तरनिरुक्त्यसम्भवेऽपि न क्षतिरिति । कार्य्येण कारणानुमानं प्राक् निराकृतं निराकृतञ्चानुपलब्धिलिङ्गकमपि, सम्प्रति तादात्म्यहेतुकमपि अनुमानं निरस्यति—**तत** इति । तादृशवैजात्यनिवन्धनव्यभिचारसंशयेन
30 तदुत्पत्त्यनिश्चयाद्विरोधानिश्चयाच्च तदुभयरूपं यद्विपक्षे हेतोर्वृत्तितायां बाधकं तस्यासम्भवादिति । स्वभावहेतुस्तादात्म्यहेतुः, तथाच यावद्विशेषबाधाद् गतमनुमितिसामान्येनैवेति भावः ।

नन्वस्ति तत् । यस्मात्—वृक्षजनकप्रत्ययसामग्र्यन्तर्भूता शिंशपासामग्री । सा वृक्षमतिपत्य भवन्ती स्वकारणमेवातिपतेत् । एवं शाखादिमन्मात्रानुबन्धी वृक्षव्यवहारः, तद्विशेषानुबन्धी च शिंशपाव्यवहारः । स कथं तमतिपत्यात्मानमासादयेदिति चेत्; एवं तर्हि शिंशपासामग्र्यन्तर्भूता चलनसामग्री, तदन्यामतिपत्य चलनादिरूपता भवन्ती स्वकारणमेवातिपतेत्; तथा शाखादिमद्विशेषानुबन्धी शिंशपाव्यवहारः, तद्विशेषानुबन्धी च चलनव्यवहारः । स कथं तमतिपत्यात्मानमासादयेदिति तुल्यम् । नोदनाद्यागन्तुकनिमित्तं चलनम्, न तु तद्विशेषमात्राधीनमिति चेत्, यदि

नन्वस्तीत्यादिना विपक्षबाधकप्रमाणस्थापनम् । किन्तु 'स्वभावहेतुस्ता-दात्म्यं च हेतुः । यथा वृक्षः शिंशपेति । तदिति । विपक्षबाधकमित्यर्थः । 'स्वभावहेतुस्तादात्म्यं च हेतुर्यः स्वभावहेतुर्यथा वृक्षः शिंशपा इति । तदिति । विपक्षबाधकमित्यर्थः' ।[1] 'शिंशपासामग्री' यदि वृक्षसामग्रीं व्यभिचरेत् स्वकारणमेव व्यभिचरेदित्याह वृक्षेति । स्वभावव्यभिचारे विपक्षबाधकमुक्त्वा व्यवहारव्यभिचारे तदाह—एवमिति । यथा शिंशपा वृक्षविशेषस्तथा कम्पः शिंशपाविशेष इति तथापि विपक्षबाधकं तुल्यमित्याह—एवं तर्हीति । वृक्षशिंशपयोः स्वाभाविकः सामान्य-विशेषभावो न तु शिंशपाकम्पयोर्येन साम्यं स्यादित्याह—नोदनादीति ।

विपक्षे बाधकमाह—नन्विति । तत् विपक्षे बाधकम् । वृक्षजनकेति । वृक्षोत्पादकेत्यर्थः । वृक्षसामग्र्यघटिता शिंशपासामग्रीति कल्पितम् । 'वृक्षमतिपत्य भवन्ती' वृक्षत्वेन जनयन्ती 'स्वकारणं' शिंशपाकारणम् 'अतिपतेत्' तादात्म्येन व्यभिचरेत्, न शिंशपासामग्री स्यादिति भावः । शिंशपाव्यवहारहेतुकवृक्षव्यवहारसाध्यकानुमाने विपक्षे[36 a] बाधकमाह—एवमिति । 'तद्विशेषानुबन्धी' शाखादिमद्विशेषानुबन्धी तं वृक्षव्यवहारम्, अतिपत्य तद्वैशिष्ट्यपरित्यागेनात्मानमासादयेत्, शिंशपाव्यवहारः स्यादित्यर्थः । कार्यलिङ्गानिश्चयात्मकशङ्कया कार्यकारणभावनिश्चयासम्भवे सहचार-दर्शनमात्रप्रयुक्तः एव तादात्म्याभावादिप्रसङ्ग इत्याह—एवन्तर्हीति । चलदलः कम्पनस्वभावः न स्वभावः सहचारादर्शनासम्भवात् । तथा च चलदलेन शिंशपायास्त-द्व्यवहारेण च तद्व्यवहारस्य नानुमानं न स्यादित्यर्थः । सहचारावसायस्याविशेषादिति भावः । 'सः' चलदलादिव्यवहारः, 'तं' शिंशपाव्यवहारम् । नोदनादीति । तथा च विना शिंशपासामग्रीं नोदनादिघटिता सामग्री, तत्र च चलनोत्पत्तेर्न शिंशपासामग्र्यन्त-र्भूतत्वं चलनसामग्र्या इति भावः । कम्पवत् नोदनस्यापि शिंशपात्मकत्वे उक्तप्रणाल्या तत्सामग्र्या अपि तत्सामग्रीघटितत्वमेव । तथा च न विशेष इत्याह—यदीति ।

1 The Ms. repeats this portion.

नोदनादयः स्वभावभूतास्ततस्तद्विशेषा एव। अथाऽस्वभावभूतास्ततः सहकारिण एव, ततस्तानासाद्य निर्विशेषैव शिंशपा [1]चलमस्वभावत्वमारभते इति। तथा च कुतः क्षणिकत्वसिद्धिः? स्वभावभूता एवागन्तुकसहकार्यनुप्रवेशाद्भवन्तीति चेत्, एवं तर्हि वृक्षसामग्र्यामागन्तुकसहकार्यनुप्रवेशादेव शिंशपाऽपि जायते इति न कश्चिद्विशेषः।
5 एवमेतत्। किन्तु शिंशपाजनकास्तरुसामग्रीमुपादायैव, चलनजनकास्तु न तामेव, किन्तु मूर्तमात्रं, तथा दर्शनादिति चेत्; मैवम्। कम्पजनकाः शिंशपाजनकविशेषा अपि सन्तस्तानतिपतन्ति, न तु वृक्षजनकविशेषाः शिंशपाजनकास्तानिति नियामकाभावात्। शिंशपाजनकास्तद्विशेषा एव, कम्पकारिणस्तु न तथा, किन्त्वागन्तवः सहकारिण इति चेत्; एवं तर्हि तानासाद्य सदृशरूपा अपि केचित्कम्पकारिणोऽनासादितसहकारिणस्तु
10 न तथा। तथा च 'तद्वा तादृग्वे'ति न कश्चिद्विशेषः स्यात्।

स्वभावभूता इति। शिंशपास्वभावभूता इत्यर्थः। **कुत** इति। स्थिरायाः शिंशपाया नोदनादिसहकारिसमवधानात् कम्परूपकार्योत्पत्तेरित्यर्थः। 'भवन्ती'त्यत्र नोदनादय इत्यनुषङ्गः। **एवं तर्हीति**। वृक्षशिंशपयोरपि सामान्यविशेषभावो माऽस्तु, तथाच कम्प इव शिंशपां शिंशपापि वृक्षव्यवहारं तत्सामग्रीं वाऽतिपतेदिति क विपक्षबाधकमित्यर्थः। **एवमेतदिति**। वृक्षसामग्र्यामागन्तुकसहकार्यनुप्रवेशादेव शिंशपा
15 जायते, परन्तु शिंशपयोत्पत्तौ यदवच्छेदकं तस्य वृक्षसामग्रीपरिहारो नास्ति। कम्पोत्पत्तौ यदवच्छेदकं तस्य शिंशपासामग्रीपरिहारोऽस्तीति कम्पः शिंशपां व्यभिचरतीत्यर्थः। कम्पजनका नोदनादयः स्वभावभूता इति त्वया स्वीकृतम्। तथा च कम्प[ः] शिंशपाविशेष एव स्यात्ततश्च मूर्तत्वं तदवच्छेदकत्व[?] स्यादतिप्रसङ्गादि-
20 त्याह—**कम्पजनका** इति। निरस्तामपि शङ्कां परीहारप्रकारभेदार्थं पुनराह—**शिंशपेति**। **तद्वे[द्वे ?]**ति। सैव शिंशपा सहकारिसमवहिता कम्पं जनयेत्तादृशी वेति

'नोदनादयः' शिंशपावृत्तित्वेन प्रतीयमानाः 'स्वभावभूताः' स्वधर्म्मिनोऽभिन्नाः 'तद्विशेषाः' शिंशपाविशेषाः। तथाच तत्सामग्र्यपि तत्सामग्र्यन्तर्भूतैवेति भावः। 'तान्' नोदनादिरूपसहकारिणः, 'निर्विशेषा' कुर्वद्रूपत्वाद्यनुगतजातिरहिता, '' चलस्वभावं' चलनम्। शङ्कते—
25 **स्वभावे**ति। क्वचित् स्वभावभूता अपि चलननोदनादयः। अन्यत्र तज्जातीये आगन्तुकस्य शिंशपां प्रत्यजनकस्यानुप्रवेशात् तद्घटितसामग्र्या भवन्ति उत्पद्यन्ते। तथाच व्यभिचारितया न तेन तदनुमानमिति भावः। **आगन्तुके**ति। वृक्षाजनकेत्यर्थः। **न कश्चिदि**ति। तथाच शिंशपातोऽपि वृक्षानुमानं न स्यादिति भावः। 'एवं' वक्ष्यमाणम्। एतद्विपक्षबाधकमस्तीति प्राक्तनमनुपज्यते। यद्वा एवमेतत् यदभिहितम्। यद्वा
30 तुल्यत्वं तत्तथैव किन्त्वयं विशेषः। शिंशपाजनकास्तरुसामग्रीमुपादायैव, शिंशपाफलोपहिताः। एवमग्रेऽपि। 'तामेव' शिंशपासामग्रीमेव 'तान्' शिंशपाजनकान् अतिपतन्ति तदजन्यान् जनयन्ति। 'तान्' वृक्षजनकान् इत्यत्र तद्विशेषा एव वृक्षजनकसामग्री विशेषा एव न तथा न शिंशपाविशेषाः शिंशपां प्रत्यजनकाः सहकारिणो येषां ते तथा। एवं सहकारितोपगमे तानागन्तुकान् 'सहकारिणः सदृशरूपाः, न तु कुर्वद्रूप[36b]त्वजात्या विसदृशाः केचिन्मूर्ताः।

---

35 [1] गुणानन्द reads चलस्वभावं.

[illegible] । समाविष्टोऽपि परापरभाव एव । अनेकवृत्तीनां [illegible] । तेषान्तु विरुद्धानां न समावेशो ऽपि तेषाम् । [illegible] ।

न [illegible] । प्रकृतमुपसंहरति—तस्मादिति । ननु भूतत्वमूर्त-त्वादीनामपि परस्पराभावसमानाधिकरणानां साङ्कर्ये दूषणं कथं स्यात आह—अनेकवृत्तीनामिति । [illegible] सति [illegible] उपाधित्वं न तु जातित्वम् । उपाधित्वं न दोष इत्यर्थः । एवं सति [illegible] तेषान्त्विति । [illegible] । ननु [illegible] [illegible] न वाच्यम् । तथा च [illegible] समावेशानङ्गीकारे भिन्नमपि [illegible] जातीनान्त्विति । [illegible] न समवायेन वर्तते [illegible], किन्तु [illegible] न समावेशः । समवायेनैव विरुद्धयोः समावेश-[illegible] । एतदेवाह—भिन्नाश्रयत्वादिति । [illegible] तस्मादिति । [illegible] । ननु विरुद्धयोरपि [illegible] समावेशो दृश्यते तत् कथमित्यत आह—अनेकमिति । [illegible] । उपाधित्व- [illegible] न तु जातित्वम् । ननु जातिद्वयाश्रितोऽपि [illegible] इत्यत आह—द्रव्य-गुणादिभावेनेति । [illegible] । तेषामिति । समान-[illegible] व्यक्तिभेदाद्भिन्नाश्रयत्वेनैव प्रमाणसिद्धत्वात्, [illegible] समानाधिकरणानुपपत्तेरिति भावः । नन्वेवं जात्योरपि विरुद्धयोः समावेशोऽस्त्वत आह [illegible] प्रतिषेधेऽयमाह—जातीनामिति । भिन्नाश्रयत्वात् [illegible] नानाधिकरणत्वादिति नाप्रसक्तप्रतिषेध इति भावः । प्रकाश-कृतस्तु—ननु द्रव्यत्वगुणत्वकर्मत्वानां परापरभावो वाऽसमावेशो वेति शिष्यजिज्ञासाया-माह—तेषान्त्विति । द्रव्यत्वादीनामित्यर्थः । व्यक्तीनां तत्तदाश्रयानां व्यञ्जकानां भेदात् विरुद्धधर्माध्यासेन भिन्नत्वेनैव प्रमाणसिद्धत्वात् । ननु जातौ समावेशाभावे [illegible] भेदादिति [illegible] निष्कृष्याह—जातीनामिति । भिन्नाश्रयत्वात् भिन्नभिन्नवृत्तित्वेनैव प्रमाणसिद्धत्वादित्याहुः । परे तूपाधीनां विरुद्धानामपि समावेशो [illegible] समावेशः स्यादित्यत आह—तेषामिति । तेषामुपाधीनां विरुद्धानां परस्पराभावव्याप्यानां [illegible] कम्बुग्रीवादि-मत्त्वानान्तु न समावेशः, सामानाधिकरण्यं व्यक्तिभेदाद्भिन्नाश्रयत्वेनैव प्रमाणसिद्धत्वात् ।

1 [illegible] reads जातीनान्तु for जातीनाञ्च ।

तथाच कुतः क्षणिकत्वम् ?। वैजात्याभ्युपगमे च कुतोऽनुमानवार्त्ता ?। मा भूदनुमानमिति चेन्न। तेन हि विना न तत्सिद्ध्येत्। न हि क्षणिकत्वे प्रत्यक्षमस्ति। तथा निश्चयाभावात्। गृहीतनिश्चित एवार्थे तस्य प्रामाण्यात्, अन्यथाऽतिप्रसङ्गात्।

त्यर्थः। **तथा चेति**। कुर्वद्रूपत्वस्य जातित्वनिराकृतावित्यर्थः। अभ्युपेत्याह—**वैजात्येति**। धूमसामान्येन वह्निसामान्यानुमानं न स्यात्, तद्रूपेण कार्यकारणभावाभावात् कुर्वद्रूपत्वस्य चाग्रहणादिति भावः। चार्वाकमतमाश्रित्याह—**मा भूदिति**। अनुमानमन्तरेण क्षणिकत्वं न सिध्येदित्याह—**तेन हीति**। ननु प्रत्यक्षमेव क्षणिकत्वे मानम् इत्यत आह—**न हीति**। **तथा निश्चयेति**। इदं क्षणिकमिति सविकल्पकाभावादित्यर्थः। ननु निर्विकल्पकेन क्षणिकताग्रहः स्यादित्यत आह—**गृहीतेति**। 'गृहीतं' निर्विकल्पकविषयीकृतं यत्र निश्चीयते सविकल्पकेन विषयीक्रियते तत्रैव प्रत्यक्षं प्रमाणं व्यवतिष्ठत इत्यर्थः। अन्यथा परमाण्वादीनामपि प्रत्यक्षतापत्तिरित्यत आह—**अन्यथेति**।

अयम्भावः—जातीनामुक्तो नियमः उपाधीनान्तु विरुद्धानामपि समावेशासमावेशपरापरभावेषु नियमो नास्ति, किन्तु यथाप्रमाणं व्यवस्थेति। ननु द्रव्यादीनामुपाधित्वे तेषामननुगततया कथमनुगतव्यवहार इति परम्परया जातिरेवोपाधिरिति वाच्यं, तथा च कथमसमावेश इत्यत आह—'जातीनामि'ति। सास्नात्वकम्बुग्रीवात्वादिजातीनां भिन्नाश्रयत्वात् समवायसम्बन्धेन[37a] भिन्नाश्रय एव वृत्तिमत्त्वात् मया च तेनैव सम्बन्धेनासमावेशोऽभिहितः, न तु परम्परयापीति भाव इत्याहुः। **केचित्तु** सास्नादिमत्त्वकम्बुग्रीवादिमत्त्वभूतत्वविभुत्वादिनाखण्डपदार्थान्तरं विशिष्टस्यानतिरेकात्, किन्तु सास्नाकम्बुग्रीवादिविशेषगुणविशेषपरिमाणविशेषात्मकं तेषाञ्चाननुगतानामनुगतव्यवहाराप्रयोजकत्वेन जातिविशेषोऽपि सास्नात्वादि तत्र निवेश्यं, तत्र सास्नादिलक्षणद्रव्यादीनाञ्चेत् समावेशः शङ्क्यते स नास्ति प्रकृते इत्याह—'तेषान्चे'ति। सास्नादिलक्षणद्रव्यगुणानां विरुद्धानां समावेशो नास्त्येव व्यक्तिभेदात् भिन्नाभिन्नाश्रय एव वृत्तेर्जातीनां सास्नात्वादीनां समवायेनैव सास्नादिष्वेव वृत्तेः, न तु गवादिषु, तत् कुतः समावेश इत्याहुः। **तथाचेति**। उक्तयुक्त्या कुर्वद्रूपत्वे निरस्ते इत्यर्थः। तन्निरासे चोपष्टम्भकान्तरमाह—**वैजात्य** इति। अतीन्द्रियस्य जातित्वोपगम इत्यर्थः। तत्क्षणिकत्वं कुर्वद्रूपत्वं वा क्षणिकत्वे तादृशे वैजात्ये वा गृहीतं निर्विकल्पकविषयीकृतं, निश्चीयत इति निश्चयो निश्चयविषयः, एवम्भूतो योऽर्थस्तत्रैव तस्य प्रत्यक्षस्य प्रामाण्यात्, अन्यथा विनापि निश्चयं तत्र निर्विकल्पकमभ्युपेत्य प्रत्यक्षप्रमाणोपन्यासे तादृशवैजात्याभाव एव निर्विकल्पकेन विषयीकृत इति अभ्युपगमेन तदभाव एव स्यादित्यर्थः।

नन्विदानीं घट इति प्रत्यक्षप्रयोगस्य इदानीं घट इति वाक्यं दृश्यते, इदानीमिति च विशेषविधेयेतरनिषेधफलकतया इदानीमेवेति तदर्थः। तथाच तादृशवाक्यार्थसमानविषयकप्रत्यक्षात्मकवक्तृवाक्यार्थज्ञानस्यापि स एव विषय इति क्षणिकत्वनिश्चयसत्त्वात् निर्वि-

ननु वर्तमानः क्षणोऽध्यक्षगोचरः। न चासौ पूर्वापरवर्तमानक्षणात्मा। ततो वर्तमानत्वनिश्चय एव भेदनिश्चय इति चेत्; किमत्र तदभिमतमायुष्मतः?। यदि धर्म्येव नीलादिर्न किञ्चिदनुपपन्नम्। तस्य स्थैर्यास्थैर्यसाधारण्यात्। अथ धर्मः, तद्भेदनिश्चयेऽपि धर्मिणः किमायातम्। तस्य ततोऽन्यत्वात्। वर्तमानावर्तमानत्वमेकस्य विरुद्धमिति चेत्; यदि सदसत्त्वं तत्; तन्न। अनभ्युपगमात्। ताद्रूप्येणैव प्रत्यभिज्ञानात्। सदसत्सम्बन्धश्चेत्; किमसङ्गतम्?। ज्ञानवत्तदुपपत्तेः। क्रमेणानेकसम्बन्ध एकस्यानुपपन्न इति चेन्न। उपसर्पणप्रत्ययक्रमेणैव तस्याप्युपपत्तेः। प्रत्यभिज्ञानमप्रमाणमिति चेत्; अस्ति तावदतो निरूपणीयं, क्षणप्रत्ययस्तु भ्रान्तोऽपि नास्तीति विशेषः। 5

ननु वर्तते घट इति प्रत्यक्षमेव क्षणिकत्वागोचर[म् ?] इत्याह—**नन्विति**। 'वर्तमान'पदेन धर्मिविवक्षा चेत्, तदा तत्प्रत्यक्षताऽस्माभिरपि अभ्युपगम्यैवेत्याह—**यदीति**। स्थैर्यपक्षेऽपि तत्प्रत्यक्षताया अविरोध इत्याह—**तस्येति**। वर्तमानत्वं धर्मो नीलादीनां गृह्यते, तदाह—**अथेति**। 'तस्य' 'धर्मिणः'। 'ताद्रूप्येण' सत्त्वेन। **ज्ञानवदिति**। यथैकमपि ज्ञानं सदसती गोचरयति, तथा नीलादीनामपि सदसत्सम्बन्धो न विरुद्ध इत्यर्थः। ज्ञानमेकदैव सदसत्, सम्बन्धोऽक्रमिकस्तु सविरुद्ध इत्याह—**क्रमेणेति**। **उपसर्पणं** समवधानं, तत्'प्रत्ययः' तत्कारणम्। प्रत्यभिज्ञानवलेन स्थैर्यसिद्धिमाक्षिपति—**प्रत्यभिज्ञानमिति** ॥१६॥ 10 15

कल्पकमप्यस्तीत्याह—**नन्विति**। असौ इदानीन्त्वेन प्रतीयमानः वर्त्तमानत्वनिश्चयः, इदानीं घट इति निश्चयः। गूढाभिसन्धिराह—**किमिति**। तत् वर्त्तमानत्वं यदि धर्म्येव नीलादिस्तदा वर्त्तमान इत्यस्य नीलादिमानित्यर्थो जातः, तदेव चेत् क्षणिकत्वं तदा तद्वदेव तदापतितं न तु नीलादेः, तस्य वर्त्तमानात्मकनीलादेस्तत्प्रत्ययस्य स्थैर्य्यास्थैर्य्यसाधारणत्वात्, उभयथाप्युपपद्यमानत्वात्, न तत् क्षणिकत्वे मानमिति भावः। तस्य नीलादेर्धर्मो वर्त्तमानत्वं तस्य वर्त्तमानत्वस्य पूर्व[37b]पूर्वक्षणवृत्तेर्भेदनिश्चयेऽपि धर्म्मिणो नीलादेः किमायातं तस्य नीलादेस्ततो वर्त्तमानत्वरूपाद्धर्म्माद्वर्त्तमानावर्त्तमानत्वं यदि सदसत्त्वं तदा न तत्रास्तीत्येवोत्तरम्। अत्रापसिद्धान्तमपवदति—**अनभ्युपगमादिति**। सदसत्त्वस्य मया तत्रानुपगमात् नापसिद्धान्तमिति शेषः। अनभ्युपगमे हेतुमाह—**ताद्रूप्येणैवेति**। तत्त्वेनैव प्रत्यभिज्ञानादित्यर्थः। वर्त्तमानावर्त्तमानत्वं सदसतोर्ध्वंसप्रतियोगिनोः कालिकसम्बन्धेन वर्त्तमानत्वञ्चेत् किमसङ्गतं नेदं विरुद्धम्। **ज्ञानेति**। प्रतियोगिध्वंसोभयावगाहिनो ज्ञानस्य। यथा विषयतया उभयसम्बन्धित्वं न विरुद्धं तथा कालिकविशेषणतयापीत्यर्थः। **क्रमेण** इति। उपदर्शितञ्च ज्ञानमेकदैव उभयसम्बद्धमिति भावः। उपसर्पणं समवधानं, प्रत्ययः कारणं, तथाचानेककारणसमवधानक्रमेण क्रमिकानेकसम्बन्धः स्यादित्यर्थः। **इदानीमेवेति**। न वाक्यार्थः, प्रत्यभिज्ञानबाधादिति भावः। अत्र शङ्कते—**प्रत्यभिज्ञानमिति**। अतः स्वस्मिन् प्रत्यभिज्ञाने निरूपणीयं प्रमात्वाप्रमात्वान्यतरत्। वस्तुतस्तु धियामौत्सर्गिकं प्रामाण्यमेवेति भावः ॥१६॥ 20 25 30

स्यादेतत् । मा भूत्प्रत्यक्षमनुमानं वा क्षणिकत्वे, तथापि सन्देहोऽस्तु । एतावताऽपि सिद्धं 'समीहितं चार्वाकस्येति' चेत् ; उच्यते—

स्थैर्यदृष्ट्योर्न सन्देहो न प्रामाण्ये विरोधतः ।
एकतानिश्चयो येन क्षणे तेन स्थिरे मतः ॥१७॥

5 न हि स्थिरे तद्दर्शने वा स्वरसवाही सन्देहः । प्रत्यभिज्ञानस्य दुरपह्नवत्वात् । नापि तत्प्रामाण्ये । स हि न तावत्सार्वत्रिको, व्याघातात् । तथाहि—प्रामाण्यासिद्धौ सन्देहोऽपि न सिद्ध्येत्, तत्सिद्धौ वा तदपि सिद्ध्येत् । निश्चयस्य तदधीनत्वात् ।

---

[1]**चार्वाक**'समीहितमि'ति स्थैर्यासिद्धिरूपम् । **स्थैर्ये**ति । स्थैर्ये तावन्न 'सन्देहः', प्रत्यभिज्ञानविषयत्वात् । 'दृष्टिः' प्रत्यभिज्ञानम् । तदपि मानसप्रत्यक्षम् । तत्रापि न सन्देह
10 इत्यर्थः । **सन्देहोऽपी**ति । कोटिनिश्चयस्य सन्देहप्रयोजकत्वादित्यर्थः । **तत्सिद्धौ** सन्देहसिद्धौ, **तदपि** प्रामाण्यमपि । 'निश्चयस्य तदधीनत्वात्' सन्देहव्यापकत्वात्तेन

---

[1]**चार्वाक**समीहितं स्थिरस्यात्मनोऽसिद्धिरूपम् । ननु कुत्र सन्देहः ? स्थैर्ये वा, प्रत्यभिज्ञानात्मकतद्बुद्धौ वा, स्थैर्यवति स्थैर्यप्रकारकत्वलक्षणप्रामाण्ये वा ? तथा च प्रामाण्यसंशयान्निश्चितेऽपि संशयः स्यादिति भावः । उत्तरक्षणवर्तिनि पूर्वक्षणवर्त्यभेदावगाहिनि प्रत्यभिज्ञाने, पूर्वक्षणवर्तिनि तदभेदावगाहिनि प्रसिद्धे पूर्वक्षणवर्त्यभेदवति
15 पूर्वक्षणवर्त्यभेदप्रकारकत्वलक्षणप्रामाण्ये वा ? तत्र प्रथमद्वितीययोराह—**स्थैर्ये**ति । स्थैर्यस्य प्रत्यभिज्ञया तस्याश्चानुव्यवसायेन निश्चयादिति हेतुः । तृतीये त्वाह—**न प्रामाण्य** इति । त्वन्मते तादृशप्रामाण्यस्याप्रसिद्धेरित्यर्थः । चतुर्थे त्वाह—**एकते**ति । पूर्वक्षणवर्तिनि पूर्वक्षणवर्त्यभेदावगाहिनि ज्ञाने येन हेतुना प्रामाण्यनिश्चयः, तेन प्रत्यभिज्ञायामपि कोऽसौ हेतुरित्याकाङ्क्षायामाह—'येन' विरुद्धधर्माध्यासाभावेन पूर्वक्षणवर्तिनि
20 पूर्वक्षणवर्त्यभेदो निश्चितः, तेन स्वविशेष्यवृत्तिना विरुद्धधर्मानध्यस्तविशेष्यकत्वेन इति यावत् । 'स्थिरे' स्थैर्यविशे[38a]षकप्रत्यभिज्ञायां प्रामाण्ये इत्यर्थः । स्वरसवाहीत्यनेन विप्रतिपत्तिजन्यस्य आहार्यसंशयस्य प्रयोजकत्वमिति सूचितं, प्रत्यभिज्ञानस्येति तत्संशये च तस्यैव प्रतिबन्धकत्वादिति भावः । तथा चोक्तं न हि जानन् जानामीति कश्चित्संशेते तत्प्रामाण्ये स्थैर्यवति स्थैर्यप्रकारकत्वलक्षणे यः सन्देहः सार्वत्रिकः निखिलस्थैर्यप्रकारकज्ञानीयः,
25 प्रामाण्यस्य स्थैर्यवति स्थैर्यप्रकारत्वस्य सिद्धौ तत्प्रामाण्यसिद्धौ तदाने स्थैर्यमपि तत्प्रामाण्याङ्गत्वेनैव सिद्ध्येत् , निश्चयस्य स्थैर्यप्रामाण्याङ्गस्य तदधीनत्वात् ; विशेष्ये स्थैर्यसत्त्वव्यापकत्वात् , तथा च सिद्धं नः समीहितमिति भावः । **प्रकाश**कृतस्तु तत्सिद्धौ सन्देहसिद्धौ तदपि प्रामाण्यमपि सिद्ध्येत् । क्वचिदवश्यं तन्निश्चयतादिस्यतामापादयेत् । तत्र हेतुः निश्चयस्य प्रामाण्यनिश्चयस्य तदधीनत्वात् । स प्रामाण्यसंशयोऽधीनो यस्य
30 तत्त्वात् , संशयानुव्यवसायप्रामाण्यनिश्चयाधीनसिद्धिकत्वादित्यर्थः । एतन्मते च प्रामाण्यसामान्यमेवाश्रितमित्याहुः ।

---

1 Rucidatta and Guṇānanda seem to read चार्वाकसमीहितमिति ।

कोटिद्वयस्य चादृष्टस्यानुपस्थाने कः सन्देहार्थः ?। तद्दर्शने च कथं सर्वथा तदसिद्धिः ?। एतेनाऽप्रामाणिकस्तद्व्यवहार इति निरस्तम्। सर्वथा प्रामाण्यासिद्धौ तस्याप्यसिद्धेः। प्रकृते प्रामाण्यसन्देहो, लूनपुनर्जातकेशादौ व्यभिचारदर्शनादिति चेन्न। एकत्वनिश्चयस्य त्वयाऽपीष्टत्वात्। अनिष्टौ वा न किञ्चित्सिद्ध्येत्। सिद्ध्यतु यत्र विरुद्धधर्मविरह इति चेत्; तेनैव स्थिरत्वमपि निश्चीयते। स इह सन्दिह्यते इति चेत्; तुल्यमेतत्। क्वचिन्निश्चयोऽपि कथञ्चिदिति चेत्; समः समाधिः। 5

विना सन्देहानुपपत्तेरित्यर्थः। 'कः सन्देहार्थः' कः सन्देहपदार्थः। **तद्दर्शने वा** कोटिदर्शने वा न 'तदसिद्धिः' न प्रामाण्यासिद्धिः, सन्देहप्रामाण्यस्यैव कोटित्वात्। **तद्व्यवहारः** प्रामाण्यव्यवहारः, स्थैर्यव्यवहारो वा, तस्याप्यसिद्धेरिति। अप्रामाणिकत्वे तद्व्यवहारे वा प्रमाणापेक्षा, प्रामाण्यस्थैर्ययोस्तदपेक्षा वेत्यर्थः। प्रत्यभिज्ञानप्रामाण्ये विप्रतिपत्तिर्न तु सर्वत्र प्रामाण्य इत्यत आह– **प्रकृत** इति। क्षणिकमप्येकमेवं न सिध्येदेवं सतीत्यर्थः। **एकत्वे**ति। **न किञ्चि**दिति। क्षणिकमप्येवं किञ्चिन्न सिध्येदित्यर्थः। **क्वापी**त। क्षणिके वस्तुनीत्यर्थः। **सम** इति। प्रत्यभिज्ञाविषये घटादौ विरुद्धधर्मसंसर्गाभावादित्यर्थः ॥१७॥ 10

अनुपस्थानेऽस्मरणे कः सन्देहार्थः, कः सन्देहकोटिः, कः सन्देहपदार्थ **इत्यन्ये**। 15 तद्दर्शने कोटिद्वयस्य दर्शने तदसिद्धिः प्रामाण्यासिद्धिः, तद्व्यवहारः निरुक्तप्रामाण्यव्यवहारः, व्यवह्रियतेऽनेनेति व्युत्पत्त्या प्रामाण्यनिश्चयः, व्यवहारपदस्य भावसाधनत्वे तु अप्रामाणिको भ्रमाधीन इत्यर्थः। अप्रामाणिको व्यधिकरणप्रकारकः, तथा च तेन कोट्युपस्थित्या स्यात् सन्देह इति भावः। तस्यापि प्रामाण्यभ्रमस्यापि क्वचित् प्रमितमिति न्यायादिति भावः। **प्रकाश**कृतस्तु प्रामाण्यसामान्य एव संशय- 20 माक्षिप्य सर्वथा प्रामाण्यासिद्धौ प्रामाण्यसामान्यासिद्धौ तस्यापि तद्व्यवहारे अप्रामाणिकत्वस्यापीत्यर्थमाहुः। प्रकृते वर्त्तमानक्षणवर्त्तिनि पूर्वक्षणवर्त्तिनोऽभेदावगाहिनि प्रत्यभिज्ञाने प्रामाण्यस्य पूर्वक्षणवर्त्तिनि पूर्वक्षणवर्त्त्यभेदप्रकारकत्वस्य तत्रैव तदभेदावगाहिनि प्रसिद्धस्य सन्देहः। तदभेदप्रकारकत्वस्याप्रामाण्येन सहचारदर्शनस्थलमाह—**लूने**त्यादि। **व्यभिचारदर्शने**ति। तत्प्रकारकत्वस्य प्रामाण्याभाववद्वृत्तित्वदर्शनात्। एकत्वनिश्चयस्य 25 तत्क्षणवर्त्तिन्यपि तत्क्षणवर्त्त्यभेदप्रकारकत्वनिश्चयस्य तदसिद्धेयदिति तत्क्षणवर्त्तिन्यपि तदभेदो, न वा तद्घटितं प्रामाण्यं, तथा च प्राग्वत् व्याघा[38b]त एवेति भावः। सिद्ध्यतु तत्क्षणवर्त्त्यभेदस्तद्घटितञ्च प्रामाण्यं विरुद्धधर्मविरहस्तद्वद्विशेष्यकत्वं वा। स्थिरमपि उत्तरक्षणवर्त्तिन्यपि पूर्वक्षणवर्त्त्यभेदः तत्प्रामाण्यञ्च। स विरुद्धधर्मविरहः तत्क्षणवर्त्तिन्यपि तत्र तत्सन्देहः सम्भवति इत्याह—**तुल्यमि**ति। एतत् सन्देहविषयत्वं 30 क्वचित् कदाचित् निश्चयोऽपि विरुद्धधर्मविरहस्य कथञ्चित् युक्त्यवतारेण ॥१७॥

नन्वेतत्कारणत्वं यदि स्वभावो भावस्य नीलादिवत्तदा सर्वसाधारणं स्यात्। न हि नीलं किञ्चित्प्रत्यनीलम्। अथौपाधिकं, तदा उपाधेरपि स्वाभाविकत्वे तथात्वप्रसङ्गः। औपाधिकत्वे त्वनवस्था। अथाऽसाधारणत्वमप्यस्य स्वभाव एव, तत उत्पत्तेरारभ्य कुर्यात्, स्थिरस्यैकस्वभावत्वादिति चेत्; उच्यते—

---

5 इदानीं प्रकारान्तरेण कारणत्वमाक्षिपति—**नत्वि[न्वि ?]**ति। **सर्वे**ति। दण्डो घटस्येव पटस्यापि कारणं स्यात्, कारणत्वस्वाभाव्यादित्यर्थः। ननु घटनियतपूर्ववर्तित्वौपाधिकं दण्डस्य घटकारणत्वम्। अयमुपाधिः पटं प्रति नास्तीति कथमविशेष इत्यत आह—**अथे**ति। उपाधिरपि दण्डस्वभाव एव। तथा च स एव सर्वान् प्रत्यविशेष इत्याह—**उपाधेरपी**ति। ननु दण्डस्य
10 घटकारणत्वमेव स्वभावस्तथा च कथं पटं कुर्यादित्याह—**अथे**ति।

तर्हि प्रतिक्षणमेव घटं कुर्यात्, स्वभावस्य तादवस्थ्यादित्यर्थः॥

अलौकिकपरलोकसाधनत्वं प्रकारान्तरेणाक्षिपति—**नन्वि**ति। सर्वसाधारण्यं सर्वनिरूपितत्वं, तथाच घटस्य कारणमपि घटेतरस्य निखिलस्य स्यादित्यर्थः। **अथे**ति। तथाचोपाधिर्येन निरूप्यते तेनैव तदिति नातिप्रसङ्ग इति भावः। सोऽप्युपाधिस्तस्य स्वभावो
15 वा औपाधिको वा ? आद्ये, तदुपाधेरिति समानाधिकरणं स्वभावत्वे कारणत्वाभिमतस्वभावत्वे तथात्वप्रसङ्गः सर्वसाधारण्यप्रसङ्गः, तथापि न तेनातिप्रसङ्गवारणमिति भावः। द्वितीये त्वाह—**औपाधिकत्व** इति। अस्य कारणत्वस्य। तथाचासाधारणत्वस्वभावकं कारणत्वं दण्डादेः स्वभाव इति नातिप्रसङ्ग इति भावः। दूषयति—**तत** इति। स्वभावबलादित्यर्थः। उत्पत्तेरारभ्य यावत्सत्त्वं यन्निरूपितं कारणत्वं तत् कुर्य्यात्।
20 **स्थिरस्ये**ति। क्षणिकतानये तु फलानुपहिते कारणत्वमेव नास्तीति नातिप्रसङ्ग इति भावः। एकस्वभावत्वात् तत्कार्य्यकारित्वैकस्वभावत्वात् तदस्वभावत्वे तु कदापि न कुर्य्यादिति भावः।

नन्वर्थक्रियाकारित्वमेव त्वन्मते नीलादेः सत्त्वं तच्च कारित्वं साधारणमसाधारणं वा ? आद्येऽतिप्रसङ्गः, अन्त्ये स्वभावत्वानुपपत्तिरिति युक्त्या निरस्ते कारणत्वे नीलाद्यपि वस्तु सत्पारमार्थिकं न स्यात्। तथाच क्व नीलादिरूप[1]वैधर्म्यदृष्टान्तेन कारणत्वस्य सर्वसाधारण्य-
25 मित्याह[1]—

---

[1] B omits रूप.

हेतुशक्तिमनादृत्य नीलाद्यपि न वस्तु सत् ।
तद्युक्तं तत्र तच्छक्तमिति साधारणं न किम् ॥१८॥

सर्वसाधारणनीलादिवैधर्म्येण काल्पनिकत्वं कार्यकारणभावस्य व्युत्पादयता नीलादि पारमार्थिकमेवाभ्युपगन्तव्यम् । अन्यथा तद्वैधर्म्येण हेतुफलभावस्यापारमार्थिकत्वानुपपत्तेः । न च कार्यकारणभावस्याऽपारमार्थिकत्वे नीलादि पारमार्थिकं भवितुमर्हति, नित्यत्वप्रसङ्गात् । तस्मादस्य पारमार्थिकत्वेऽपरमपि तथा, न वोभयमपीति कथमेकमनेकं परस्परविरुद्धं कार्यं कुर्यात्? । तत्स्वभावत्वादिति यदि, 5

हेतुशक्तिम्िति । कार्यकारणता च तिरस्कारश्चेत्, तदा कादाचित्कत्वेनानुभूयमानं नीलाद्यपि, वास्तवं न भवेदित्यर्थः । 'उत्पत्तेरारभ्य कुर्यादि'त्यत्र साधारण्यप्रसङ्गे व [च ?] समाधिमाह—**तद्युक्तम्**िति घटानुकूलसहकारि'युक्तं' 10 दण्डादि घटे 'शक्तमि'ति सर्वैरेव ज्ञायत इति । कारणत्वमपि साधारणमेवेति । नोत्पत्तेरारभ्य करणं, न च नोलादिवैधर्म्यमपीत्यर्थः । **साधारणम्**िति । नीलादिसाधारणमेवेत्यर्थः । नीलादिपारमार्थिकत्वेऽपि कार्यकारणभाव एव तन्त्रमित्युपपादयति—**सर्वे**ति । **अस्ये**ति । नीलादेरित्यर्थः । **अपरमपि** कारणत्वमपोत्यर्थः । **कथम्**िति । 'एकं 'दण्डादि 'अनेकं' घटा[वटग ?]वाभ्याजनादि कथं 15

हेतुशक्तो[क्तिमि ?]ति । हेतुशक्तिः[?] कारणत्वम् अनादृत्य सर्वसाधारण्यप्रसङ्गेन निरस्य उत्पत्तेरारभ्य कुर्यादित्यत्राह—**य[त ?]द्युक्तम्**िति । तैः सहकारिभिर्युक्तं तेन तेन 20 सम्बन्धेन समवहितं तत्कारणत्वेनाभिमतं तत्र शक्तं तत्फलोपहितम् । ननु मया कारणत्वस्य सर्वसाधारण्यप्रसङ्गे त्वया नीलादेरपारमार्थिकत्वप्रसङ्ग इति प्रतिबन्दिमात्रमुक्तं तच्च न सदुत्तरमित्याह—**इती**ति । सर्वैस्तथा प्रतीयमानत्वरूपं यन्नी[39a]लादेः साधारण्यं कारणत्वं तत्र किम् अपितु भवत्येवेत्यर्थः । 25

पारमार्थिकमेवेति । असतो दृष्टान्तत्वानुपपत्तेरिति भावः । **नित्यत्वे**ति । अतद्व्यावृत्तिवत् अकारणस्य तन्मते नित्यत्वं, यद्वा तत्कार्य्यत्वेनाभिमतानाम् अहेतुकत्वेन नित्यत्वप्रसङ्गादित्यर्थः । अस्य नीलादेः अपरमपि कारणत्वमपि पारमार्थिकमिति विपरिणामेन योज्यम् । एवमग्रेऽपि । नीलादिकारणत्वे दण्डनिष्ठकारणत्वस्य घटनिरूपितस्वभावत्वे दोषान्तरं पूरयति—**कथम्**िति । एकं दण्डादि परस्परविरुद्धं घटगवाभ्याजनादि, तथाच गवाभ्याजनं घटनिरूपितकारणतानिरूपितकार्यताशालि यदि स्यात्, तदा 30 घटः स्यादिति भावः । दण्डनिष्ठानि नानाकारणत्वानि तन्निरूपितानीत्यभिप्रेत्याह—**तत्स्वभावत्वाद्**िति । तथाचानायत्यैव भूतचैतन्यवादो वाच्यः, आत्मनो ज्ञानादिकं प्रति हेतुत्वासम्भवादिति भावः ।

तदोत्पत्तेरारभ्य कुर्यादविशेषादित्यपि न युक्तं, तत्तत्सहकारिसान्निध्ये तत्तत्कार्यं करोतीति स्वभावव्यवस्थापनात्। इदञ्च साधारणमेव, सर्वैरपि तथोपलम्भात्। न हि नीलादेरप्यन्यत्साधारण्यमिति। स्यादेतत्। अस्तु स्थिरं, तथापि नित्यविभोर्न कारणत्वमुपपद्यते। तथा ह्यन्वयव्यतिरेकाभ्यां कारणत्वमवधार्यते, नान्वयमात्रेण, 5 अतिप्रसङ्गात्। न च नित्यविभूनां व्यतिरेकसंभवः। न च सोपाधेरसावस्त्येवेति साम्प्रतम्; तथाभूतस्योपाधिसंबन्धेऽप्यनधिकारात्। जनितो हि तेन स तस्य स्यात्, नित्यो वा?। न प्रथमः, पूर्ववत्। नापि द्वितीयः, पूर्ववदेव। तथापि चोपाधेरेव व्यतिरेको, न तस्य, अविशेषात्। तद्वत इति चेन्न। स चोपाधिश्चेत्यतोऽन्यस्य तद्वत्पदार्थस्याभावात्। भावे वा स एव कारणं स्यात्। अत्रोच्यते—

10 कुर्यादित्यर्थः। **इदमिति**। सहकारिसमवहितं सत् करोतीत्येतदित्यर्थः। साधारण्यमाह—**सर्वैरिति**। **अन्यदिति**। सर्वैस्तथोपलम्भादन्यदित्यर्थः। **तथापीति**। तथा च नालौकिकस्य परलोकसाधनस्य सिद्धिः। धर्माधर्मौ प्रति आत्मनः कारणत्वाभ्युपगमादित्यर्थः। **न च नित्येति**। नित्यत्वान्न कालकृतो विभुत्वाच्च न देशकृतो व्यतिरेको 'नित्यविभूनामि'त्यर्थः। **सोपाधेरिति**। 15 शरीरादिमत इत्यर्थः। **तथाभूतस्येति**। नित्यविभोरित्यर्थः। कथमेतदित्यत आह—**जनितो हीति**। यददृष्टेन यच्छरीरं जनितं तदेव तस्योपाधिर्वक्तव्यः। अन्यथाऽतिप्रसङ्गात्। तथा च भवेदेवं यद्यदृष्टं प्रत्यात्मनः कारणत्वं स्यात्, तदेव तु नास्ति, नित्यविभुत्वेन व्यतिरेकाभावादित्याह—**न प्रथम** इत्यादि। **पूर्ववदेवेति**। नित्यविभुत्वेन व्यतिरेकाजनकत्वासम्भवादेवेत्यर्थः। नित्यस्यापि व्यतिरेकमभ्यु- 20 पेत्याह—**तथापीति**। **स चेति**। तथाचोभयोरपि नित्यत्वान्न व्यतिरेक इति भावः। **तद्वत इति**। न त्वात्मादिरित्यर्थः॥१८॥

न चेति। नित्यत्वेन कालतः विभुत्वेन देशतो व्यतिरेकाभावः सूचितः। एतच्चापाततः। विभुत्वेऽपि संयोगेन गुणादौ विभ्वन्तरेण तदभावस्यानपवादादिति ध्येयम्। सोपाधेः शरीरविशिष्टस्यासौ व्यतिरेकः, तथाभूतस्य व्यतिरेकाप्रतियोगिनः उपाधिसम्बन्धेऽपि 25 शरीरादिसम्बन्धेऽपि अनधिकारादयोग्यत्वात्। तेनात्मना स उपाधिः शरीरादिरूपस्तस्यात्मनः स्यादुपाधिः तज्जनितो वा तदजन्योऽपि नित्योऽनित्यो वा अनित्यो व्यापको न वा पूर्ववद्व्यतिरेकाभावेन तत्रापि जनकतानुपपत्तेरित्यर्थः। द्वितीयः द्वितीयस्य प्रथमः। **नित्येति**। **पूर्ववदेवेति**। तस्य व्यापकत्वे कालतो देशतश्चाव्यापकत्वे च कालत एव न व्यतिरेक इति भावः। द्वितीयस्य द्वितीये त्वाह—**तथापि चेति**। 30 न तस्य नात्मनः अविशेषादिति अनुपहितपक्षे यो दोषः उक्तस्तस्योपहितपक्षेऽप्यविशेषादित्यर्थः। तद्वतः उपाधिमतः स व्यतिरेकः स आत्माऽभावो वा केवलादतिरिक्तस्य विशिष्टस्य वा स एव विशिष्ट एव न तु केवल आत्मा॥१८॥

पूर्वभावो हि हेतुत्वं मीयते येन केनचित् ।
व्यापकस्यापि नित्यस्य धर्मिधीरन्यथा न हि ॥१९॥

भवेदेवं यद्यन्वयव्यतिरेकावेव कारणत्वं, किन्तु कार्यान्नियतः पूर्वभावः। स च क्वचिदन्वयव्यतिरेकाभ्यामवसीयते, क्वचिद्धर्मिग्राहकात्प्रमाणात्। अन्यथा कार्यात् कारणानुमानं क्वापि न स्यात्। तेन तस्यानुविधानानुपलम्भात्। उपलम्भे वा कार्य- 5
लिङ्गानवकाशात्, प्रत्यक्षत एव तत्सिद्धेः। तज्जातीयानुविधानदर्शनात्सिद्धिरन्यत्रापि न वार्यते। तथापि कोष्ठगत्यानुविहितान्वयव्यतिरेकमेव कार्यात्कारणं सिद्ध्येत्, अन्यत्र

पूर्वभाव इति। अनन्यथासिद्धनियत'पूर्वभाव' इत्यर्थः। **येन केन-चिदि**ति। अन्वयव्यतिरेकाभ्यां वा, धर्मिग्राहकमानेन वेत्यर्थः। प्रकृतमधिकृत्याह— **व्यापकस्यापी**ति। **अन्यथे**ति। कारणत्वमन्तरेणेत्यर्थः। 01

अन्यथेति। यद्यन्वयव्यतिरेकादेव कारणत्वं स्यादित्यर्थः। **तेने**ति। अनुमात्रा कार्येण वेत्यर्थः। ननु यत्कार्यं कारणं प्रति लिङ्गं तत्कार्यजातीयं प्रति अन्वयव्यतिरेकौ दृष्टावेव। अतोऽनुमानं स्यादित्यत आह—**तज्जातीये**ति। **अन्यत्रापी**ति। नित्यविभावित्यर्थः। द्रव्यत्वेन गुणं प्रति कारणता तत्रापि स्यादेव। रूपादिकं प्रति घटादिद्रव्यस्यान्वयव्यतिरेकदर्शनादित्यर्थः। **कोष्ठगत्ये**ति। 15

व्यापकस्यापि नित्यस्य 'पूर्वभावो' नियतपूर्ववर्त्तित्वं हेतुत्वव्यवहारविषयः 'येन केन-चित्' न त्वन्वयव्यतिरेकाभ्यामेव 'मीयते' ज्ञानादिकं प्रति आत्मनो येनानुमीयते तदाह— **धर्म्मिधोरि**ति। बुद्ध्यादिकं ससमवायिकारणकं भावकार्य्यत्वादित्यनुमानेन पक्ष-धर्म्मताबलादात्मा सिद्ध्यन् बुद्ध्यादिकारणत्वेनैव सिद्ध्यति। अनेनैव प्रमाणेनात्मा सिद्धः, [39b]अन्यथा तदसिद्धौ कस्य व्यतिरेकाप्रतियोगितया कारणत्वाभावः साधनीय 20
इति भावः।

एवं व्यतिरेकाप्रतियोगितया कारणत्वाभावसाधनम् अन्वयव्यतिरेकावेव व्यतिरेक-घटितमिति तु विवक्षितम्। अन्वयव्यतिरेकयोरेकोऽस्तु कारणताग्राहकं, तथापि यत्र कार्य्येण कारणानुमानं तत्र पक्षधर्म्मताबललभ्यकारणताव्यक्तें न तौ तद्ग्राहकावित्याह— **अन्यथे**ति। पक्षधर्म्मताबललभ्यान्वयव्यतिरेकयोस्तद्ग्राहकत्व इत्यर्थः। कार्य्या- 25
द्धूमादिलक्षणात् कारणं वह्न्यादि नानुमीयते, तेन पक्षधर्म्मताबललभ्यव्यक्तिविशेषेण तस्य धूमादेरन्वयाद्यनुविधानानुपलम्भादित्यर्थः। कार्य्यलिङ्गानवकाशात् तेन लिङ्गेनानुमित्य-नुत्पादात्। **प्रत्यक्षत एवे**ति। तथाच न पक्षतेति भावः। अन्यत्रापि नित्यव्यापके-ऽपि कार्य्यजातीयं स्वगुणं प्रति कारणजातीयस्य घटादेस्तथा दर्शनादित्यर्थः। कोष्ठगत्या वस्तुगत्या, न तु तज्ज्ञानं जनकमित्यर्थः। तथाच तादृशान्वयव्यतिरेकप्रतियोगिशालित्वं 30
कारणत्वव्यापकं तन्निवृत्त्या तत्र तन्निवृत्तिरिति भावः। व्यापकताग्राहकमाह—**अन्यत्रे**ति।

तथा दर्शनादिति चेन्न। बाधेन सङ्कोचात्, विपक्षे बाधकाभावेन चाव्याप्तेः, दर्शनमात्रेण चोत्कर्षसमत्वात्। अस्य च **ईश्वरे** विस्तरो वक्ष्यते। सर्वव्यापकानां सर्वान्प्रत्यन्वयमात्राविशेषे कारणत्वप्रसङ्गो बाधकमिति चेन्न। अन्वयव्यतिरेकवज्जातीयतया विपक्षे बाधकेन [1]च विशेषेऽनतिप्रसङ्गात्। तथा हि—कार्यं समवायि-

---

5 वस्तुगत्येत्यर्थः। **बाधेने**ति। विभावाधेन व्यभि[ति?]रेकवत्येव तत्सङ्कोचादित्यर्थः। व्यतिरेकवदेव कारणत्वमिति व्याप्तौ विपक्षबाधकत्वान्नास्तीत्याह—**विपक्षे**ति। दण्डादौ दर्शनमात्रादन्यत्रापि तथा स्यादित्यत्राह—**दर्शनमात्रेणे**ति। **अस्य चे**ति। उत्कर्षसमजात्युत्तरस्येत्यर्थः। विशेषविरोधप्रस्तावे **पञ्चमस्तवके**। एवं सति घटपटादिकमपि प्रत्याकाशादीनां कारणत्वं स्यादित्याह—**सर्वे**ति। **अन्वये**ति।
10 घटादिकं प्रत्याकाशादीनां न तावत् समवायिकारणत्वं सम्भवति, पृथिवीत्वावच्छिन्नं प्रति पृथिवीत्वावच्छिन्नस्यैव समवायिकारणत्वस्यान्वयव्यतिरेकसिद्धत्वात्। नाप्यसमवायिकारणत्वं, द्रव्ये तदसम्भवात्। नापि निमित्तकारणत्वम्, अन्यथासिद्धत्वादित्यर्थः। 'अन्वयव्यतिरेकवज्जातीये'ति स्फुटयति—**कार्यमि**ति।

बाधेनेति। धर्म्मिग्राहकमानेन सिद्धे व्यतिरेकाप्रतियोगिनः कारणत्वे अस्य व्यापकत्वस्य सङ्कोचाद्व्यतिरेकप्रतियोगिनिष्ठकारणत्वं तद्व्याप्यत्वं, न तु कारणत्वमिति
15 भावः। यथोपदर्शितव्याप्तावप्रयोजकत्वमाह—**विपक्ष** इति। अव्याप्तेर्यथोपदर्शितव्याप्तेरभावात्। ननु दण्डादौ तथा दर्शनादिदमभिधीयते इत्यत्राह—**उत्कर्षे**ति। उत्कर्षसमाख्यजात्युत्तरत्वात्। अस्य चोत्तरस्य **ईश्वरे** तत्साधनप्रस्तावे विस्तरः। असत्त्वं बाधकम्, कारणत्वस्य व्यतिरेकप्रतियोगित्वाभाववद्वृत्तित्वे बाधकं, तथा च विपक्षे बाधकाभावो नेति वार्त्तमिति भावः। **अन्वयव्यतिरेकवदि**ति।
20 यज्जातीये सहकारिसमवधानप्रयुक्तं कार्य्योपधानं तदसमवधानप्रयुक्तञ्च तदनुपधानं तत्तथा। न चाकाशे सहकारिसमवधानतद्व्यतिरेकप्रयुक्ते ज्ञानाद्युपधानानुपधाने इति न तत्र तत् कारणमिति तत् कस्य हेतोरिति चेत्, तादृशस्य स्वभाववादस्येष्टार्थत्वादिति प्रागभिधानात्। ननु यत्र कुत्रचिदुत्पद्यतां ज्ञानमिति तेनैवोपहितमाकाशमपि स्यात्, कालवदित्यत्राह—**विपक्षे**ति। ज्ञानादिकारणत्वव्यवहारविषयत्वाभाववान् आकाशादिर्विपक्षः
25 कारणत्वस्य तद्बाधकेन तद्वृत्तित्वबाध[40a]केनानन्यथासिद्धत्वेन विशेषे नियतपूर्ववर्त्तित्वे ऽसति प्रसङ्गात् आकाशसाधारण्याभावात्। यद्वा अन्वयव्यतिरेकवज्जातीयतया स्वसमवेतकार्य्यं प्रति तत्समवायि घटादिकम् अन्वयव्यतिरेकवदतथात्मनोऽपि द्रव्यत्वेन तज्जातीयतया स्वसमवेतज्ञानादिकं प्रत्येव हेतुत्वं, न तु शब्दादिके तस्य तत्रासमवायात्, तत्र च स्वभावस्य तत्प्रागभावस्य वा नियामकत्वात्। ननु रूपादिकं दर्शनबलात् समवायिजन्यमस्तु,
30 ज्ञानादिकं तत्समवायिकारणमन्तरेणैव स्यात्, तत्राह—**विपक्ष** इति। 'वा'[1]-कारः समुच्चये।

---

1 मुद्रानन्द reads वा for च.

कारणवद् दृष्टमित्यदृष्टाश्रयमपि तज्जातीयकारणकम्, आश्रयाभावे किंप्रत्यासन्नम-समवायिकारणं स्यात्? तदभावे निमित्तमपि किमुपकुर्यात्? तथा चानुत्पत्तिः सततोत्पत्तिर्वा सर्वत्रोत्पत्तिर्वा स्यात्। एवमपि निमित्तस्य सामर्थ्यादेव नियतदेशोत्पादे स [1]एव देशोऽवश्यापेक्षणीयः स्यात्। तथाच सामान्यतो देशसिद्धावितरपृथिव्यादि-बाधे तदतिरिक्तसिद्धिं को वारयेत्? एवमसमवायिनिमित्ते चोहनीये। 5

इत्येषा सहकारिशक्तिरसमा माया दुरुन्नीतितो
मूलत्वात्प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिता।
देवोऽसौ विरतप्रपञ्चरचनाकल्लोलकोलाहलः
साक्षात्साक्षितया मनस्यभिरतिं बध्नातु शान्तो मम ॥२०॥

॥ इति श्रीन्यायकुसुमाञ्जलौ प्रथमस्तवकः ॥ 10

विपक्षबाधकं स्फुटयति—**आश्रयाभाव** इत्यादि। ननु निमित्तकारणमेवाश्रयः स्यादित्यत आह—**एवमपी**ति। तर्हि तदेव समवायिकारणं स्यादित्यर्थः। नित्यकारणविभुभोक्तृसिद्धिमभिप्रेत्याह—**तथा चे**ति। ज्ञानादीनां समवायिकारणं सिध्यद् अष्टद्रव्यातिरिक्तद्रव्यमादायैव सिध्यतीत्यर्थः ॥१९॥

स्तवकार्थमुपसंहरन्नेवाशंसामाह—**इत्येवे[षे ?]**ति। 'इति'-शब्द उपसंहारे, 15

'आश्रयाभाव' इत्यनेन मूल एव, तदभिधेयम्। तज्जातीयकारणकं समवायिकारणकं किमिति समवायिकारणप्रत्यासन्नकारणस्यैव तत्त्वादिति भावः। तथाच कारण-सामान्यानुपपत्तिः, विनैव कारणम् उत्पत्त्युपगमे च सततोत्पत्तिः, आश्रयस्यानियामकत्वे तु सर्वत्रोत्पत्तिः। ननु ध्वंसादिवत् विनापि समवाय्यसमवायिकारणं निमित्तकारण-सामर्थ्यादेव ज्ञानादि नियतदेशोत्पत्तिकं स्यादित्याह—**एवमपी**ति। समवायिकारणत्वं 20
विनापीत्यर्थः। **स [1]चे**ति। स एवेति भावः। तस्य च तत्समवायित्वं मनोऽन्तरेण साधनीयमित्यभिसन्धिः। वस्तुतस्तु अन्योन्याभावरूपः व्यतिरेकः समवायिकारणताग्राहकः, अन्यथा स्वाभाववति स्वस्मिन् समवेतोत्पत्तेर्व्यभिचारस्य वज्रलेपत्वापत्तेः नित्यव्यापकस्यापि नानुपपन्न इति **मणि**कृच्चरणाः। स्वासमवेतकार्यमात्रं प्रति स्वात्मनो निमित्तकारणताप्रवादस्तु न श्रद्धेयः। अस्तु वा अदृष्टद्वारा तथा, अदृष्टं प्रति समवायिकारणता, अन्यत्र चादृष्ट- 25
सम्बन्धेनैव निमित्तता, तेन सम्बन्धेन व्यतिरेकः सुलभ एव। यदि च स्वस्वजन्यान्यतर-हेतुत्वमेव स्वस्य हेतुता तथापि नानुपपत्तिः। विवेचयिष्यते चाधिकमीश्वरसाधनप्रस्तावे॥१९॥

एतावता प्रबन्धेनादृष्टे साधनत्वं व्यवस्थाप्याश्रयासिद्धिं निराकृत्याविद्यादिबोधका-नागमानन्यथासिद्धयन् स्तवकार्थमुपसंहरति—

इत्येषेति। 'इति'-रुपसंहारद्योतनाय। 'असौ' स्वप्रसिद्धो देवः 'मम' चेतसि 'रतिं' 30

---

1 गुणानन्द reads च for एव।

यद्वा 'एषा' इत्यर्थे इत्येषेत्यखण्ड एव शब्दः । 'असौ देवो मम मनसि साक्षाद्वा-
सक्ति[?]मभिरतिं बध्नातु' मम मनस्यासक्तो भवत्वित्यर्थः । **साक्षितयेति** । तस्या-
सक्तौ स्वयमेव साक्षी भवत्वित्यर्थः । 'यस्य एषा' अनेन स्तवकेन यत् साधित-
मदृष्टं सैव 'सहकारिशक्तिः' । सहकारिणि सिद्धान्तिनामेकवाक्यतामाह—**मायेति** ।
दुःखेन मायाऽप्युन्नीयतेऽदृष्टमपीत्यदृष्टमेव **एकदण्डिनो** [माया?]प्रभवं विश्व-
मित्यनेनाचक्षते ; **सांख्या** अपि प्रकृतिपदेनादृष्टमेवाचक्षते, मूलकारणं प्रकृति-
रित्यादि ; त्रिदण्डिनोऽप्यविद्याप्रभवं विश्वमित्याचक्षाणा अविद्यापदेनादृष्ट-
मेवाहुः । 'प्रबोध'स्तत्त्वज्ञानं तन्नाश्यत्वादविद्यापि ततो बिभेति । भोगद्वाराऽदृष्ट-
स्यापि तन्नाश्यतया तदपि ततो बिभेतीति साम्यात् । 'प्रपञ्चो' गोघटादि कार्यजातं
तस्य 'रचना' निर्माणं तत्रेति यः 'कल्लोलः' **सांख्यादिसिद्धान्तप्रवादः**, स एव 'कोला-
हलो'ऽनभिव्यक्तविशेषयु[यु?]क्तिको वचनसन्दर्भः, यस्मिन् विषये 'वित[र?]तः'
शान्तः । 'शान्तो' द्वेषादिहीनः, तथा चादृष्टसहकृत ईश्वर एव प्रपञ्चकारणं, न तु माया
प्रकृतिरविद्या वेत्यर्थः । यद्वा **साक्षादिति** । **साक्षितयेति** । सन्निहितेनैव
सम्बाधं[सम्बन्धः?], तेनाभिरतिबन्धे 'साक्षादेव साक्षी', न तु श्रुतादिसाक्षीत्यर्थः । यद्वा
'साक्षाद्वाभिरतिं बध्नातु' साक्षात्कारविषयो भवत्वित्यर्थः, मननस्य जातत्वात् ॥२०॥

इति प्रथमः स्तवकः ।

त्वद्विषयामनुवृत्तिं 'बध्नातु' स्थिरीकरोतु । तदेतिकर्तव्यतामाह—**साक्षादिति** ।
साक्षात्कारविषयीभूतेत्यर्थः । साक्षात्कारप्रकाराकाङ्क्षायामाह—'साक्षितया' तदनुकम्पाविष्टा-
नतयेत्यर्थः । तथा च येन येन रूपेण मननं तेनैव साक्षात्कारप्रयोजकत्वमादर्शितम् । द्वितीय-
स्तवकार्थोपयोगा[40b]र्थमाह—**शान्त** इति । द्वेषादिहीन इत्यर्थः । तथाच तद्वचनि
नायमाप्यवञ्चकेत्यर्थः । 'प्रपञ्चः' कार्यजातं तस्य 'रचना' निर्माणं तस्य यः 'कल्लोलः'
सांख्यादिसिद्धान्तप्रवादः स एव 'कोलाहलो'ऽनभिव्यक्तिविशेषतया तत्सदृशः स
'विततो' यस्मादस्मदुपदर्शितयुक्त्या तेषां बाधादिति भावः । 'यस्य' देवस्य 'एषा'
प्रथमस्तवकव्यवस्थापितदृष्टसाधनतात्मा वर्णयमेतस्या 'सहकारिशक्तिः' सहकारिकारणम्
'असमा' विविधा कार्यवैचित्र्येण कारणस्य नावितवित्रताका । ननु मायादिकं
तत्र सहकारित्वेनान्यैरुच्यते, तद्विरुद्धमित्यत आह—**मायेति** । ऐन्द्रजालिकमायासादृश्य-
माह—**दुरुन्नीतेति** इति । दुःखेन या उन्नीतिरनुमानं तादृश[ग्?]धर्मिणीत्यादिकं
मायापदस्य इति भावः । एकदण्डिनः । **मूलत्व[ा]दिति** । निखिलकार्यं प्रति
साक्षात्कारणतया प्रयोज[क]त्वात्, **सांख्यैस्तु** तस्याः 'प्रकृति'रित्येवम् । 'प्रबोध'-
स्तत्त्वसाक्षात्कारः तदुत्पत्तेस्तद्विरोधितया उत्पन्ने तत्त्वसाक्षात्कारे अविद्यानाशकायस्पृद्वारा
भोगेनादृष्टनाशे न स्थलीति विद्याविरोधित्वमेव सामान्यम् ॥२०॥

इति । श्रीगुणानन्दविद्यावागीशभट्टाचार्यविरचितः कुसुमाञ्जलि-
प्रथमस्तवकतात्पर्यविवेकः ॥१॥